The sūkta-s of ṛgvedasaṃhitā do not constitute ordinary poetry. The sūkta-s and the various chandas in which they are expressed are intimately connected with the rituals, and the fire altars that are constructed. A discussion of the meter, the chandas, must pay attention to these. Otherwise it is irrelevant for the Vedic studies. A discussion framed in terms of Western terminology, which bears no connection to yajña is not relevant. The structure of ṛgvedasaṃhitā is intimately connected to the performance of somayajña, and the construction of the altar for agnicayana. The symbolic construction of the altar chandaściti bears testimony to this. The chandas, yajña, have all been there since time immemorial and this is specifically stated in ṛgveda itself. All this is completely lost when one uses the Western terminology.

For example, considering the number of dimetric and trimetric verses, Talageri observes that trimeters seem to be older than dimeters because, trimetric verses are more numerous than dimetric ones. He also uses his own chronology of the maṇḍala-s and he further observes that trimeters are more abundant in the early maṇḍala-s, but dimeters are more so in the late maṇḍala-s. However, there is a reemergence of importance of trimeters in the late maṇḍala-s. Still tied to the evidence of the meters in Indo-European cultures, that the dimeter verse is a common factor in Indo-European poetry, he concludes that the oldest dimetric meter in ṛgveda, gāyatri, may be as old as the oldest trimetric meter triṣṭubh. This last conclusion does not tell anything about the meters nor when the whole thing began and it is irrelevant which is old and which is new.

There is a much deeper cosmic significance that becomes revealed when the connection between somayajña, construction of altar in agnicayana and of the symbolic altar chandaściti on the one hand and prajāpati on the other are examined. Prajāpati personifies Time itself. Thus the number of syllables in various chandases such as gāyatri, triṣṭup, paṅkti are related to the measure of time and to the year, saṃvatsara.

śruti declares, as already noted, yajño vai prajāpatiḥ। "verily yajña is prajāpati"
saṃvatsaro vai prajāpatiḥ | PU(1.9) "verily saṃvatsara is prajāpati".
sa eṣo pāṅkto yajñaḥ | BU(1.4.17) "This yajña is five-fold".
kāṣṭhāḥ pañcākṣaro smṛtāḥ | RJ (18) "kāṣṭhā is the duration of five akṣara-s.

These lead to the total number of ṛcas in ṛgveda to 10800 paṅkti ṛcas, or equivalently to 12000 bṛhatī ṛcas, or 18000 gāyatri ṛcas (SB(X.4.2.23-24)). 10800 is also the number of muhūrtas in a year. Thus the total number of syllables in ṛgveda is 432000. Prajāpati personifies Time itself.

It may be recalled that in the somayajña the recitations in prātassavana are in gāyatri, those in the mādhyandina savanna are in triṣṭup, and in the tṛtīya savana, the recitations are in jagatī. The three savanas are said to map the life of the yajamāna. Thus the first 24 years (corresponding to the number of syllables in gāyatri) correspond to prātassavana, the next 44 years correspond to triṣṭup and the next 48 years to jagati. mahīdāsa aitareya, who realized this and completed the somayajña lived for (24+44+48) 116 years.

Somayajña, which was originally in heaven, was brought to earth, by the gāyatri chandas, in the form of a bird. It was brought to earth to help the all-round spiritual development of the humans and to lead them to heaven. The seven chandases, gāyatrī, anuṣṭubh, triṣṭup, bṛhatī, uṣṇik, jagatī, and paṅkti play a very important role in the somayajña. ṛca-s in all the meters are required to be recited for the āgneyakratu, uṣasyakratu and āśvinakratu parts of the prātaranuvāka recital. This amounts to reciting nearly 2000 ṛca-s to satisfy all the requirements laid out in the āśvalāyana śrauta sutra. All this is done before the sunrise on the sutya day.

Another specific requirement is the oblations offered in agni by the following seven ṛtviks, hotṛ, brāhmaṇāchcaṃsi, maitrāvaruṇa, potṛ, neṣṭṛ, agnīdhra, achcāvāka. Each of these must offer one oblation reciting a specific ṛk in gāyatri chandas for the prātassavana. Each of these must offer one oblation reciting a specific ṛk in triṣṭup chandas for the mādhyandina savana. Each of these must also offer one oblation reciting a specific ṛk in jagatī chandas for the tṛtīya savana.

Further, three sūkta-s called unnīyamāna sūkta-s are to be recited by maitrāvaruṇa, (I.16.1-9) for the prātassavana, (VII.21.1-10) for the mādhyandina savanna, and (IV.35.1-9) for the tṛtīya savanna. The rules of recitation are strict. The obvious conclusion is that a discussion of the meters in ṛgveda in terms of dimeters and trimeters without reference to the performance of somayajña, construction of altar in agnicayana and of the symbolic altar chandaściti is inadequate.

Abbreviations

ASS	āśvalāyana ṣrauta sutra
TS	taittirīya saṃhitā
TB	taittirīya brāhmaṇa
PU	praśnopaniṣat
BU	bṛhadāraṇyaka upaniṣat
RJ	ṛkjyotiṣa
RV	ṛgveda
SB	śatapatha brāhmaṇa

<u>Bibliography</u>

1. Arnold, E. V (1905) *Vedic Meter, in its historical development,* Cambridge University Press, England.
2. Aurobindo, ((1956) *The Secret of the Veda,* Sri Aravindashram, Pondicherry
3. Bryant, E. F, and Patton, L. L. ((2005)*The Indo-Aryan Controversy,* Routledge, New York
4. Gonda, J. (1975) *Vedic Literature,* Otto Harrassowitz, Wiesbaden.
5. Haug, M.(2003)*, Sri Aitareya Brahmanam* (Re edited by Jain, S) New Bharatiya Book Corporation, Delhi
6. Jacobi, H. G., (1894) 'On the Date of RgVeda', *Indian Antiquary,* **23**, pp 154-159 (translated from the German by J. Morrison).
7. Kashyap, R. L. (2009) *The RigVeda Samhita,* SAKSHI publications, Bangalore
8. Kashyap, R.L., (2004) *Essentials of Yajurveda,* SAKSHI publications, Bangalore
9. Kak, S. (2000), *The Astronomical Code of the RigVeda*, Munshiram Manoharlal Publishers, New Delhi
10. Kane, P. V., (1994) *History of Dharmashastra,* third edition Bhandarkar Oriental Research Institute, Poona.
11. Macdonnell, A.A.(1963) *The Vedic Mythology,* Indological Book House (reprint), Varanasi.
12. Narahari Achar, B. N., (2018) *Structure of Rigveda*, Lap Lambert Academic Publishing, Mauritius

13. Oldenberg, H(1990) *Prolegomena on Meter and Textual History of the Rigveda*, Motilal Banarsidass Publishers, Delhi
14. Staal, F (2010) *Agni,* Motilal Banarsidass Publishers, Delhi
15. Staal, F (2008) *Discovering the Vedas,* Penguin Books, New Delhi
16. Talageri, S.G(2000) *The Rigveda,* Aditya Prakashan, Delhi
17. Talageri, S. G (2008) *The Rigveda and the Avesta The final Analysis*, Aditya Prakashan, Delhi
18. Tilak, B. G., (1893) *Orion or Researches into the Antiquity of the Vedas,* Poona.
19. Vaidya, C. V.(1986) *History of Sanskrit Literature Vol. I,* Parimal Publications, Delhi
20. Venkata Rao, H.P. (1949) (editor) *RigVeda,* Sri Jayachamarajendra veda ratnamala*,* Mysore

Author's Details

Name : Dr. B. N. Narahari Achar
Designation : Professor Emeritus
Address : University of Memphis,
Memphis TN USA 38152
E-mail : narahari.achar@gmail.com

****

अखण्डसौभाग्यवती भव इति वाक्यस्यार्थ-विमर्शः

Prof. Kamleshkumar C. Chokashi

शोधसारः

विवाहसंस्कारे प्रान्तभागे सद्यः विवाहितायै कन्यायै एकः आशीर्वादः प्रदीयते विवाहसंस्कार-प्रसङ्गे समुपस्थितैः कैश्चित् स्त्रीजनैः। अस्मिन् आशीर्वादप्रदानावसरे अखण्डसौभाग्यवती भव – इति वाक्यं प्रयुज्यते। अत्र सौभाग्यं नाम पतिः इति मत्वा यावत् पर्यन्तं त्वं जीवसि तावत् पर्यन्तं ते सौभाग्यं नाम पतिः जीवितो भवतु इति वाक्यार्थं स्वीकुर्वन्ति जनाः। परमस्मिन् वाक्यार्थे बहवः दोषाः सन्ति, तान् दोषान् प्रस्तूयास्य वाक्यस्य वास्तविकं तात्पर्यमत्र लेखे प्रकटितं वर्तते।

तत्र खण्डितम् अखण्डितं चेति सौभाग्यद्वयं भवति मानवजीवनस्य। तत्र खण्डितं सौभाग्यं प्राप्यते चेत् तत् संतोषकारं भवति। तद्यदि न प्राप्यते, तदापि मानवेन सन्तोषः एव धारयितव्यो भवति। परं यत् अखण्डं सौभाग्यमस्ति, तत्तु सर्वैः सर्वदा प्राप्तव्यमेव। किञ्च तदखण्डसौभाग्यमित्यस्मिन् लेखे चर्चितं चित्रितञ्चास्ति। इति दिक्।

कुञ्चीशब्दाः – विवाहसंस्कारः। वरः। वधूः। सौभाग्यम्। नवदम्पती। खण्डितम्। अखण्डितम्। खण्डितं सौभाग्यम्। अखण्डितं सौभाग्यम्। आशीर्वादः।

****

षोडशसंस्कारेषु अन्यतमः संस्कारः विवाहसंस्कारः वर्तते। अस्मिन् विवाहसंस्कारे नाना विधयः संकल्पिताः सन्ति। तेषु एकः विधिः वर्तते आशीर्वादप्रदानस्य। सामान्यतस्तु वैदिके विधौ परिक्रमा, सप्तपदी, अभिषेकः, सूर्यदर्शनम्, हृदयाभिलंभनम् आदयः विधयः क्रियन्ते। तदनन्तरमेकः विधिः वध्वभिमन्त्रणम् नाम वर्तते, तत्र यः मन्त्रः विनियुक्तो वर्तते सः एवम्प्रकारकः अस्ति –

ओं सुमङ्गलीरियं वधूरिमां समेत पश्यत।
सौभाग्यमस्मै दत्त्वा याथाऽस्तं विपरेतन[1]॥

अस्मिन् मन्त्रे वरपक्षीयबन्धुजनानां गृहलक्ष्मीभूतायाः नवोढायाः कृते उपस्थिताः महानुभावाः सादरं निवेद्यन्ते यत् ते अस्यै सौभाग्यं प्रदाय इतः अर्थात् विवाहमण्डपात् स्वीयं गृहं प्रति प्रस्थानं कुर्वन्तु इति। वस्तुतः वैवाहिके कार्यक्रमे समागताः समेऽपि स्वजनाः सम्मान्याः अतिथयः वराय वध्वै च

[1] स्वामी दयानन्द (1997) संस्कारविधिः, प्रका. सत्यधर्म प्रकाशन, गुरुकुल कंवरपुरा, गोरधनपुरा, कोटपुतली, जयपुर, राजस्थान, पृ. 138.

आशीर्वादप्रदानार्थमेवा-गच्छन्ति, न तु केवलं मिष्टान्नभोजनायेति भारतीया प्राचीना सामाजिकी परम्परा। नास्त्यत्र काचित् विमतिः।

कालक्रमेण वैवाहिके विधौ देशं कालं परिस्थितिं चानुसृत्य कतिचित् रूढयः अपि प्रचलिताः सन्ति। एताः रूढ्यः अपि स्वीयमेकं दर्शनं विदधति इत्यप्येकं तथ्यमस्ति। विद्वांसः तत् दर्शनं विमृश्य अस्माकं समक्षं प्रस्थापयन्ति। अस्यामेव परम्परायां गुजरातप्रदेशे प्रवर्तमानायाः एकायाः रूढ्याः समीक्षणमत्र प्रस्तूयते अस्माभिः।

अस्माकं गुर्जरप्रान्ते विवाहसंस्कारावसरे एका रूढी प्रवर्तते। सा च इत्थम्प्रकारिका। विवाह-संस्कारस्य समाप्तौ त्रयः वरपक्षीयाः महिलाः द्वे च कन्यापक्षीये महिले – एवं प्रायः पञ्चसंख्यकाः सौभाग्यवत्यः महिलाः विवाहमण्डपं समागत्य वधूललाटे तिलकं विधाय हस्तयोः अक्षतान् समर्प्य वधूकर्णे आशीर्वाद-वचनानि कथयन्ति। एषा रूढी सौभाग्यवतीकथनं नाम्ना प्रसिद्धा वर्तते[1]।

सा चेत्थं वर्णिता विधिपुस्तकेषु – अत्राचाराच्चतस्रः स्त्रियो मङ्गलं कुर्वन्ति। ब्रह्मसावित्र्योः सौभाग्यमस्तु। इन्द्र–इन्द्राण्योः सौभाग्यमस्तु। शिव-पार्वत्योः सौभाग्यमस्तु। लक्ष्मी-नारायणयोः सौभाग्यमस्तु। अन्ते च अखण्डसौभाग्यवती भव। पुत्रपौत्रवती भव॥ - इत्यादीनि सौभाग्यवचनानि कन्यायाः दक्षिणे कर्णे श्रावयन्ति[2]।

अस्यां क्रियायामाशीर्वचनान्युच्चैः नोच्यन्ते, अपितु मन्दस्वरेण वधूकर्णे उच्चार्यन्ते। अतः स्वाभाविकमेतद् यदेतानि आशीर्वचांसि केवलं वधूरेव श्रोतुं शक्नोति। विवाह-मण्डप-गताभिः महिलाभिः यदुच्चारितं तत्तूपस्थितैः जनैः श्रोतुं न शक्यते। परमाशीर्वादप्रदात्र्यः केन प्रकारेण एतां क्रियां कुर्वन्ति, तदुपस्थितैः सर्वैः जनैः द्रष्टुं तु शक्यते। अनेन दर्शनेन जनैः यानुभूतिः स्वमनसि कृता, तामनुसरन्तः जनाः इमं विधिं सौभाग्यवती-कथनमिति नाम्ना अद्यत्वे जानन्ति। अथ च काश्चित् महिलाः अस्मिन् प्रसङ्गे नवोढायै त्वमखण्डसौभाग्यवती भव – इति वाक्यमुच्चार्य अस्यै नवोढायै आशीर्वचांसि ददति।

वस्तुतः एताः आशीर्वाददात्र्यः महिलाः कामयन्ते यत् वधूरियं अखण्डसौभाग्यवती भवेत्। अतः तादृशमेव मनोगतमनेन वाक्येनेच्छन्त्यः आशीर्वचनं वदन्त्यः भवन्ति स्त्रियः। गच्छता कालेन साम्प्रतिके समाजे विवाहप्रसंगे वध्वै प्रदातुमिदमाशीर्वचनं प्रायः सर्वत्र प्रसिद्धिं गतमस्ति – अखण्डसौभाग्यवती भव – इति। अस्य वाक्यस्य वास्तविकः अर्थः कः? इति प्रश्ने अस्याः नवोढायाः सौभाग्यं सर्वथा अखण्डं स्यादिति प्राथमिकं तदुत्तरं भवति। अस्मिन्नेव क्रमे किं नाम सौभाग्यमिति प्रश्ने वरः इति सद्यः तदुत्तरं कल्पयन्ति जनाः।

---

[1] पण्ड्या, भगवतीप्रसाद (1971) लग्न एक संस्कार, प्रका. श्री बृहद् गुजरात संस्कृत परिषद्, अहमदाबाद, पृ. 61.

[2] तत्रैव, पृ. 50.

यतोहि पुराणादिषु बहुत्र पतिः नाम सौभाग्यमित्याशयानि वाक्यानि उपदिष्टानि सन्ति। तद्यथा ब्रह्मवैवस्वतपुराणे एकत्र –

दक्षकन्याः पतिं मुक्तं दृष्ट्वा च रुरुदुः पुनः।
आजग्मुः शरणं तातं दक्षं तेजस्विनां वरम्॥ (1.9.60)

इत्युक्त्वा दक्षकन्यानां मुखादिदमुच्चारितमस्ति -

स्वामिसौभाग्यलाभाय त्वमुक्तोऽस्माभिरेव च।
सौभाग्यमस्तु नस्तात गतः स्वामी गुणान्वितः॥ 62॥
स्थिते चक्षुषि हे तात दृष्टं ध्वान्तमयं जगत्।
विज्ञातमधुना स्त्रीणां पतिरेव हि लोचनम्॥ 63॥
पतिरेव गतिः स्त्रीणां पतिः प्राणाश्च सम्पदः।
धर्मार्थकाममोक्षाणां हेतुः सेतुर्भवार्णवे॥ 64॥
पतिः नारायणः स्त्रीणां व्रतं धर्मः सनातनः।
सर्वं कर्म वृथा तासां स्वामिनां विमुखाश्च याः॥ 65॥ इत्यादि[1]॥

एतेन श्रुतेन संस्कारेण जनानां मनसि प्रायः अस्य वाक्यस्यायमाशयो दृढतया स्थिरो भवति यत् – हे कन्ये !

त्वदीयं वरनामकं सौभाग्यम् अखण्डं स्यादिति॥

अर्थात् वरः एव तव सौभाग्यमस्ति, तच्च वरः नाम सौभाग्यं कदापि खण्डितं न भवेदिति। एवं सति परोक्षतः तात्पर्यतो वास्य वाक्यस्याशयः जनानां मनसि प्रतिभासमानमस्ति यत् - वरे दिवंगते वध्वाः सौभाग्यं खण्डितं भवतीति। लोके प्रायः इयमेव मान्यता प्रचलिता अस्ति। अथ चात्रेदमपि स्मृतिपथमायाति यत् – या कन्या भवति सा सौभाग्यकाङ्क्षिणी कथ्यते। अस्मिन् कथनेऽपि सौभाग्यशब्दास्याशयो वर एवेति प्रतिभाति। यतोहि कन्या वरमेव काङ्क्षतीति प्रसिद्धमेव। परन्तु यद्येतदेवास्याशीर्वचनस्य तात्पर्यं चेत् महती हानिः दृश्यते निराशा चानन्ता समुत्पद्यते। यतोह्यत्र त्रयो दोषाः दृष्टिपथमायान्ति। तद्यथा –

1. उपरि चर्चितार्थानुसारमस्य आशीर्वचनस्य आशयः विचार्यते चेदेषा अर्थप्रतीतिः भवति यत् - कन्या हि प्रथमं मृत्यं वरयेत्। वरः तावत् पर्यन्तं जीवतु यावत्पर्यन्तं कन्या मृत्युं न प्राप्नोति। यतोहि जीविते वरे कन्या दिवं गच्छति तदैव सा अखण्डसौभाग्यवती प्रवर्तेत, नान्यथा। एवं सति को नाम विचारशीलः जनः शुभे

[1] ब्रह्मवैवर्तपुराणम्, 1.9.60 प्रका. गीता प्रेस, गोरखपुर, पञ्चदशं पुनर्मुद्रितं संस्करणम्, वि.सं. 2071.

विवाहावसरे आनन्दप्रदे प्रसङ्गेऽस्मिन् मनसि मृत्युं स्मरन्नेतादृशमाशीर्वचन-मुच्चारयेत्। अतोऽस्याशीर्वचनस्यैतादृशोऽर्थः कदाचिदपि यथार्थो न प्रतीयते।

अथ च 2. वयसि प्रायः कन्या कनिष्ठा भवति वरः च वयसि ज्येष्ठो भवतीति प्रायः सार्वत्रिकम् तथ्यम्। सुश्रुतादयो ग्रन्थाः वरस्य कन्यायाः वयोविषयमित्थं प्रस्थापयन्ति। यथा –

पञ्चविंशे ततो वर्षे पुमान्नारी तु षोडशे।
समात्वागतवीर्यौ तौ जानियात् कुशलो भिषक्॥
ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते[1]॥

एतस्मिन् आयुर्वैदिके ग्रन्थे यादृशमुपदिष्टमस्ति तत्र वरस्य वयः अधिकं कन्यायाः वयः न्यूनम् भवेदिति स्वीकृतो नियमः स्पष्टतया द्रष्टुं शक्यते। एतस्मात् कारणाद् यदि स्वाभाविकतया विचार्यते चेद् गच्छता कालेनाधिकमायुः वरस्य भवतीति कृत्वा वयस्तो वृद्धत्वं ततो जीवनान्तः प्रायः वरस्यैव प्रथमो भवेत्। एवं स्थिते यदि वरस्य दिवं प्रति गमनं प्रथमं भवति, तदा तु कन्यायाः सौभाग्यं खण्डितं भवेदेवेति भविष्यं परिकल्पितुं शक्यते। अस्यां स्थितौ उपर्युक्तस्याशीर्वादस्य किमपि प्रयोजनमेव न प्रतीयते। अत एतादृशोऽर्थः यैः खलु कैश्चित् जनैः परिकल्पितोऽस्ति, सः प्रथमायां दृष्टौ सम्यगुचितं च न प्रतीयते।

अपि च 3. यदा आशीर्वादः दीयते तदा कन्या कन्या नास्ति, वरः वरः नास्ति, अपितु उभावपि विवाहसंस्कारेण संस्कृतौ सन्तौ विवाहमण्डपे दम्पतीत्वेन स्थितौ भवतः। अतः भवतु नाम आशीर्वादः कन्यायै प्रदीयते, परन्तु वस्तुतस्तु एष आशीर्वादः यदा दम्पत्यर्थं भवेत्तदैव न्यायसंगतो भवति। केवलं कन्यायै प्रदीयमानः आशीर्वादः कथमपि न्यायसंगतो न भवेत्। अस्यां परिस्थितावाशीर्वादे उभयोरखण्डसौभाग्यता संनिहिता भवेत्, न तु केवलं कन्यायाः, तदेव न्यायसंगतं स्यात्। अतः एतस्मात् कारणादप्युपर्युक्तः वाक्यार्थः समीचीनः न प्रतिभाति।

एवं विचार्यमाणे सति अखण्डसौभाग्यवती भव – इत्यस्य उपर्युपर्युक्तस्य वाक्यस्योपरि चर्चितः लोके प्रसिद्धं गतो वाक्यार्थः वाक्याशयः वा केनापि प्रकारेण समुचितः न प्रतिभाति कस्यचिदपि विचारशीलस्य जनस्य। न चैतादृशः कश्चित् अरुचिकरो भावोऽत्र निहितोऽस्ति विचारपथमायाति विचारः विचारशीलस्य जनस्य।

---

[1] सुश्रुतसंहिता, शरीरस्थानम्, (आयुर्वेदरहस्य-दीपिकाख्याटीकासहितम्) सम्पादकः - गोविन्द घाणेकरः, प्रकाशकः – मोतीलाल बनीरसी दास, वाराणसी, 10. 46-47।

तर्हि कोऽस्यार्थः किं चास्याशीर्वचनस्य तात्पर्यमिति जिज्ञासा समुत्पद्यते। अस्याः जिज्ञासायाः समाधानाय अस्मत्परिकल्पितोऽर्थः वाक्यस्यास्य तात्पर्यं वास्माभिरत्र प्रस्तूयते। तद्यथा -

प्रत्येकं मानवः स्वीये जीवने प्रतिक्षणं यत् यत् सुखात्मकं यत्किमप्यनुभवति, तत्सर्वं सौभाग्यमेवास्ति तत्तज्जनस्य। एवं मानवे जीवने बहूनि सौभाग्यानि सन्ति। यथासमयं च मानवेन तानि प्राप्यन्ते। क्वचित् पुरुषार्थेण क्वचित् च प्रारब्धवशात्। इति विदितचरमेव विचारशीलानाम्। अस्यायमाशयः यत् यः कोऽपि मानवः स्यात्, स्त्रीजनः स्यात् पुरुषजनो वा स्यात्, स्वीये जीवने यत् यत् सुखं प्राप्नोति, तत् तत् सर्वमपि सुखं तस्य सौभाग्यमेव भवति।

अस्यामेव परम्परायां विचार्यते चेत् वास्तविकी प्रतीतिर्भवति यत् नारीजनस्य कृते केवलं वर एव सौभाग्यं नास्ति, अपितु तदतिरिक्तमपि नैकवस्तुजातं सौभाग्यं भवतीति प्रथमं तथ्यम्। अत्र द्वितीयं तथ्यमस्ति यत् मानवजीवने यानि सौभाग्यानि प्राप्तानि भवन्ति, तानि सर्वाणि प्रायः खण्डिताखण्डितरूपेण द्विप्रकारकाणि भवन्ति।

अत्र कानि चेमानीति प्रश्ने तस्योत्तरं भवति – यत् सौभाग्यमस्माकं पूर्वजैः पूर्वं सुदूरे भूतकाले प्राप्तम्, अद्य चास्माभिः प्राप्यते, सुदूरे भविष्यति च जनिष्यमाणानामस्माकं वंशजानां कृतेऽपि यत् प्राप्स्यते, तत् सौभाग्यमखण्डितं सौभाग्यं (अखण्डसौभाग्यं वा) भवतीति वास्तविकं तथ्यम्॥

यच्च सौभाग्यमस्माकं पूर्वजैः पूर्वं सुदूरे भूतकाले न प्राप्तम्, परमद्य तु अस्माभिः प्राप्यते, सुदूरे भविष्यति जनिष्यमाणानामस्माकं वंशजानां कृते तत् प्राप्स्यते न वेति निश्चयो नास्ति, तादृशं निखिलमपि सौभाग्यजातं खण्डितं सौभाग्यं (खण्डसौभाग्यम्) वर्तते।

उदाहरणरूपेण अत्र कतिपयानामेतादृशानां खण्डसौभाग्यानामखण्डसौभाग्यानां च विषये सोदाहरणं विमर्शं कुर्मः। अद्यतने समाजे स्लाईसनाम्ना प्रसिद्धमेकमाम्रफलस्वादयुक्तं किञ्चित् पेयमुपलब्धमस्ति। तस्य पानस्य यदावासरः प्राप्यते, तदा तेन सुखमनुभूयते। एतदप्यस्माकमेकं सौभाग्यमस्ति। परन्त्वेतदस्माकं सौभाग्यं खण्डितं सौभाग्यमस्ति, न त्वखण्डितं सौभाग्यम्। यतोहि भवतु नाम इदं स्लाईसनाम्ना प्रसिद्धं पेयमस्माकं कृते साम्प्रतिके काले उपलब्धमस्ति, वयं तत् पीत्वा सौभाग्यमनुभवामः, परन्त्वस्य पेयस्य अस्माकं पूर्वजैः सुदूरे भूतकाले कदाप्येतस्य रसपानं न कृतमिति वयं सम्यक् जानीमहे। अथ च सुदूरे भविष्यति जनिष्यमाणानामस्माकं वंशजानां कृतेऽप्येतत् प्राप्स्यते एव इत्यपि अद्य वयं निश्चयेन कथयितुं न शक्नुमः। एवमद्यत्वे सुप्राप्यं पुराकाले भविष्यति चाप्राप्तं स्लाईसपेयं सौभाग्यं सदपि खण्डितं सौभाग्यमेवास्ति न त्वखण्डितं सौभाग्यम्।

परन्तु यदा वयमाम्रफलानां रसास्वादनं कुर्मः तदा तदस्माकमखण्डितं सौभाग्यमस्ति। यतोहि अस्याम्ररसस्यास्वादनं नाम सौभाग्यमस्माकं पूर्वजैः सुदूरे भूतकालेऽप्यनुभूतम्, अद्य अस्माभिः अनुभूयते, सुदूरे भविष्यति जनिष्यमाणानामस्माकं वंशजानां कृतेऽपितदवश्यं प्राप्यं भविष्यतीति सम्प्रति वयं सनिश्चयं कथयितुं शक्नुमः। यावत्पर्यन्तं पृथ्वी स्थिरा अस्ति, तावत्पर्यन्तमाम्रफलानामस्तित्वं तस्य रसानुभूतेश्चावसरो भविष्यतीति विचारदृशा आम्ररसपानरूपं सौभाग्यमखण्डं सौभाग्यं कथ्यते।

एवमेव चायपानस्य यदा अस्माकं कृते अवसरः प्राप्यते तदा तदप्येकमस्माकं सौभाग्यमेव। परन्तु तत्सौभाग्यं खण्डितमेवास्ति। यतोह्येतत्पेयमस्माकं पूर्वजैः न पीतम्, न च सुदूरे भविष्यति जनिष्यमाणाः अस्माकं वंशजाः एतदनिवार्यतया पेयरूपेण प्राप्स्यन्त एवेत्यपि सम्प्रति निश्चयेन कथयितुं न शक्यते। एवमद्यत्वे अस्माभिः यत् चायपानं क्रियते तत् सौभाग्यमस्ति खलु, परं तदखण्डं सौभाग्यं नास्ति। परन्तु यदा वयं गवां दुग्धं पिबामः, तदा तद् गोदुग्धपानरूपं सौभाग्यमखण्डसौभाग्यमस्ति। यतोहि गवां दुग्धमस्माकं पूर्वजैः सुदूरे भूतकालेऽपि पीतम्, अद्यास्माभिरपि पीयते, सुदूरे भविष्यति च जनिष्यमाणाः अस्माकं वंशजाः अप्येतस्य पानं करिष्यन्तीति निश्चयेन कथयितुं शक्यते।

अनया रीत्या बहुविधानां सौभाग्यानां विषये विचारः कर्तुं शक्यते। अत्र कतिपयान्यन्यानि दृश्यानि आकारयित्वा तानि सम्प्रदर्श्य विषयोऽयं दृढमूलः क्रियते।

1. रात्रौ स्वीये सदने विद्युद्दीपेन तमोनाशनं खण्डितं सौभाग्यमस्ति, परन्तु शिखादीपेन तमोनाशनमखण्डसौभाग्यम्।

2. खनिज-ज्वलनैः (पेट्रोल-डिझल-कूकिंगगेसादिभ्यः) ओदनादीनां पाचनं खण्डितं सौभाग्यम्, परन्तु काष्ट-गोमयखण्डादिना पाचनं अखण्डसौभाग्यमस्ति।

3. कार-वायु-जलादियानेन गमनं खण्डितं सौभाग्यमस्ति, परन्तु घोटकादिपशुसहयोगेन गमनं अखण्डसौभाग्यं भवति।

4. चाय-कोफी-पानादिना अभ्यागतस्य स्वागतीकरणं खण्डितं सौभाग्यं भवति, परन्तु गोदुग्धेन मधुपर्केण वा अभ्यागतस्य स्वागतीकरणं अखण्डसौभाग्यं भवति।

अनेन प्रकारेण सूक्ष्मदृष्ट्या विचार्यते चेदनेनैकेनैवाशीर्वचनेन विवाहसंस्कारेण संस्कृताय वरवधूयुगलाय बहुजातमुपदिष्टमस्ति अस्मत्पूर्वजैः। वैवाहितैः मानवैः किं किं करणीयं किं किं न करणीयं, केन प्रकारेण व्यवहर्तव्यम् केन प्रकारेण च न व्यवहर्तव्यम् – इत्यादिकं सर्वमपि कर्तव्यजातमस्मिन् आशीर्वादवचने निहितं सत् तद्द्रष्टुं शक्यते।

किं तमाखुनाम प्रसिद्धस्य पदार्थस्य सेवनं करणीयं न वेति प्रश्ने अखण्डसौभाग्यवती भव – इति आशीर्वचने निहितं सम्यगुत्तरं मिलति। यतोहि वयमखण्डस्य सौभाग्यस्य पक्षधराः स्मः इतिकृत्वा यदि अस्माकं सर्वैः पूर्वजैः तमाखुनाम पदार्थस्य सेवनं कृतमस्ति चेदस्माभिरपि करणीयम्, नान्यथा। वयं पश्यामः यद्वंशाद्वंशं यावन्न कुत्रापि तमाखुसेवनस्य परम्परा प्रचलिता सती स्थिरा दृश्यते मानवसमाजे। केनचित् कारणेन ये केचन जनाः तमाखुसेवनं स्वकीयं सौभाग्यं मनुते, ते गच्छता कालेन तद्दोषेण दूषिताः सन्तः स्ववंशे जनिष्यमाणानन्यानुजान् तस्माद्वारयन्ति। अतो येऽद्य तमाखुसेवनं स्वकीयं सौभाग्यं मनुते, तेषां कृतेऽप्येतत् खण्डितमेव सौभाग्यमस्ति, न त्वखण्डसौभाग्यम्। अखण्डसौभाग्यं तु तमाखुनाम पदार्थस्य भक्षणे न, अपितु औषधादिरूपेण तस्य प्रयोगे प्रवर्तते इति सारः।

वस्तुतोऽस्माकं पूर्वजैः ऋषिभिः मुनिभिः च नवयुगलायाशीर्वादप्रदानावसरे उच्चार्यमाणस्यास्य (अखण्डसौभाग्यवती भव – इत्यस्य) बहुविचारपूर्वकं प्रचलनं कृतमस्ति। अस्मिन्नाशीर्वचनवाक्ये एकं सुदृढं दर्शनं निहितमस्ति। तस्य च दर्शनस्यानुरूपां सामाजिकव्यवस्थां कर्तुमस्माकं पूर्वजाः अस्मान् प्रेरितवन्तः बोधितवन्तश्च। ते विचारितवन्तः यत् मानवावतारेणावतरितः प्रत्येकं जीवात्मा स्वीये जीवने भवतु नाम खण्डितानां सौभाग्यानां भोक्ता भवेदथवा नापि भवेत् प्रसङ्गतः, तथापि सः अनिवार्यतया अखण्डितानां सौभाग्यानां भोक्ता तु भवेदेव। प्रत्येकं काले प्रत्येकं देशे प्रत्येकं समाजे एतादृशी सामाजिकी व्यवस्था निरन्तरं साधनीया। एतादृशी सामाजिकी व्यवस्था अस्माकं भारतीयानां वैदिकानां वा संस्कृतिरस्ति।

एतां संस्कृतिमनुसरत् नववधूयुगलं स्वीये गार्हस्थे जीवने सर्वदाखण्डं सौभाग्यमेवेच्छति, न तु खण्डितं सौभाग्यम्। प्रसङ्गतः प्राप्तं खण्डितं सौभाग्यमनुभवन्तः वैदिकाः भारतीयाः जनाः कदाचिदपि अखण्डसौभाग्याद् न विरमन्ति, न चास्मात् पराजयन्ते। स्वीये वंशेपि एतादृशी स्थितिः सर्वदा प्रचलिता प्रस्थापिता भवेदिति कामनां कुर्वन्तः जीवनं यापयन्ति। एवं प्रकारेण उपर्युक्तस्याशीर्वचनस्य वाक्यार्थः विचार्यते चेत् कन्यायाः पूर्वं मृत्युः भवतु इत्यात्मकस्य निरर्थकस्य आशीर्वादस्य स्वयमेव परिहारो भवति। यदि कदाचिद् वरस्य दिवंगमनं प्रथमं भवति तदाप्यस्याशीर्वादस्य सार्थकत्वं प्रस्थापितमेव भवति। कन्यायै दीयमानस्यास्य आशीर्वादस्य वर-वधू-रूपोभयप्रयोजनमूलकत्वम् च फलितं भवति, सर्वे च पूर्वोत्पादिताः त्रयोऽपि दोषाः दूरे भवन्ति।

यद्येवं न विचार्यते चेदस्य अखण्डसौभाग्यवती भवेति प्रसिद्धस्याशीर्वचनस्य सार्थकता न कथमपि स्थापयितुं शक्यते, इत्यलं बुद्धिमद्वर्येषु॥

सन्दर्भग्रन्थसूचिः

1. आचार्य सुश्रुत, (1975) सुश्रुतसंहिता, शरीरस्थानम्, आयुर्वेदरहस्य-दीपिकाख्याटीका-सहितम्, सम्पादकः गोविन्द घाणोकरः, प्रकाशकः – मोतीलाल बनीरसी दास, वाराणसी.

2. पण्ड्या, भगवतीप्रसाद (1971) लग्न एक संस्कार, प्रका. श्री बृहद् गुजरात संस्कृत परिषद्, अहमदाबाद

3. व्यास मुनि, ब्रह्मवैवर्तपुराणम्, प्रका. गीता प्रेस, गोरखपुर, पञ्चदशं पुनर्मुद्रितं संस्करणम्, वि.सं. 2071.

4. स्वामी दयानन्द (1997) संस्कारविधिः, प्रका. सत्यधर्म प्रकाशन, गुरुकुल कंवरपुरा, गोरधनपुरा, कोटपुतली, जयपुर, राजस्थान.

Author's Detail

Name : Prof. Kamleshkumar C. Chokashi
Designation : Professor, Dept. of Sanskrit
भाषासाहित्यभवनम्, गुजरात विश्वविद्यालयः
Address : 24B, Veeranagar Society
नवा वाडज रोड, अहमदाबाद – 380013 (गुजरात)
Email : kamleshc24@yahoo.co.in

****

अद्वैतप्रतिपादक प्रतीकात्मक नाटक तथा भावनात्मक बुद्धिमत्ता

Ankita Srivastava

शोधसार

संस्कृत साहित्य में दार्शनिक सिद्धान्तों के सामान्य जनों तक प्रचार एवं प्रसार हेतु प्रतीकात्मक नाटकों का प्रादुर्भाव हुआ। ये प्रतीकात्मक नाटक भिन्न भिन्न काल में पृथक् पृथक् दर्शनों को आधृत कर लिखे गये, जिनमें प्रामाणिकतया प्रबोधचन्द्रोदय को प्रथम नाटक माना जाता है जिसकी रचना ग्यारहवीं शताब्दी में कृष्ण मिश्र यति ने की थी। इन नाटकों का क्रम मुख्यतः ग्यारहवीं शताब्दी से अठारहवीं शताब्दी पर्यन्त माना जाता है। प्रबोधचन्द्रोदय तथा स्वानुभूति–नाटकम्, ये दोनों ही ग्रन्थ अद्वैत–मन्तव्यों के प्रतिपादनार्थ पृथक् पृथक् शैली में रचित हैं, जिनमें प्रबोधचन्द्रोदय विशुद्ध नाटकीय गुणों में निर्मित है जबकि स्वानुभूति–नाटकम् में शास्त्र–चर्चा मुख्य बिन्दु है।

कुञ्जीशब्द – संवेग, आत्मबोध, प्रतीकात्मक नाटक, संतुलन।

****

शोधोद्देश्य –

भावनात्मक बुद्धिमत्ता अथवा Emotional Intelligence, मनोविज्ञान का प्रमुख सिद्धान्त है जिसे सामान्य बुद्धिलब्धि से अधिक महत्त्वपूर्ण माना गया है। प्रतीकात्मक नाटकों का मुख्य कथानक भी संवेगों के सकारात्मक एवं नकारात्मक पक्षों का उद्घाटन करता है, जिसमें भावनात्मक बुद्धिमत्ता को भारतीय परिप्रेक्ष्य में समझना अन्वेषणीय है। भारतीय अद्वैतिक परम्परा किस प्रकार से भावनाओं का सूक्ष्म विश्लेषण प्रस्तुत करती है तथा किस प्रकार से सांवेगिक सन्तुलन स्थापित किया जाना चाहिए, यह सभी प्रस्तुत शोधपत्र में अन्वेषण के केन्द्र बिन्दु हैं।

भावनात्मक बुद्धिमत्ता –

डेनियल गोलमैन को भावनात्मक बुद्धिमत्ता का जनक माना जाता है। उन्होने अपनी पुस्तक "इमोशनल् इंटेलीजेंस्" में भावनात्मक बुद्धिमत्ता के पाँच घटक माने हैं –

१. आत्म–जागरूकता
२. स्व–विनिमयन
३. प्रेरणा
४. समानुभूति
५. सामाजिक कौशल

बुद्धिलब्धि को एक जन्मजात गुण माना जाता है, जिसे अर्जित नहीं किया जा सकता जबकि सांवेगिक बुद्धिमत्ता जन्मजात भी हो सकती है तथा उसे अर्जित एवं संवर्धित भी किया जा सकता है। अद्वैत वेदान्त भावों को साधकर एक नियन्त्रित तथा सन्तुलित जीवन–शैली के विकास के विज्ञान का पोषक है। मन के स्वस्थ होने पर ही आत्मा अपनी प्रकृति (परमात्मभाव) को प्राप्त कर सकता है[1]।

१. आत्म–जागरूकता –

अद्वैत वेदान्त का प्रमुख लक्ष्य है आत्म–बोध। प्रबोधचन्द्रोदय में मानसिक स्थितियों का सूक्ष्म विश्लेषण किया गया है, जहाँ संवेगों को नाटकीय पात्रों के रूप में प्रतीक रूप से दर्शाया गया है। आत्म–जागरूकता हेतु कृष्ण मिश्र ने विवेक शक्ति के द्वारा औपनिषदिक चिन्तन को धारण करना आवश्यक माना है। विवेक भावनाओं की सकारात्मकता एवं नकारात्मकता में भेदक शक्ति है जो मानव जीवन में भावनात्मक संतुलन हेतु अनिवार्य है। प्रस्तुत नाटक में मन के दो पक्ष बताए गये हैं –

प्रवृत्तिपरक भाव	निवृत्तिपरक भाव
मोह	विवेक
काम	वस्तुविचार
लोभ	सन्तोष
तृष्णा	शान्ति
क्रोध	क्षमा
हिंसा	भक्ति, करुणा
दम्भ	मैत्री
अहंकार	श्रद्धा

प्रवृत्तिपरक मानसिक वृत्तियाँ विकट दुख का कारण हैं जबकि निवृत्तिपरक मानसिक गुण मनुष्य को आत्मबोध की ओर ले जाते हैं। इसी प्रकार स्वानुभूति-नाटकम् में भी अद्वैतपथानुगामी पण्डित के द्वारा आत्मबोध को ही सर्वश्रेष्ठ बोध के रूप मे प्रतिष्ठित किया गया है। तर्कप्रधान मानव को वह शब्दप्रमाण (शास्त्रवचन) के आधार पर सर्वोच्च सत्ता का भान कराते हैं। तृतीय अंक में वर्णित दृष्टि–सृष्टि वाद, ज्ञान के

[1] ...तूष्णीमालम्बसे चेत्कथमपि वितता वत्स सहृदय वृत्तीर्भात्यादर्शे प्रसन्ने रविरिव सहजानन्दसान्द्रस्तदात्मा॥३३॥ प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २३१, पद्य ३३॥

सोपान तथा जीवनमुक्ति के सिद्धान्तों के माध्यम से माया और ब्रह्म की असत्ता एवं सत्ता का निर्धारण आत्मबोध को सशक्त बनाता है। वीर पुरुषों को भी आत्मज्ञान में प्रवृत्त होना ही चाहिए। वीरता के कार्यों में निरत पुरुष की आत्मशान्ति में प्रवृत्ति के कारण को बताते हुए कृष्ण मिश्र कहते हैं – "वीरता आदि उत्तेजक चित्त के विकार हैं, वस्तुतः वह ब्रह्मतेज (आत्मा) शान्त स्वभाव वाला है, सांसारिक कृत्यों के निवृत्त होने पर वह पुनः अविद्यातत्कार्यादिदोषशून्य अमल स्वरूप का अवलम्बन कर लेता है"[1]। उदाहरण स्वरूप प्रलयकाल में समुद्र अपनी स्वाभाविक निश्चलता को त्यागकर समस्त पर्वतसमूहों को लांघ जाता है तथा पुनः सृष्टिकाल में वह निश्चल हो जाता है[2] एवं परशुराम ने भी पृथ्वी के भार को कम करने के लिए अपने पराक्रम से क्षत्रिय वंश का संहार कर क्रोधाग्नि को शान्त कर तपस्या हेतु शान्ति का आश्रयण कर लिया था[3]। विवेक आत्मजागरूकता हेतु प्रमुख गुण है क्यूँकि प्रबोधचन्द्रोदय में विवेक को आत्मा का सूक्ष्मतम ज्ञान प्राप्त है, उसके अनुसार सम्पूर्ण गुणों से युक्त होता हुआ भी पुरुष स्त्रियों द्वारा छले जाने पर स्वाभाविक धैर्य को छोड़ देता है, इसीलिए स्वयं परमात्मा भी अविद्या के संसर्ग से पुमान् (पुरुष) कहलाने लगे हैं[4]। विचार की आत्मबोध में अनिवार्य भूमिका है क्यूँकि अविचारदशा तक ही माया की अवस्थिति है, विचारदशा में ब्रह्म की माया से संगति नहीं होती अतः पुरुष आत्मावस्थित होता है।[5] विचारों की दृढता मै में तर्क सहायक हैं, तर्कों के द्वारा ही विषयों का पूर्ण त्याग निश्चित है[6]। आत्मबोध की प्रक्रिया को क्रमशः बताते हुए विवेक कहता है कि एषोऽस्मि एवं नेति इत्यादि पदों के द्वारा अध्यारोप एवं अपवाद से ब्रह्म और जीव के वास्तविक सम्बन्ध को जान लेने पर तत्त्वमसि वाक्य में निहित चिदात्मा और जीवात्मा का परिज्ञान होता है जिससे तत्त्वमसि इस वाक्य को सुनने पर अन्तःकरण में प्रतिफलित होता हुआ जीव संसार तमोनिवर्तक शान्त अनन्त स्वस्वरूप प्रकाश तेजोरूप में प्रकाशित होता है अर्थात् वह आत्मनिष्ठ हो जाता है[7]। स्वानुभूति नाटक में भी अद्वैत भाव के स्थापन हेतु तारक मन्त्र का उल्लेख मिलता है जिसमें भगवान् शिव के द्वारा मरणासन्न व्यक्तियों के कानों में

---

[1] आर्ये, निसर्गसौम्यमेव ब्राह्मं ज्योतिः कुतोऽपि कारणात्प्राप्तविकारमपि पुनः स्वभावमेवावतिष्ठते। प्रबोधचन्द्रोदय, पृ० १४, प्रथम अंक।

[2] कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः। स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः॥ ६॥ प्रबोधचन्द्रोदय, प्रथम अंक, पद्य ६, पृ० १५॥

[3] सोऽपि स्ववीर्यादवतार्य भारं भूमेः समुत्खाय कुलं नृपाणाम्। प्रशान्तकोपज्वलनस्तपोभिः श्रीमान्मुनिः शाम्यति जामदग्न्यः॥८॥ प्रबोधचन्द्रोदय, प्रथम अंक, पद्य ८, पृ० १७॥

[4] .....स्वयमपि यतो मायासङ्गात्पुमानिति विश्रुतः॥२५॥ प्रबोधचन्द्रोदय, प्रथम अंक, पृ० ४१, पद्य २५॥

[5] .....प्रभवति तथाऽप्येषा पुंसो विधातुमधीरताम्॥२६॥ प्रबोधचन्द्रोदय, प्रथम अंक, पृ० ४२, पद्य २६॥

[6] प्रबोधचन्द्रोदय, षष्ठ अंक, पृ० २४१।

[7] प्रबोधचन्द्रोदय, षष्ठ अंक, पृ० २७१, पद्य २७।

"सर्वं चिदेव" ऐसा उपदेश किया जा रहा था[1]। आत्मबोध सांसारिक दृष्टि से सम्पन्न मनुष्य के लिए भी समान रूप से आवश्यक है यथा - अतुलनीय वाक्-सम्पदा तथा धन-धान्य से युक्त मनुष्य के लिये भी बिना आत्मबोध के बिना यह संसार सुखरहित कष्टमय कारागार के समान हो जाता है[2]। अतः उपर्युक्त दोनों ही नाटक मनोरंजक शैली में आत्मजागरूकता के प्रधान प्रतिपादक रहे हैं।

२. स्व–विनिमयन –

स्व का नियन्त्रीकरण भावनात्मक सशक्तता हेतु अनिवार्य पक्ष है। स्वविनिमयन के स्वामी सर्वप्रियानन्द[3] ने तीन प्रमुख विभाग निर्धारित किए हैं – १. श्रद्धा, २. त्रिमार्ग (ज्ञान, कर्म एवं भक्ति), ३. एकाग्रता।

(अ) श्रद्धा – स्वयं में विश्वास होना ही श्रद्धा है, जैसा कि स्वामी विवेकानन्द ने कहा है कि स्वयं में विश्वास न रखने वाला ही नास्तिक है। भगवद्गीता में भी श्रद्धावाँल्लभते ज्ञानं[4] कहकर श्रद्धा को प्रारम्भिक गुण माना गया है। प्रबोधचन्द्रोदय में श्रद्धा एक स्त्री पात्र है जो विवेक की मोहपक्ष को जीतने में सहायता करती है। श्रद्धा को तीन भागों में विभक्त किया जा सकता है – १. आत्म–प्रभावकारिता, २. आत्म-दायित्व, ३. आत्मदिशा। इन तीनों का ही निर्धारण प्रस्तुत नाटकों में पूर्णतः परिलक्षित होता है।



(ब) त्रिमार्ग (Three H) –

प्रस्तुत नाटकों में ज्ञान, भक्ति एवं कर्म का समन्वय वर्णित है, जिससे आत्मनियन्त्रण का मार्ग प्रशस्त होता है। प्रबोधचन्द्रोदय में मोहनाश रूपी कर्म के द्वारा विष्णुभक्ति की सहायता से आत्मज्ञान की प्राप्ति होती है तथा स्वानुभूतिनाटक में शास्त्रचर्चा रूपी कर्म के द्वारा शिवभक्ति की सहायता से आत्मबोध होता है।

---

[1] प्रबोधचन्द्रोदय, प्रथम अंक, पद्य १३, पृ० १४।

[2] ....विना स्वात्मारामोत्कटपरिचितिं नैव लभते सुखं कारागाराधिकविषमसंसारसदने॥ १६॥ – स्वानुभूतिनाटकम्, प्रथम अंक, पद्य १६, पृ० १८॥

[3] Self Management : Modern Positive Psychology & Ancient Wisdom by Swami Sarvapriyanandaji, 9 October, 2018, https://youtu.be/5aSK5PdETAI .

[4] गीता, ४/३९।

ज्ञान(Head) भक्ति(Heart)

कर्म(Hand)

ज्ञान (Head, बुद्धि) –

प्रबोधचन्द्रोदय में विवेक एवं मति स्वविषयक ज्ञान से परिपूर्ण हैं, अतः उन्हें ज्ञात है कि उपनिषद् के विवेकपूर्ण अध्ययन से ही प्रबोध (स्वाभाविक ज्ञान) की उत्पत्ति सम्भव है।[1] काम विवेक का प्रबल शत्रु है, अतः काम पर वस्तुविचार के द्वारा विजय प्राप्त करना चाहिए यथा - स्त्रियों में अनासक्ति रखकर, परिणाम में उनकी नीरसता और शरीर की बीभत्सता का बारम्बार अनुचिंतन करने से उसे जीता जा सकता है [2]। नारी को ही काम का प्रधान अस्त्र माना गया है अतः उसके प्रति अनासक्त होना ही मुख्य उपाय है। कृष्ण मिश्र इसी अनासक्ति हेतु उपाय बताते हुए कहते हैं कि "प्रशस्त तटप्रदेश वाली नदियाँ, नितान्त बहते झरनों से चिकनी शिलाओं वाले पर्वत, घने वृक्षों वाली वनस्थलियाँ, व्यासप्रोक्त शान्तिप्रतिपादक वचन, और तत्त्व–ज्ञानियों की संगति यदि है तो कहाँ स्त्रियाँ और कहाँ कामदेव"[3]। सर्वविदित है कि ज्ञानी के मन में विकल्पों का नाश हो जाता है केवल संकल्प ही शेष रहता है तथा यह संकल्प ही वैराग्य को जन्म देता है। वैराग्य स्वमत का प्रतिपादन करते हुए कहता है कि, "मार्ग का पथिक से, तटीय वृक्षों का बहती हुई नदी से, आकाश का मेघ से और समुद्र का पोतवणिजों से जैसा संयोग और वियोग होता है उसी प्रकार पिता, माता, सन्तान, मित्रादि का भी संयोग और वियोग दोनों निश्चित है। अतः विद्वानों को इस विषय में शोक नहीं करना चाहिए"[4]। जिस प्रकार केवल मिट्टी का ज्ञान होने से घडे को प्रथम बार देखने वाले व्यक्ति को भी घडे की मृत्प्रकृति का ज्ञान सामान्यतया हो जाता है उसी प्रकार आत्मा के ज्ञान से अन्य सभी में उसकी उपस्थिति का ज्ञान निश्चित ही होता है।[5] अद्वैत ही समस्त दुःखों का नाशक है क्योंकि भेद ही दुःख की उत्पत्ति का प्रमुख कारण है, अतः भेद से रहित जो ज्ञानी सर्वत्र अभेद देखता है, वही सुखी है[6]।

---

[1] मानिन्याश्चिरविप्रयोगजनितासूयाकुलाया भवेच्छान्त्यादेरनुकूलनादुपनिषद्देव्या मया संगमः... प्रबोधचन्द्रोदय, प्रथम अंक, पृ० ४९, पद्य ३०

[2]प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १६९, पद्य ११।

[3]प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १७०, पद्य १२।

[4]प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २२४, पद्य २५।

[5] ...तस्मिन् विज्ञातमात्रे भवति तदखिलं ज्ञातमेवेह सद्यो मृत्पिण्डज्ञानमात्रादिव जगति सुखं मृन्मयं सर्वमेव॥१८॥ स्वानुभूति नाटकम्, प्रथम अंक, पद्य १८॥

[6] ... विधायचास्यैव यदात्मभावस्तदा न कश्चित्खलु शोकलेषः॥३३॥ स्वानुभूति नाटकम्, प्रथम अंक, पद्य ३३, पृ० २८॥

भावना (Heart, हृदय) –

भाव कर्मों के सत् एवं असत् होने का निर्धारण करते हैं, उनकी निर्मलता मानसिक उन्नति में प्रभावी कारक है। भक्ति को भारतीय मनीषियों द्वारा सर्वोत्कृष्ट भाव माना गया है। कृष्ण मिश्र द्वारा प्रबोध की उत्पत्ति का मुख्य कारण विष्णुभक्ति को बताया गया है[1]। क्षमा भावना विवेकराज की सहायक है जो उसकी क्रोध रूपी शत्रु से रक्षा करती है अतः क्रोध पर नियन्त्रण हेतु क्षमा मुख्य उपाय है। क्रोध को वश में करने से हिंसा, कठोरता, मान, मात्सर्यादि का स्वतः नाश हो जाता है। "न वाणी को कष्ट होता है, न शिर में पीड़ा होती है, न तो मन सन्तप्त रहता है, और न ही शरीर को चोट आदि लगती है, न हिंसादि अनर्थों से योग होता है, अतः क्षमा के गुण प्रशंसनीय हैं"[2]। लोभ पर सन्तोष द्वारा नियन्त्रण करना चाहिए यथा – ....."सन्तोषामृतसागराम्भसि मनाङ्मग्नः सुखं जीवति"[3]। जहाँ शोक होता है, वहाँ विवेक नहीं ठहरता। स्नेह से शोक की उत्पत्ति होती है यथा सरस्वती के अनुसार – "प्रसिद्ध एवायमर्थः स्नेहः सर्वानर्थप्रभव इति"[4] अतः ममत्व का सर्वविध उच्छेद आत्मज्ञान में सहायक है। कुछ सद्भाव पूर्वजन्मकृत संस्कारों से सक्रिय होते हैं यथा कहा गया है कि दम्भ एवं लोभ से रहित मनुष्य को आत्मजिज्ञासा पूर्वकृत पुण्यकर्मों के संस्कार से ही प्राप्त होती है[5]। अतः भावशुद्धि आत्ममार्ग की ओर प्रेरित करती है।

कर्म (Hand) –

उपर्युक्त प्रतीकात्मक नाटकों में कर्म से तात्पर्य स्व का विवेचन एवं विश्लेषण ही है अतः आत्मबोध ही यहाँ प्रधान कर्म है। प्रबोधचन्द्रोदय में विवेक के द्वारा काम–क्रोधादि को जीतने के लिये किये जाने वाले उद्योग से वैराग्योत्पत्ति हुई जिसके फलस्वरूप विष्णुभक्ति की सहायता से प्राणायामादि को उज्जीवन तथा सद्वृत्तियों को बल मिला, इसके अनन्तर ऋतम्भरा प्रज्ञा तथा शान्ति आदि के सहयोग द्वारा विवेकपूर्वक उपनिषद् के अध्ययन से प्रबोधचन्द्र की उत्पत्ति हुई[6]। सामान्य मानव भी इसी प्रकार के प्रयत्न से मुक्ति प्राप्त कर सकते हैं। क्षमा रूपी कर्म के द्वारा क्रोध के पतन का उपाय क्रमशः बताते हुए कृष्ण मिश्र कहते हैं कि

---

[1]प्रबोधचन्द्रोदय, तृतीय अंक, पृ० १५१।

[2]प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १७३, पद्य १६।

[3]प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १८०, पद्य २३।

[4] प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २१५।

[5].....दधात्यात्मारामे भवति कृतकृत्यः खलु तदा॥ १५॥ स्वानुभूतिनाटकम्, प्रथम अंक, पद्य १५, पृ० १८॥

[6] प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १५९।

"क्रुद्ध व्यक्ति के प्रति हँस कर उपेक्षा करना, आवेश वाले के प्रति प्रसन्नता दिखाना, अपशब्द कहने वाले के प्रति कुशल–क्षेम पूछना, मारने पर स्वयं के पापों का प्रायश्चित्त मान लेना, इस प्रकार के दयाशील क्षमावान् मनुष्य क्रोध को निश्चय ही परास्त कर देगा"[1]। शोक मानव के मस्तिष्क को विवेकशून्य कर देता है, अतः शोक प्रहार से बचने हेतु देवी सरस्वती अनासक्त कर्मयोग को बताते हुए कहती हैं कि "अनवसर उत्पन्न मर्मभेदी नूतन शोक प्रहारों का अनुचिंतन नहीं करना ही महौषध है"[2] इसीलिए व्यर्थ विषयों के अनुचिंतन से बचना चाहिए।

(स) एकाग्रता (Concentration) –

स्वामी विवेकानन्द के अनुसार, एक साधारण व्यक्ति एवं एक महान व्यक्ति के बीच का अन्तर उनकी एकाग्रता की क्षमता पर निर्भर करता है[3]। **तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः** कहकर महर्षि पतञ्जलि ने योग दर्शन में विघ्नों से बचने के लिए एक तत्त्व के अभ्यास को आवश्यक माना है जिससे चित्त में एकाग्रता आती है, अन्य उपायों में प्राणायाम, ईश्वरप्रणिधान, वैराग्य एवं ध्यानादि उपाय भी बताए गए हैं। प्रबोधचन्द्रोदय में देवी सरस्वती के अनुसार, पदार्थों के अनित्य होने का निरन्तर चिन्तन ही ममत्व के उच्छेद का मुख्य उपाय है[4]। चित्त की एकाग्रता मुख्यतः किस विषय में हो यह प्रतिपादित करते हुए कृष्ण मिश्र कहते हैं कि चित्त को किसी शान्त विषय में स्थिर करना चाहिए जिनमें भगवदनुचिंतन ही श्रेष्ठ है[5]। किन्तु एकाग्र चित्त के भ्रमित होने मे बहुत सारे विघ्न भी हैं, जिनका ध्यान साधक को रखना चाहिए यथा स्वानुभूतिनाटक में वर्णित है – "महान् योगियों का मन भी लेशमात्र कर्म के सम्पर्क में आते ही क्लिष्ट हो जाता है, जैसे शिरीष का पुष्प तनिक भी हवा के सम्पर्क में आने से शीर्ण हो जाता है"[6]।

३. प्रेरणा –

भावनात्मक रूप से बुद्धिमान मनुष्य स्वयं को तथा स्वयं के सम्पर्क में आने वाले प्राणियों को भी निरन्तर सत्कर्मों में प्रेरित करता है। प्रबोधचन्द्रोदय में करुणा, श ान्ति को निराशा से निकालकर, उसके

---

[1] प्रबोधचन्द्रोदय, चतुर्थ अंक, पृ० १७५, पद्य १८।

[2] प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २२७, पद्य २९।

[3] The degree between an ordinary person and great person lies in their degree of concentration.

[4] प्रबोधचन्द्रोदय पञ्चम अंक, पृ० २२५।

[5] प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २२८।

[6] कर्तव्यतायाः खलु लेशतोऽपि क्लिश्नन्ति सद्योगिमनांस्यवश्यम्.....॥२६॥ स्वानुभूतिनाटकम्, पद्य २६, पृ० १५६॥

मलिन चित्त को शुद्ध कर उसे निरन्तर उत्साहित करती है अर्थात प्रेरणा देती है कि उसे श्रद्धा की प्राप्ति अवश्य होगी।[1] देवी सरस्वती भी ममत्व के उच्छेद हेतु मन को प्रेरित करती हुई विविध यत्न करती हैं यथा – "शरीर से उत्पन्न होने वाले कीटों (यूकलिक्षादि) को जिस प्रकार दूर ही रखा जाता है उसी प्रकार स्वशरीर से उत्पन्न अपत्यादि में भी मोह का त्याग करना चाहिए"[2]। वेद लोक कल्याण हेतु अद्वैत के प्रति निरन्तर आत्मजिज्ञासुओं को प्रेरित करते रहे हैं यथा – "पश्चात्पुरस्तादथ चोत्तरेण ब्रह्मैव तद्दक्षिणतो विभाति"।[3] लोग क्षणिक संसार में अनित्य सुखों की प्राप्ति हेतु निरन्तर प्रयत्नशील रहते हैं किन्तु आत्मज्ञान-संपन्न सदासुखकारी विषयों से विमुख रहना चाहते हैं इसी तथ्य को द्योतित करते हुए स्वानुभूतिनाटक में उपनिषदर्थागार आत्मबोध हेतु प्रेरणास्पद वचन कहता है – "अहो क्षणिकाल्पसुखसाधने जनो यतते न तु अखण्डानन्दायेति महद्विस्मयास्पदम्"[4]। आत्ममार्ग पर निरन्तर प्रगति हेतु प्रेरणा का महनीय स्थान है।

४. समानुभूति (Ability to Know) –

किसी की मनःस्थिति को जानने की योग्यता ही समानुभूति कहलाती है। यह सहानुभूति से भिन्न है क्योंकि सहानुभूति में किसी की मनःस्थिति को केवल महसूस किया जा सकता है जबकि समानुभूति में उसे अनुभूत करने के साथ-साथ पूर्णतः जाना या समझा जाता है, जैसा कि कहा भी गया है – Empathy Starts Where Otherness Disappears। प्रबोधचन्द्रोदय में श्रद्धा को प्रतिपक्षी कामादि के दुःख का भान है, अतः वह कहती है – "असहनीय धधकता हुआ शोकानल मेरे मर्मस्थलों को विदीर्ण-सा कर रहा है, शरीर को शुष्क बना रहा है और अन्तरात्मा को मानो दग्ध कर रहा है"[5]। स्वानुभूतिनाटक में उपनिषदर्थागार के अनुभव को समझते हुए भूतिभासुर उसी विषय पर पुराणोक्त सुभाषित प्रस्तुत करते हुए कहता है कि "असत् पुरुष के समान सज्जन व्यक्ति भी किसी अन्य पुरुष पर क्रोधित हो सकता है परन्तु वह क्रोध भी केवल अपनी क्षमाशीलता के गुण के परीक्षण हेतु होता है" व्यर्थ नहीं[6]। दण्डपाणि भगवान शिव के द्वारा मृत्युशय्या पर पड़े व्यक्तियों को तारक–मन्त्र का उपदेश देनें में व्यस्त देखकर पण्डित की उपस्थिति उनसे तत्कार्यनिवृत्ति पश्चात् निवेदित करने का प्रस्ताव रखते हैं जिससे उनकी मनोदशा को समझते हुए पण्डित कहते हैं कि जब मस्तिष्क

---

[1] प्रबोधचन्द्रोदय, तृतीय अंक, पृ० ११९।

[2] प्रबोधचन्द्रोदय, पञ्चम अंक, पृ० २२०, पद्य २१।

[3] स्वानुभूतिनाटकम्, प्रथम अंक, पद्य ३४, पृ० २८।

[4] स्वानुभूतिनाटकम्, तृतीय अंक, पृ० ९२।

[5] प्रबोधचन्द्रोदय पञ्चम् अंक, पृ० १९६, पद्य ३।

[6] असन्त इव सन्तोऽपि कोपयन्ति परं नरम्। निजक्षमागुणोदारपरीपाकं परीक्षितुम्॥४३॥ स्वानुभूतिनाटकम्, द्वितीय अंक, पद्य ४३, पृ० ८२

किसी अन्य कार्य में लगा होता है तब भली प्रकार से व्याख्यायित विषय भी समझ में नही आते[1]। इसी प्रकार अन्य बहुत से प्रसंग प्राप्त होते हैं जो सांवेगिक सामञ्जस्य को समृद्ध करते हैं तथा व्यर्थ के द्वन्द्वों को उत्पन्न होने से रोकते हैं।

५. सामाजिक कौशल –

मनुष्य एक सामाजिक प्राणी है, अतः उसके प्रत्येक व्यवहार का समाज पर प्रभाव पड़ता है। योगदर्शन के मत का अनुमोदन करते हुए प्रबोधचन्द्रोदय में भी चित्त प्रसादन के चार गुण माने गए हैं – मैत्री, करुणा, मुदिता एवं उपेक्षा[2]। इन चारों के आश्रयण से मानव का चित्त आनन्दित रहता है तथा सामाजिक विकास में अभिवृद्धि होती है, सुखी मनुष्यों के प्रति मैत्री, दुःखी के प्रति करुणा, पुण्यात्मा पुरुषों मे प्रसन्नता रखकर तथा पापियों के प्रति उपेक्षा की भावना से लोकव्यवहार सम्यक्तया सिद्ध होता है। प्रबोधचन्द्रोदय में पुरुष (आत्मा) को व्यावहारिक ज्ञान है, अतः वह विवेक को पिता तथा उपनिषद् को माता के तुल्य मानते हुए कहता है – कि ज्ञानवृद्ध होने से विवेक पितृतुल्य एवं पुरुष की मुक्ति के कारणभूत प्रबोध को जन्म देने के कारण उपनिषद् मातृतुल्य है[3]। स्वानुभूति नाटक में सूत्रधार अपने व्यवहार चातुर्य–विषयक ज्ञान को प्रस्तुत करते हुए कहता है कि जिस प्रकार सहस्रार्जुन के भुजाओं को छिन्न–भिन्न कर परशुराम ने उसे निर्दुष्ट बना दिया था वैसे ही कवि की सरस किन्तु दोषयुक्त वाणी विद्वानों की संगति में निर्दोष हो जाती है[4]। दण्डपाणि विद्वत्-साहचर्य की सामाजिकों हेतु महत्ता बताते हुए कहते हैं कि सभी मनुष्य अनेक सामान्य जनों की संगति की अपेक्षा एक विद्वान की संगति से ही अतिशय आनन्द की प्राप्ति करते हैं अतः विद्वत् संसर्ग अत्युत्तम फल है[5]। भूतिभासुर उपनिषदर्थागार से लोकव्यवहार विषयक उदाहरण प्रस्तुत करते हुए कहता है कि लघुचित्त वालों के लिए ही अपना एवं पराया जैसा भाव है किन्तु उदारचरित वाले मानव के लिए तो वसुधा ही कुटुम्ब है[6]। विद्वानों के दारिद्र्य दुःख को देखकर पिंगलजट उपनिषदर्थागार से कहता है कि महान कष्ट का विषय है कि विद्वान भी दरिद्र होते हैं[7]। संसार के प्रतिपल परिवर्तित होने वाले स्वरूप को देखने के पश्चात् भी मनुष्यों द्वारा स्वास्तित्व का मिथ्या अभिमान किया जाता है जिस ओर इंगित करते हुए पिंगलजट वितण्डमार्तण्ड से कहता है कि “इस

---

[1]....यतः कार्यान्तरचुम्बिनि चेतसि सम्यगप्यभिधीयमानं न तत्पथमारोहति। स्वानुभूतिनाटकम्, प्रथम अंक, पृ० १६॥

[2] प्रबोधचन्द्रोदय, चतुर्थ अंक, पद्य ५।

[3] प्रबोधचन्द्रोदय, षष्ठ अंक, पृ० २४८, २५०।

[4] सदोषमपि निर्दोषं भवत्यग्रे विपश्चितः। रामस्येवार्जुनवपुः सुकवेः सरसं वचः॥६॥ – स्वानुभूतिनाटकम्, प्रथम अंक, पृ० ८।

[5] स्वानुभूतिनाटकम्, प्रथम अंक, पद्य १०।

[6] स्वानुभूतिनाटकम्, तृतीय अंक, पद्य ८, पृ० ९६।

[7] अहो महत्कष्टमिदं यद्विदुषोऽपि दारिद्र्यं नाम। स्वानुभूतिनाटकम्, तृतीय अंक, पृ० ८८॥

संसार में कुछ भी असम्भावित नहीं है, हाथी जैसे विशाल जीव को सिंह एक निवाले में खा जाने को आतुर रहते हैं और वहीं एक आठ पैरों वाला जीव सिंह की भी शक्ति को नष्ट कर सकता है इसलिए किसी भी मानव को लोगों के मध्य मिथ्या गर्व के भाव से दूर रहना चाहिए"[1]। इस प्रकार सामाजिकों हेतु रचित इन प्रतीकात्मक दार्शनिक नाटकों में संसार के वे सत्य वर्णित हैं, जो मनुष्यों को जीवन में सही दशा और दिशा प्रदान करते हैं।

निष्कर्ष –

भावनात्मक बुद्धिमत्ता हेतु अन्तःकरण की सूक्ष्म समझ होना अनिवार्य है, अतः इसी क्रम में अद्वैतवेदान्त के दृष्टिकोण से प्रबोधचन्द्रोदय एवं स्वानुभूतिनाटक में निहित तत्त्व चिंतन मानसिक भावों के सामञ्जस्य हेतु भारतीय ज्ञान परम्परा का प्रतिनिधित्व करते हैं। डेनियल गोलमैन द्वारा निर्धारित मानदण्डों के आधार पर नाटकों में निहित तत्त्वों का विश्लेषण एवं विवेचन करने पर प्राचीन भारतीय ज्ञानसम्पदा में सन्निहित उच्चतम भावनात्मक मानकों का ज्ञान प्राप्त होता है, जो वर्तमान सकारात्मक मनोविज्ञान को नई दिशा देने में समर्थ हैं।

<u>सन्दर्भग्रन्थसूचिः</u> –

- पण्डित, श्रीमद् अनन्त, (सम्पा०) देशपाण्डे, उ. एस. (१९९०), *स्वानुभूतिनाटकम्,* पूना : भण्डारकर ओरियन्टल रिसर्च इन्स्टिट्यूट।
- मिश्र, श्री कृष्ण (यति), (व्याख्या०) त्रिपाठी, रा. शा. (२०१४), *प्रबोधचन्द्रोदयम्,* वाराणसी : चौखम्बा कृष्णदास अकादमी।
- गोयन्दका, जयदयाल (२०१७), *श्रीमद्भगवद्गीता,* गोरखपुर : गीता प्रेस।
- पतञ्जलि, (टीकाकार) गोयन्दका, हरिकृष्णदास (२०१९), *योग-दर्शन,* गोरखपुर : गीताप्रेस।
- Goleman, Daniel. (2005). *Emotional Intelligence : why it can matter more than IQ*, New York : The 10th Anniversary Edition, Bantam Books. http://Archive.org/details/emotionalintelli00dani
- Sarvapriyananda, Swami. *Self Management : Modern Positive Psychology & Ancient Wisdom*. 9 October, 2018, https://youtu.be/5aSK5PdETAI on 2nd September 2021.

<u>Author's Detail</u>

Name : Ankita Srivastava
Designation : Ph. D. Student
Address : University of Delhi, Dept. Sanskrit
मुहल्ला एवं पोस्ट – नौसढ, गोरखपुर, २७३०१६
Email : sriankita1094@gmail.com

****

[1] तस्मात्कापि कदाऽपि किञ्चिदपि वा केनापि पुंसा सखे दर्पावेशनिवेशिताशयतया स्थातुं न युक्तं जने॥४४॥ स्वानुभूतिनाटकम्, द्वितीय अंक, पद्य ४४, पृ० ८६

कवयित्र्याः क्षमारावस्य सत्याग्रहगीतासमीक्षणम्

Mithu Biswas

शोधसारः

अर्वाचीनसंस्कृतवाङ्मये कवयित्री क्षमारावः स्वकारयितृप्रतिभया बहूनि काव्यादीनि विरचितवती। तस्याः काव्येषु स्वाधीनतान्दोलनस्य प्राक्कालीनावस्था समभिद्योतिता। विशेषेण क्षमा महात्मगान्धिना सह संयुक्ता आसीत्। श्रीमद्भगवद्गीतायाः आधुनिककालीना गीता अनया प्रस्तुता। सा गीता सत्याग्रहगीतेति परिचीयते। महात्मगान्धिनः अनुप्रेरणया तया सत्याग्रहगीता इत्याख्यात्मकं महाकाव्यं व्यरचि। अनुष्टुप्छन्दसि रचितमिदं महाकाव्यं श्रीमद्भगवद्गीतावदष्टादशाध्यायैर्विभक्तः। अस्मिन् महाकाव्ये ६५९ संख्यात्मकैः श्लोकैः गान्धिनः सत्याग्रहान्दोलनस्य वर्णना कृतास्ति। ऐतिहासिकराजनैतिकसन्दर्भमाश्रित्यैव इदमुच्चकोटिकं महाकाव्यम्। तत्र सत्याग्रहगीतायाः एकस्मिन् पक्षे क्षमा गीताशैल्यां गान्धिसंवादस्य सन्देशं व्याख्याति, अन्यस्मिन् पक्षे कालिदासशैलीमप्यनुकरोति। कल्हणस्य राजतरङ्गिणीति ऐतिहासिको ग्रन्थ इव "सत्याग्रतगीता" इत्यस्य कविः समसामयिककालस्य वृत्तं विवृणोति। अनवद्यशैल्या।

कुञ्चीशब्दाः – क्षमारावः, गीता, सत्याग्रहगीता, स्वाधीनतान्दोलनम्, महात्मा गान्धी चेति।

****

लौकिकसंस्कृतसाहित्ये विज्जका-मारुला-मोरिका-शीलाभट्टारिकादीनां प्राचीनमध्ययुगीयानां कवयित्रीणां स्फुटकविताः आप्यन्ते, याभिः संस्कृतसाहित्यस्य श्रीवृद्धिरभवत्। पूर्वापेक्षया विंशशताब्द्यामेवाधिकतया संस्कृतकवयित्र्यः स्वकारयितृप्रतिभाबलादेव काव्यनाटकादीनि कुर्वन्ति स्म। आधुनिकसंस्कृतस्त्रीकविषु पण्डिता क्षमारावोऽद्वितीयेति निश्चप्रचम्। तया रचितानि मौलिककाव्यानि संस्कृतसाहित्ये विशेषरूपेण समालोचकैः समादृतानि। क्षमारावमहोदयायाः जनिः १८९०ख्रीष्टाब्दस्य जुलाइमासस्य अष्टमदिनाङ्के महाराष्ट्रस्य पुणानगर्यां बभूव। तस्याः पिता शङ्करपाण्डुरङ्गः, माता उषादेवी। शङ्करपाण्डुरङ्गः खल्वासीत् संस्कृतानुरागी। पितृसंस्कारवशादेव क्षमायां सुतरामेव संस्कृतप्रीतिरजनीत्यस्मिन् विषये संशयो नास्ति। विशेषप्रतिभाया अधिकारिणी क्षमा विद्यार्जनेन भाषाभ्यासेन च सर्वोत्तमासीत्।

क्षमायाः साहित्यिकजीवनस्य व्याप्तिरासीत् १९२०ईस्वीयाब्दात् १९३०तमवर्षं यावत्। अस्मिन् कालखण्डे तया आंग्रेजीरचनाः विविधपत्रिकासु प्रकाशिताः। तदा समस्ते देशे पूर्णस्वराजस्य आन्दोलनं प्राचलद्। महात्मा गान्धी दक्षिणाफ्रीकातः प्रत्यागतः। क्षमापि कांग्रेसदलस्य कर्मधारया समम् आत्मानं संयोजयितुमियेष। सा गुजराटप्रदेशस्य साबरमतीनामके आश्रमे गान्धिना सह मिलित्वा देशसेवायै आत्मानम्

उत्सर्गीकर्तुं स्वेच्छां प्रकटितवती। सत्याग्रहगीतायामपि सा स्वयमेव कथयन्ती यत् सा कंग्रेसदलपक्षतः वोर्सदग्रामे समनुष्ठिते शिविरें आगतानां देशसेवकानां स्थितिदर्शनार्थं गता। तत्र गत्वा स्वयंसेविकाभिः तथा च ग्रामस्त्रीभिश्च समं वार्तालापः कृतो वर्तते। तस्याः यात्रानुभवः ग्रामज्योतिस्तथा च कथापञ्चकमिति कथासंग्रहे प्रतिबिम्बितः अस्ति। विविधैः विद्वद्भिः सह सम्पर्केण तस्याः काव्ययात्रा सुतरामेव स्फुरिता जाता। क्षमाराव-महोदयेन विरचिताः ग्रन्थास्तावत् –

1. सत्याग्रहगीता (१९३२ ख्रीः, महाकाव्यम्)
2. कथापञ्चकम् (१९३३ ख्रीः, कथासाहित्यम्)
3. विचित्रपरिषद्यात्रा (१९३९ ख्रीः, यात्रावृत्तम्)
4. शङ्करजीवनाख्यानम् (१९३९ ख्रीः, जीवनचरितम्)
5. मीरालहरी (१९४४ ख्रीः, खण्डकाव्यम्)
6. उत्तरसत्याग्रहगीता (१९४८ ख्रीः, महाकाव्यम्)
7. श्रीतुकारामचरितम् (१९५० ख्रीः, महाकाव्यम्)
8. श्रीरामदासचरितम् (१९५३ ख्रीः, महाकाव्यम्)
9. स्वराज्यविजयः (१९६२ ख्रीः)
10. कथामुक्तावली (१९५५ ख्रीः, कथासाहित्यम्)
11. ग्रामज्योतिः (१९५५ ख्रीः)
12. श्रीज्ञानेश्वरचरितम् (१९५३ ख्री)

सत्याग्रहगीता

क्षमारावमहोदया गान्धिनः अहिंसानीत्या अनुप्राणिता सती स्वनिर्मितेन साहित्येन राष्ट्रभक्तिं प्रतिपादितवती। महात्मगान्धिनः अनुप्रेरणया तया सत्याग्रहगीता इत्याख्यात्मकं महाकाव्यं व्यरचि। अनुष्टुप्छन्दसि रचितमिदं महाकाव्यं श्रीमद्भगवद्गीतावदष्टादशाध्यायैर्विभक्तः। अस्मिन् महाकाव्ये ६५९ संख्यात्मकैः श्लोकैः गान्धिनः सत्याग्रहान्दोलनस्य वर्णना कृतास्ति। ऐतिहासिकराजनैतिकसन्दर्भमाश्रित्यैव इदमुच्चकोटिकं महाकाव्यम्।

उक्तेऽस्मिन् ग्रन्थे श्रीमद्भगवद्गीतावदस्माभिः निष्कामकर्मयोगः पालनीयः इति विषयः पर्यालोचितः। गीता-सत्याग्रहगीतयोः केषाञ्चन श्लोकानां सादृश्यं विद्यते नाम। तद्यथा धर्मस्य हाने सति तस्योन्नत्यर्थं दुष्टदमनार्थं च गीतायां भगवता प्रतिज्ञातम् –

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे"[1]॥

---

[1] श्रीमद्भगवद्गीता (४/७-८), गीताप्रेस, गोरखपुरम्।

तद्वदेव दुष्टदमनार्थं साधूनां परित्राणाय च प्रतिज्ञाबद्धः महात्मा गान्धी स्वयं विष्णुरूपेण भूवमवततार -

"अस्मद्धर्मनाशाय प्रशान्तेः स्थापनाय।
गान्धिरूपेण भगवानवतीर्णः विष्णुस्स्वयम्"[1]॥

एतादृशैः श्लोकैः महात्मगान्धिनः महात्मत्व-सत्यत्व-अहिंसादिव्रतानि वर्णितानि सन्ति।

सत्याग्रहगीतायाः प्रथमसंस्करणं १९३२ खीष्टाब्दे पैरिस् इत्यत्र प्रचरद्रूपताम् इतम्। अस्मिन् महाकाव्ये क्षमारावः लालाराय-मोतिलाल्नेहेरुमहोदययोश्चरित्रं संक्षेपेणालोचितम्। सत्याग्रहगीताया : प्रारम्भे क्षमादेवी कविकुलगुरुकालिदास इव कथयति

'गम्भीरो विषयः क्वायं श्रेष्ठः सत्याग्रहात्मकः।
कृत्स्ने जगति विख्यातः क्व मे लघुतमा मतिः॥
शब्दगौरवहीनाऽहं युद्धस्यैतस्य गौरवम्।
व्याख्यातुमसमर्थास्मि गुणैर्दिव्यैर्विभूषितम्॥
तथापि देशभक्त्याऽहं जातास्मि विवशीकृता।
अत एवास्मि तद्गातुमुद्यतां मन्दधीरपि॥
दुहिता शङ्करस्याहं पण्डितस्य क्षमाभिधा।
अक्षमा कवेमार्गे श्रोतव्या वस्तु गौरवात्'[2]॥

सत्याग्रहगीतायाः प्रारम्भिकेषु पञ्चमसर्गेषु देशे संघटितानामुच्चावच्चप्रवाहाञ्चानाञ्चित्रं समस्ति। साइमन-कमिशनस्य, अपि च देशे व्यापकविरोधात्मिकायाः प्रतिक्रियायाः चित्रणमपि तया ग्रन्थे अस्मिन् साधु कृतम्। नवमेऽध्याये राजप्रतिनिधि-इर्विनस्य सन्देशोऽपि च कांग्रेसप्रमुखानां प्रतिक्रिया अत्रोपवर्णिता। दशमेऽध्याये गान्धिद्वारा राजप्रतिनिधिं (Viceroy) प्रति लिखितपत्रस्य प्रभावशाली अनुवादः कृतः। सत्याग्रहदर्शनस्य सारः क्षमाराववर्यया अत्र स्वसुललितैः शब्दैः प्रस्तुतः -

'दुर्बला ननु गण्यन्ते शान्तिमार्गावलम्बिनः।
परं सत्याग्रहाद्विद्धि नास्ति तीव्रतरं बलम्'[3]॥

---

[1] सत्याग्रहगीता (१८/१८)

[2] Ibid (१-४)

[3] सत्याग्रहगीता (१०.२५)

एकादशसर्गे दाण्डीयात्रायां गान्धिप्रस्थानस्य तेजोभास्वरं चित्रं सन्निविष्टं वर्तते। गान्धिमहात्मनः लवणसत्याग्रहस्य सफलतया सह सा कारागारे वन्दीदशां प्राप्नोत्। द्वादशाध्याये सत्याग्रहिणामुपरि अकथ्यात्याचारस्य प्रत्यक्षं विवरणमत्र प्रदत्तम्।

एवं लवणसत्याग्रहस्य प्रभावः समग्रदेशे कथमासीत् तथा तत्कारणम्, घटनायाः चित्रणञ्च द्वादशेऽध्याये समुल्लिखिते। क्षमादेवी बम्बाइनगर्यां स्थित्वा काव्यमिदं रचितवतीति तत्र संघटितवृत्तस्य आमूलचूडं वर्णनं प्रत्यक्षेणैव सा कृतवती। त्रयोदशाध्याये निःशस्त्रभारतीयानामुपरि गोलिकाचालनार्थं सैनिकानां विरोधो वर्णितः क्षमया। पेशावरे तेषां सहानुभूतिनिमित्तं जनानां शोभायात्रायां गोलिकावर्षणं सा काव्यरूपवाङ्माध्यमेन विनिन्दन्ती आसीत्। चतुर्दशेऽध्याये शोलापुरे जनान्दोलनम्, अंग्रेजशासकैः न्यायस्य पताकां स्थापयित्वा निर्दोषनराणाम् उद्बन्धनं (फाँसी) करुणरसेन आर्द्रीकृत्य वर्णयति सा। पञ्चदशे अध्याये कवयित्री बम्बाइनगर्यां दण्डप्रहारघटनावर्णनेन सह देशसेवकेषु वर्वरात्याचारस्य मर्मन्तुदचित्रणं चकार। षोडशाध्याये वैदेशिकवस्त्रव्यापारावरोधेन स्वयंसेवकद्वारा मालवाहनस्य सविशदं वर्णनं विद्यतेऽत्र। सप्तदशे अध्याये स्वाधीनतासंग्रामे नारीणां पूर्वसाहसस्य वर्णनमस्ति। विवरणमिदमात्मकथापरकम्। क्षमादेवीं नेतारः वोर्सद-नामके ग्रामे दशसेविकानामुपरि अत्याचारस्य तासां वर्तमानस्थितेश्च दर्शनाय प्रेषितवन्तः इति पूर्वमेवोल्लिखितम्। अष्टादशे अध्याये पूनानगर्यां गान्धिनः आगमनं तथा भारतीयानाम् अपारोत्साहः, गान्धिदर्शनञ्च सा अपृथग्-यत्ननिर्वर्त्येन च वर्णयति। गान्धिनः अलौकिकविग्रहं क्षमादेवी मनसि निधाय पूर्णरूपेण प्रस्तुतवती। क्षमारावः काव्यस्य समाप्तिमेवमेव कृतवती -

'सत्यं विजयतां लोके मुक्तं भवतु भारतम्।
नन्दन्तु सुखिनः सर्वे देशजाश्च विदेशजाः'[1]॥

श्रीमद्भगवद्गीतावचनं स्मारयन्ती क्षमादेवी लिखति – 'स्वधर्मः परमो धर्मः न त्याज्योऽयं विपद्यपि'[2]। अपि च, दलितानां दयनीयदशां विलोक्य गांध्युद्गारान् प्रकटयति –

'शूद्रो वा ब्राह्मणो वापि क्षत्रियो वा कृषीवलः।
देवदृष्ट्या समाः सर्वे विकृतिस्तु नरोद्भवा'[3]॥

सत्याग्रहकर्तुः महात्मगान्धीमहोदयस्य चरणेषु काव्यकुसुमानि समर्पयन्ती कवयित्री कथयति-

'भारतावनिरत्नाय सिद्धतुल्यमहात्मने।

[1] तत्रैव, (१८.१९)

[2] सत्याग्रहगीता (१.२९)

[3] तत्रैव, (२.२९)

गाँधीवंशप्रदीपाय गीतिमेनां समर्पये'॥५॥

श्रीमद्भगवद्गीतावचनं स्मारयन्ती क्षमादेवी लिखति –

'स्वतन्त्र्याद्धि मनुष्याणां प्रियमन्यन्न विद्यते'। (१.३८)

लोका स्वदेशिखादिवस्त्राणि धारयन्तु। तथाहि तया उक्तं काव्यमुखेन -

'शीलं चिह्नं सुजातस्य न जातिर्न च जीविका' ॥ (२.२०)

अपि चोक्तम् -

'खादिवस्त्रात्परं वासो नैव धार्यं कदाचन।

स्वार्थत्यागात्स्वदेशार्थं नान्यच्छ्रेयो हि विद्यते'॥ (२.११)

सत्याग्रहगीतायाः एकस्मिन् पक्षे क्षमा गीताशैल्यां गान्धिसंवादस्य सन्देशं व्याख्याति, अन्यस्मिन् पक्षे कालिदासशैलीमप्यनुकरोति। कल्हणस्य राजतरङ्गिणीति ऐतिहासिको ग्रन्थ इव "सत्याग्रतगीता" इत्यस्य कविः समसामयिककालस्य वृत्तं विवृणोति अनवद्यशैल्या। क्षमया देव्या क्वचित् सुभाषितानां, लोकोक्तीनां, लौकिकन्यायानां, वाग्व्यवहाराणाञ्च प्रयोग: कृत:। भावानुरूपा उपदेशात्मिकी, नीतियुक्ता, मानवीयगुणोपेता च क्षमारावस्य भाषाशैली।

Bibliography

1. मिश्रा, शिवानी (2020). *संस्कृत साहित्य की कवयित्रियाँ*, दिल्ली, परिमल पावलिकेशन्।
2. मुखोपाध्याय, गोपेन्दु. (1419, प्रथम प्रकाश), *संस्कृत साहित्येर इतिहास*, कलकाता, इउनाइटेड वुक एजेन्सि।
3. Choudhury, J. B. (1940). *Contribution of Women to Sanskrit Literature* (Vol.I-IV), Calcutta, Prachyavani.

Author's Detail

Name : Srimati Mithu Biswas
Designation : Assistant Professor
Address : Department of Sanskrit, Balurghat College
Balurghat, Dakshin Dinajpur
West Bengal, Pin Code -733101
Email : biswasuhtim@gmail.com

****

कवि-हरेकृष्णमेहेरस्य काव्यकृतिषु अलङ्कार-संयोजना

डॉ. सस्मितासाहु

शोधसारः

सामाजिक-जीवने केयूर-कङ्कण-प्रभृतयः अलङ्काराः यथा मानवशरीरस्य सौन्दर्यं वर्धयन्ति, तथैव अनुप्रासोपमा-रूपक-प्रभृतयः अलङ्काराः काव्यस्य शब्दार्थयोः सौन्दर्यं चमत्कृतिं च वर्धयन्ति। काव्ये अलङ्काराणां तादृशं महत्त्वं वर्त्तते, यादृशं शरीरे अलङ्काराणां वस्त्रादीनां वा। आधुनिकसंस्कृतसाहित्ये लब्धप्रतिष्ठस्य कवेः हरेकृष्ण-मेहेरस्य संस्कृतकाव्य-कृतिषु विविधानां शब्दालङ्काराणामर्थालङ्काराणां च समावेशो लक्ष्यते। अत्र मुख्यरूपेण उपमा, अनुप्रासः, यमकम्, रूपकम्, समासोक्तिः, व्यतिरेकः चेत्यादीनामलङ्काराणां प्रयोगो विलोक्यते। अस्मिन् शोध-प्रबन्धे कवेः मेहेरस्य काव्यकृतिषु सन्निवेशितानां कतिपयालङ्काराणां विवेचनं कर्त्तुं विहितोऽस्ति प्रयासः।

कुञ्चीशब्दाः - शब्दालङ्कारः, अर्थालङ्कारः, सौन्दर्यबर्धकम्, उपकारकम्, केयूरः, कङ्कणं, चमत्कृतिः, उपमेयः, उपमानं, साधारणधर्मः।

****

<u>उपक्रमः</u>

अलङ्करोति इति अलङ्कारः, अलङ्क्रियते अनेन इति वा अलङ्कारः। काव्येषु सौन्दर्य-साधन-निमित्तम् अलङ्काराणां विशेष-महत्त्वं विद्यते। गुणगौरव-सम्पन्नाऽपि वनिता सालङ्कारै व शोभते। तथैव शरीर-तुल्ययोः शब्दार्थयोः सौन्दर्य-वर्धकं तत्त्वमलङ्कारः रस-भावादीनामुपकारको भवति। मानव-कृते केयूर-कङ्कण-हार-प्रभृतयः यथा शरीरस्य सौन्दर्यं वर्धयन्ति, तथा अनुप्रासोपमा-रूपक-प्रभृतयः अलङ्काराः शब्दार्थ-रूपस्य काव्यस्य सौन्दर्यं चमत्कृतिं च वर्धयन्ति।

यद्यपि काव्यात्मरूपेण रसस्य महत्त्वं विद्यते, तथापि अलङ्कारस्य विशेष-प्रयोजनमस्ति। अलङ्कारः शब्दार्थरूप-काव्यशरीरस्य बाह्यसौन्दर्य-वर्धनेन समं रसादीन् अपि पोषयति। काव्ये अलङ्काराणां तादृशं महत्त्वं वर्त्तते, यथा मानव-शरीरे अलङ्काराणां वस्त्रादीनां वा। यथा सकलगुण-समन्वितोऽपि मानवो निर्वसनो न शोभते, अलङ्कार-विरहिता नारी यथा न शोभते, तथैव अलङ्कार-विहीनं काव्यं शोभनीयं न भवति। संस्कृत-साहित्यस्य सुप्रथितः आलङ्कारिकः विश्वनाथ-कविराजः साहित्यदर्पण-ग्रन्थे अलङ्कारस्य लक्षणं निरूपयति एवंप्रकारकम् -

'शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिनः।

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥' (सा. द. १०/१)

अस्य आशयो भवति यत् काव्ये शब्दार्थयोः ये धर्माः अनित्याः, सौन्दर्य-वर्धकाः, रसादीनाम् उपकारकाः भवन्ति, ते अलङ्काराः इति निगद्यन्ते, यथा सामाजिक-व्यवहारे मानव-शरीरे केयूर-कङ्कणादयः अलङ्काराः शोभावर्धन-साधनभूताः। काव्येषु शब्द-योजनायां प्रसादादि-गुणाः काव्यस्य नित्य-धर्माः, सौन्दर्यस्य जनकाश्च भवन्ति, किन्तु अलङ्काराः काव्यस्य अनित्य-धर्माः सौन्दर्यस्य अतिशय-कारकाश्च वर्त्तन्ते।

साम्प्रतिक-संस्कृतसाहित्ये कवि: हरेकृष्ण-मेहेर: एकं स्वतन्त्रं स्थानं समलङ्करोति। कवे: मातृगीतिकाञ्जलि:, पुष्पाञ्जलि-विचित्रा, स्वस्ति-कविताञ्जलिः, जीवनालेख्यम्, मौनव्यञ्जना, अस्त्रमजस्त्रम्, उत्कलीय-सत्कला, सौन्दर्य-सन्दर्शनम्, हासितास्या-वयस्या चेत्यादिषु काव्येषु साहित्य-शास्त्रानुसारं विविधानां शब्दालङ्काराणां तथा अर्थालङ्काराणां च समावेशो लभ्यते। तस्य कृतिषु अनुप्रासः, यमकम्, श्लेषः, उपमा, रूपकम्, समासोक्तिः, व्यतिरेकः, काव्यलिङ्गम् चेत्यादीनाम् अलङ्काराणां प्रयोगः समवलोक्यते। अस्मिन् शोधप्रबन्धे कवे: मेहेरस्य काव्यकृतिषु संयोजितानां कतिपयालङ्काराणां विवेचन-निमित्तं विहितोऽस्ति प्रयासः।

➢ <u>**अनुप्रास:**</u>

सुप्रसिद्धालङ्कारिकस्य साहित्यदर्पणकारस्य विश्वनाथ-कविराजस्य मतानुसारेण अनुप्रासालङ्कारस्य लक्षणं निरूप्यते एवंरूपम् -

'अनुप्रास: शब्द-साम्यं वैषम्येऽपि स्वरस्य यत्।' (सा. द. १०/३)

आधुनिक-काव्यशास्त्रकारस्य अभिराज-राजेन्द्रमिश्रस्य अभिराज-यशोभूषणमिति ग्रन्थे अनुप्रासा-लङ्कारस्य लक्षणं प्रदत्तमस्ति एवम् -

'शब्द-साम्यमनुप्रासो विषमेष्वपि स्वरेषु यत्।

छेकादि-भेद-भिन्नोऽसौ बहुरूपो निगद्यते॥' (अभि. यशो. पृ. १०३)

अस्याशयो भवति यत् स्वरवर्णस्य विषमत्वे सत्यपि शब्दानाम् अर्थात् व्यञ्जन-वर्णानां सादृश्यं यत्र वर्त्तते, तत्र अनुप्रासालङ्कारो निरूप्यते। अनुप्रासे व्यञ्जनानामावृत्तिर्भवति।

कवि-हरेकृष्ण-मेहेरस्य काव्यकृतिषु सर्वत्र प्रायः ललित-पदयोजनया सह अनुप्रासालङ्कार: प्राञ्जल-रूपेण दरीदृश्यते। उदाहरणस्वरूपम्, तस्य मातृगीतिकाञ्जलिः इत्याख्यस्य काव्यस्य देश-गीतिकाया: एका पङ्क्तिः एवं रूपा -

'अम्बुधि-विधौत-सुमधुर-चरण-विलासा,
गङ्गा-सलिले सलील-सुललित-हासा।
कुसुमारामे रसभर-सुरभि-समीरा,
तरुवर-पुञ्जे रञ्जित-मञ्जु-शरीरा।
विहङ्ग-ताने मङ्गल-गाने
श्यामल-शस्या विजयते।
भारत-माता परम-नमस्या विजयते॥' (देश-गीतिका, १/मातृगीतिकाञ्जलिः)

प्रदत्ते उदाहरणे "अम्बुधि, विधौत, सुमधुर" इत्यस्मिन् पदचये ध-वर्णस्य आवृत्तिः दृश्यते। पुनः "सलिले, सलील, सुललित" इत्यस्मिन् पदचये स-ल इत्येतयोः वर्णयोः, "कुसुमारामे, समीरा" इत्यत्र स-म-र-वर्णानां क्रम-सादृश्यम् अनेकवारं भवति। पुनश्च "रसभर-सुरभि" इत्यत्र स-भ-र-वर्णानां क्रम-सादृश्यं नास्ति, परन्तु स्वरूप-सादृश्यं विद्यते। अतः अनुप्रासालङ्कारो भवति।

कवेः 'पुष्पाञ्जलि-विचित्रा'-गीतिकाव्यात् प्रस्तूयते अनुप्रासस्य एकमुदाहरणं निम्नरूपेण -

'सङ्गीत-सुधा सङ्गत-रङ्गा जन-मनोहरा,
प्रसरति नित्यं नृत्य-माधुरी रस-रागभरा।
चित्रकला, सुपवित्र-फला,
प्रतिहृदयं प्रमुदं वितन्वती।
विजयतेतराम् ओंकार-भारती,
संस्कार-भारती॥' (संस्कृति-गीतिका, ३/पद्यबन्धा, २०१२)

उल्लिखिते पद्ये "सङ्गीत, सुधा, सङ्गत, रङ्गा" इत्यत्र स-ङ्-ग-त-वर्णानामावृत्तिः विलोक्यते। पुनश्च "प्रसरति, नित्यं, नृत्य, माधुरी" इत्यत्र र-त-न-वर्णानाम्, "रस-रागभरा" इत्यत्र र-वर्णस्य अनेकावृत्तिः, "चित्रकला, सुपवित्र, फला" इत्यत्र त्-र-ल-वर्णानामावृत्तिः। अतः अस्मिन् पद्ये अनुप्रासालङ्कारो भवति।

कवेः मेहेरस्य 'स्वस्तिकविताञ्जलिः' इत्याख्यात् गीतिकाव्यात् अनुप्रासालङ्कारस्य प्रस्तूयते उदाहरणमेकम् -

'भारत-भूति-र्गिरा संस्कृतम्, भाषाजननी जनैराद्दतम्।
नित्य-नूतनम्, युग-स्पन्दनम्, सुधासेचनम्।
अस्ति तदर्थम्, आस्तिकायनम्, स्वस्तिवाचनम्।
स्वस्तिवाचनम्, स्वस्तिवाचनम्, स्वस्तिवाचनम्॥' (स्वस्तिवाचन-गीतिका, ५)

प्रोक्तायां गीतिकायां "भारत-भूतिः गिरा" इत्यत्र भ-र-त-वर्णानाम्, "जननी, जनैः" इत्यत्र ज-न-वर्णयोश्च आवृत्तिः संदृश्यते। "नित्य-नूतनम्" इत्यत्र न-त-वर्णयोः, "स्पन्दनम्, सुधासेचनम्" इत्यत्र स-न-वर्णयोः आवृत्तिः। "अस्ति, आस्तिकायनम्, स्वस्तिवाचनम्" इत्यत्र स्-त-व-न-वर्णानामावृत्तिः वर्त्तते। अतः पद्येऽस्मिन् अनुप्रासालङ्कारो निश्चीयते।

कवेः मेहेरस्य मुक्तच्छन्दोबद्ध-कवितास्वपि अनुप्रासस्य बाहुल्यं दृष्टिं समाकर्षति। उदाहरण-स्वरूपम्, 'मौनव्यञ्जना' इत्याख्यस्य काव्यस्य 'द्विजन-नीराजनम्' इति कवितायाः कियदंशः इत्थम् -

'हृदयस्य स्पन्दे स्पन्दे
प्रकटयति चरितं यो मलिनात्मनः।
दुर्जनं तं सर्वादौ वन्दे
भस्मभृतो यस्माद्बिभेति सज्जनः॥' (द्विजन-नीराजनम्/प्राचीप्रज्ञा, २०१७)

अस्मिन् उदाहरणे द-स-प-य-म-न-ज-भ-त-प्रभृतीनां व्यञ्जन-वर्णानाम् अनेकशः पुनरुक्ति-हेतोः अनुप्रासालङ्कारः स्पष्टरूपेण ज्ञायते।

आनुप्रासिकतायाः प्राचुर्यं कवेः मेहेरस्य विविध-कवितासु बहुशः विलोक्यते। तस्य 'जीवनालेख्यम्' इत्याख्यस्य काव्यस्य 'जीवन-पुस्तकम्' इति कवितायाः कियदंशः एवम् -

'जीवनं नाम पुस्तकम्,
सुवर्णकं पूर्ण-पर्णकम्,
यत्र लिख्यते विजय-शतकम्,
जितान्तरायं कान्तार-सन्तारकम्॥' (जीवन-पुस्तकम्, १/संस्कृतमञ्जरी, २००५)

अत्रोदाहरणे "सुवर्णकं, पूर्ण-पर्णकम्" इत्यत्र प-र-ण-क-वर्णानाम्, "जितान्तरायं, कान्तार, सन्तारकम्" इत्यत्र न-त-र-क-वर्णानां सादृश्यात् अनुप्रासालङ्कारः निश्चीयते। "पुस्तकम्, पर्णकम्, शतकम्, सन्तारकम्" इत्यत्र पदान्तेषु अन्त्यानुप्रासोऽपि लक्ष्यते।

अनुप्रासस्य उदाहरणरूपेण कवेः 'पुष्पाञ्जलिविचित्रा'-गीतिकाव्यात् 'जाह्नवी'-कवितायाः मञ्जुल-पद्यमेकं परिवेष्यते एवम् -

'राग-रङ्गिम-तरङ्ग-मालया
मञ्जुला सरस-नाद-गुञ्जना।
शं तनोतु मधुरा सुधारया
ताप-वह्नि-हरणीह जाह्नवी॥' (जाह्नवी, १/पुष्पाञ्जलि-विचित्रा)

प्रोक्ते पद्ये "राग, रङ्गिम, तरङ्ग, मालया" इत्यत्र र-ङ्-ग-म-वर्णानाम्, "मञ्जुला, नाद, गुञ्जना" इत्यत्र ज-न-वर्णयोश्च आवृत्तिः संदृश्यते। "तनोतु" इत्यत्र त-वर्णस्य, "मधुरा, सुधा-रया" इत्यत्र ध-र-वर्णयोः, "वह्नि, हरणीह, जाह्नवी" इत्यत्र व-ह-न-वर्णानां च आवृत्तिः संलोक्यते। अतः अत्र अनुप्रासालङ्कारोऽस्ति।

अपि च, "ताप-वह्नि" इत्यत्र उपमेय-भूते तापे उपमानभूतस्य वह्नेः अभेदारोपात् अत्र रूपकालङ्कारोऽपि वर्त्तते।

पुनश्च पद्येऽस्मिन् "सुधारया"-पदं श्लिष्टमपि भवितुमर्हति। सुधावत् रयः अर्थात् धारा, प्रवाहो यस्याः सा सुधा-रया। अन्यार्थे, सुधारया अर्थात् शोभन-धारया उत्तम-स्रोतसा वा सा गङ्गा मधुरा, कमनीया। इत्थं श्लेषालङ्कारस्य समावेशोऽपि वर्त्तते। अतः उल्लिखिते पद्ये अनुप्रास-श्लेषयोः सम्मिश्रणं लभ्यते।

➢ **यमकम्**

विश्वनाथ-कविराजेन साहित्यदर्पण-ग्रन्थे यमकालङ्कारस्य लक्षणमेवं निरूपितम् -

'सत्यर्थे पृथगर्थाया: स्वर-व्यञ्जन-संहतेः।
क्रमेण तेनैवावृत्ति-र्यमकं विनिगद्यते॥' (सा.द.१०/८)

आधुनिक-काव्यशास्त्रिणा अभिराज-राजेन्द्रमिश्रेणापि कथितं यत् -

'सम-क्रमेणैवावृत्तिः स्वर-व्यञ्जन-संहतेः।
सत्यर्थे पृथगर्थाया यमकं तन्निगद्यते॥' (अभि.यशो. पृ.१०५)

अर्थे सति भिन्नार्थ-बोधकानां स्वर-व्यञ्जनवर्ण-समूहानां क्रमानुसारम् आवृत्तिः यदि भवति, तत्र यमकालङ्कार: कथ्यते।

कवेः मेहेरस्य 'पुष्पाञ्जलिविचित्रा'-काव्यात् 'दुर्गादेवी-पञ्चकम्' इति स्तोत्रस्य पद्यमेकं प्रस्तूयते यमकस्य उदाहरणस्वरूपम्। यथा –

'अस्माकमन्तःकरण-प्रदूषणं
भस्मीकुरु त्वं तमसां निरासिनी।
शर्वाणि ! सर्वाणि पवित्रय स्वयं
प्रसार्य पर्यावरणं सुनिर्मलम्॥' (दुर्गादेवीपञ्चकम्, ४/पुष्पाञ्जलिविचित्रा)

उल्लिखिते पद्ये 'शर्वाणि' 'सर्वाणि' इत्यत्र स्वर-व्यञ्जनानां क्रमिकावृत्तिः विलोक्यते। अलङ्कार-क्षेत्रे यमकादौ सादृश्य-विवेचने र-ड-ल-वर्णानां सादृश्यं तथा श-स-वर्णयोः सादृश्यमपि स्वीक्रियते। 'शर्वाणी'-पदस्य सम्बोधने 'शर्वाणि' इति रूपं भवति। पुनः 'सर्वाणि' इति पद-रूपं सर्व-शब्दस्य क्लीवलिङ्ग-बहुवचने

भवति। अत्र उभयोः पदयोः सार्थता विद्यते, अर्थोऽपि पृथक् भवति। अतः पद्येऽस्मिन् यमकालङ्कारो वर्त्तते। पुनश्च अत्र पद्ये "स-म-क-त-म-र-व-य-प्रभृतीनां वर्णानाम् आवृत्तिहेतोः अनुप्रासालङ्कारोऽपि विद्यते।

यमकस्य उदाहरणमेकं प्रस्तूयते कवेः मेहेरस्य मातृगीतिकाञ्जलि-काव्यात् दशरूप-गीतिकायाः एवम् -

'कल्कि-कलेवर ! कर-करवालम्,
वहन् पुण्यमय-वह्नि-विशालम्।' (दशरूप-गीतिका, १०/मातृगीतिकाञ्जलिः)

प्रोक्ते पद्ये 'कर-करवालम्' इत्यत्र 'कर' 'कर' इति स्वर-व्यञ्जनानां क्रमिकावृत्तिः संदृश्यते। अतः अत्र यमकालङ्कारो वर्त्तते। प्रथमः 'कर'-शब्दः हस्तार्थकः सार्थक एव। अपरः 'करवाल'-शब्दतः खण्डितः कर-शब्दः निरर्थकः भवति। पुनश्च 'कल्कि-कलेवर' इत्यत्र क-ल-वर्णयोः आवृत्तिहेतोः अनुप्रासालङ्कारोऽपि समाविष्टः दृश्यते। कवेः मेहेरस्य 'मौनव्यञ्जना'-काव्यस्य 'सकला सुकल्याणी' इति कवितायां यमकस्य उदाहरणमेकम् -

'दुर्गासि दुर्गतिहा रचितेतिहासा
स्वर्ग-सुखदा पावनी शुभ्र-हासा।'
'उत्तिष्ठ प्राणिगण-समुद्धारणाय रण-रुद्राणी
सकला सकलानां सुकल्याणी॥' (सकला सुकल्याणी/मौनव्यञ्जना)

अत्र 'रचितेतिहासा' 'शुभ्र-हासा' इत्यत्र 'हासा' इति स्वरव्यञ्जनानां क्रमिकावृत्ति-हेतोः प्रान्त-यमकं बुध्यते। पुनः 'सकला सकलानाम्' इत्यत्र 'सकला' इति स्वर-व्यञ्जनानां क्रमिकावृत्तिवशाद् आद्य-यमकं लभ्यते। प्रथमः 'सकला'-शब्दः (कला-सहिता इत्यर्थः) सार्थकः। खण्डितत्वात् द्वितीयः निरर्थकः। पुनश्च उल्लिखिते उदाहरणे द-र-ग-त-ह-स-ण-क-ल-वर्णानाम् अनेकावृत्ति-हेतोः अनुप्रासालङ्कारोऽपि लभ्यते।

➢ **<u>उपमा</u>**

विश्वनाथ-कविराजस्य मतानुसारम् उपमालङ्कारस्य लक्षणं वर्तते यत् -

साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः॥' (सा. द. १०/१४)

अभिराज-राजेन्द्रमिश्रस्य अभिराज-यशोभूषणे उपमायाः लक्षणं कथितमस्ति एवम् -

'वैधर्म्य-रहितं साम्यं यत्र वाच्यं क्वचिद् द्वयोः।
वाक्यैक्ये सोपमा पूर्णा चतुरङ्ग-समन्विता॥' (अभि.यशो. पृ.१०८)

एतल्लक्षणानुसारं यदि एकस्मिन् वाक्ये उपमानोपमेययो: वैधर्म्यरहित-सादृश्यं कथितं भवति, तर्हि तत्र उपमालङ्कारो निरूप्यते। उपमेयः, उपमानः, साधारण-धर्मः, उपमावाचक-शब्दश्चेति चत्वारि अङ्गानि यत्र

उपमायां वर्ण्यते, तत्र पूर्णोपमा भवति। कवि-हरेकृष्ण-मेहेरस्य विविध-काव्येषु उपमालङ्कारस्य यथास्थानं कमनीय-प्रयोगो दृश्यते। उदाहरणस्वरूपम्, मातृगीतिकाञ्जलि-काव्यस्य अभिज्ञान-गीतिकायाः पद्यमेकम् -

'रवि-सङ्काशः स्वयं-प्रकाशः,
संसरणे त्वमनन्ताकाशः।' (अभिज्ञान-गीतिका, १/मातृगीतिकाञ्जलिः)

अत्र व्यक्तिः (त्वं) उपमेयः, रविः उपमानः, स्वयं-प्रकाशत्वं साधारणधर्मः, सङ्काशः (समानः) उपमावाचक-शब्दो भवति। अत्र चतुरङ्ग-समावेशात् पूर्णोपमा विद्यते। पुनश्च व्यक्तिः (त्वं) उपमेयः, अनन्ताकाशः उपमानः। अत्र न भवति उपमा। अपितु उपमेये उपमानस्य अभेदारोपाद् रूपकालङ्कारो वर्त्तते। कवेः मेहेरस्य 'मौनव्यञ्जना'-काव्यात् उपमालङ्कारस्य उदाहरणमेकम् –

'कदाचित् स्वल्प-कथनेनापि
प्रकाशतामभ्येति बह्वभिप्रायः,
यथा व्यञ्जना-रञ्जिता अभिधा॥' (मौनव्यञ्जना/मौनव्यञ्जना)

अत्र विद्यते 'अभिप्रायः' उपमेयः, 'अभिधा' उपमानः, 'भाव-प्रकाशता' साधारण-धर्मः, 'यथा' उपमावाचकः शब्दः। अतः उपमालङ्कारः सुपरिस्फुटः। "व्यञ्जना, रञ्जिता" इत्यत्र ञ्-ज-वर्णयोः आवृत्ति-हेतोः अनुप्रासोऽपि भवति। कवेः मेहेरस्य 'उत्कलीय-सत्कला' इत्याख्यात् काव्यात् उपमालङ्कार-संयुतं पद्यमेकं परिवेष्यते एवं रूपम् –

'मन्दाकिनीव पुनती नाशित-मन्दा,
संस्कृति-सुरुचा सञ्चारित-मकरन्दा।
वसुन्धरा सा सिन्धु-विलासा
स्निग्ध-बन्धना महीयताम्।
उत्कल-जननी सत्कला-धना महीयताम् ॥' (उत्कलीय-सत्कला, १)

उल्लिखिते गीते उत्कल-वसुन्धरा भवति उपमेयः, मन्दाकिनी उपमानः, साधारणधर्मः पावनकारित्वम् (गुणः) अथवा पावन-क्रिया। अत्रास्ति उपमावाचक-शब्दः 'इव'। अतः अस्मिन् उदाहरणे चतुरङ्ग-समन्वयात् पूर्णोपमा भवति। एतद्व्यतिरिक्तमत्र अनुप्रासस्यापि बाहुल्यं दृश्यते। "मन्दाकिनी, मन्दा" इत्यत्र म-न-द्-वर्णानाम् आवृत्तिः, "संस्कृति, सुरुचा, सञ्चारित, मकरन्दा" इत्यत्र स-क-र-त-च-वर्णानाम्, "वसुन्धरा सा सिन्धु, विलासा, स्निग्ध, बन्धना" इत्यत्र व-स-न-ध-वर्णानां च असकृत् आवृत्तिः। अतः अनुप्रासालङ्कारः। "मन्दा, मकरन्दा" इत्यत्र अन्त्यानुप्रासोऽपि दृश्यते। एवम् उपमानुप्रासयोः मिश्रणमुपलभ्यते। "मन्दाकिनीव पुनती नाशित-मन्दा" इत्यत्र "मन्दा" पदस्य क्रमिकावृत्तिहेतोः सव्यवधानं यमकमपि लक्ष्यते।

कवेः मेहेरस्य 'हासितास्या वयस्या' इत्याख्यस्य काव्यस्य विदेशीय-च्छन्दोबद्धायां तान्का-कवितायाम् उपमालङ्कारस्य वर्णनमेकं प्रस्तूयते। यथा – 'जगन्मोहिनी/वशीकरोति विश्वं/प्रकामं काम्या/भ्राम्य-दूरभाषिका/स्वाधीन-भर्त्तृकेव॥' (तान्का-कविता/ हासितास्या वयस्या)

प्रोक्ते उदाहरणे भवति दूरभाषिका उपमेयः, स्वाधीन-भर्त्तृका नायिका उपमानः। साधारणधर्मः विमोहिनी शक्तिः अथवा वशीकरण-क्रिया। उपमावाचक-शब्दः 'इव' वर्त्तते। अत्रापि चतुरङ्ग-समन्वय-कारणात् पूर्णोपमा भवति। पुनः दूरभाषिकायाः नायिकायाश्च उभयोः कृते कार्य-लिङ्ग-विशेषण-साम्यमपि वर्त्तते। नायिका स्वगुणैः जगत् मोहयति, सर्वं वशीकरोति, पत्युः नितान्तं काम्या च भवति। दूरभाषिकाऽपि समस्तं संसारं मोहयति, विश्वं स्वायत्तं करोति, ग्रहीतृ-जनानां नितरामभिलषिता भवति। अत्र उपमेयोपरि उपमानस्य व्यवहार-समारोपात् समासोक्ति-र्नामालङ्कारोऽपि लक्ष्यते।

➢ **रूपकम्**

विश्वनाथ-कविराजस्य मतानुसारं रूपकालङ्कारस्य लक्षणं वर्तते यत् –

'रूपकं रूपितारोपाद् विषये निरपह्नवे।' (सा.द.१०/२८)

अभिराज-राजेन्द्रमिश्रस्य मतानुसारं रूपकालङ्कारस्य लक्षणं भवति -

"निषेधहीने विषयेऽप्युपमेयान्यसंज्ञके।
आरोप उपमानस्यरूपकं हि समुच्यते ॥" (अभि. यशो. पृ. ११३)

एतल्लक्षणानुसारं यदा निषेध-रहिते उपमेये उपमानस्य अभेदारोपो भवति, तदा रूपकालङ्कारो निगद्यते।

कवेः मेहेरस्य काव्येषु रूपकालङ्कारः अनेकत्र समाविष्टः। 'जीवनालेख्यम्' इति काव्यस्य कवितासु बहुशो रूपकालङ्कारस्य प्रयोगः दृष्टिगोचरो भवति। उदाहरणार्थम्, "जीवन-विहङ्गमः" इति कवितायाः कियदंशः एवम् -

'जीवनं नाम विहङ्गमः
अवसाद-शून्याङ्गो नीड-गृहङ्गमः,
हृदय-व्योम्नि विहरति
प्रसारित-पक्षः स्वलक्ष्यं प्रति॥' (जीवन-विहङ्गमः, १/संस्कृतमञ्जरी, २००५)

अत्र उदाहरणे जीवनम् उपमेयः, विहङ्गमः उपमानः। उपमेये उपमानस्य अभेदारोपो वर्णितः। पुनश्च हृदयम् उपमेयः, व्योम उपमानो भवति। अत्रापि उपमेये उपमानस्य अभेदारोपः परिलक्ष्यते। अतः अयं रूपकालङ्कारस्य उदाहरणं वर्त्तते।

पुनः अत्र अनुप्रासोऽपि लभ्यते। यतः "शून्याङ्गो गृहङ्गमः" इत्यत्र ङ्-ग-वर्णयोः आवृत्तिः, "हृदय-व्योम्नि विहरति" इत्यत्र ह-य-व-वर्णानाम्, तथा "प्रसारित-पक्षः लक्ष्यं प्रति" इत्यत्र प-र-त-क्ष-वर्णानाम् आवृत्तिः दृश्यते। रूपक-प्रसङ्गे कवेः मातृगीतिकाञ्जलि-गीतिकाव्यात् नववर्ष-गीतिकायाः कियदंशः उदाह्रियते। अत्र कविना मेहेरेण रूपकल्प-माध्यमेन निगद्यते –

'हृदय-मन्दिरे प्रेम-ज्योति-र्विराजताम्,
मनोऽरविन्दं विन्दतु विमलं सुन्दरताम्।
सुचिन्तनं चिरन्तनं
हरतु विषाद-विमर्षम्।
शुभं भवतु नववर्षम्॥' (नववर्ष-गीतिका, १/मातृगीतिकाञ्जलिः)

उल्लिखिते गीते हृदयम् उपमेयः, मन्दिरम् उपमानः। प्रेम उपमेयः, ज्योतिः उपमानः। मनः उपमेयः, अरविन्दम् उपमानः। एवम् उपमेयेषु सम्पृक्तानाम् उपमानानाम् अभेदारोपः कथितोऽस्ति। अतः रूपकालङ्कारो विद्यते।

पुनश्च गीतेऽस्मिन् अनुप्रासोऽपि सन्निवेशितः। यथा, "ज्योतिः, विराजताम्" इत्यत्र ज्-त-वर्णयोः सादृश्यम्, "मन्दिरे, अरविन्दं, विन्दतु, सुन्दरताम्" इत्यत्र र-व-न-द्-वर्णानामावृत्तिः समवलोक्यते। "सुचिन्तनं चिरन्तनम्" इत्यत्र च-त-न-वर्णानाम्, "विषाद-विमर्षम्" इत्यत्र व-ष-वर्णयोश्च आवृत्तिर्दृश्यते। अतः अत्र अनुप्रासालङ्कारोऽपि वर्त्तते। रूपकस्य अन्यदेकमुदाहरणं पुनः कवेः मातृगीतिकाञ्जलिः-गीतिकाव्यात् शिवसङ्कल्प-गीतिकायाः प्रस्तूयते एवंप्रकारकम् -

आत्म-रथि-रते कलेवर-रथे
करण-तुरङ्गम-पुङ्गवाः,
विवेक-सारथि-विभास्वर-पथे
चलन्तु संयम-वैभवाः।
रश्मि-र्यदस्ति सूक्ष्ममकल्पम्।
मनो भवतु मे शिव-सङ्कल्पम्॥' (शिवसङ्कल्प-गीतिका, ५/ मातृगीतिकाञ्जलिः)

उपर्युक्ते उदाहरणे रूपकालङ्कारस्य सुन्दर-समन्वयः संदृश्यते। आत्मा उपमेयः, रथी उपमानः। कलेवरः उपमेयः, रथः उपमानः। करणम् (इन्द्रियम्) उपमेयः, तुरङ्गमः (अश्वः) उपमानः। विवेकः उपमेयः, सारथिः उपमानः। संयमः उपमेयः, वैभवम् उपमानः। मनः उपमेयः, रश्मिः उपमानः। एवम् उपमेयेषु सम्पृक्तोपमानानाम् अभेदारोपो वर्णितः। रूपकस्य अपरमेकमुदाहरणं कवेः देश-गीतिकायाः एका पङ्क्तिः एवंरूपा –

'मानवताया रम्य-शतदलं

हृदय-सरस्या विजयते।

भारतमाता परम-नमस्या विजयते ॥' (देश-गीतिका, ६/मातृगीतिकाञ्जलिः)

उदाहरणेऽस्मिन् मानवता उपमेयः, शतदलम् अर्थात् पद्मम् उपमानः। पुनश्च हृदयम् उपमेयः, सरसी उपमानः। एवम् उपमेयोपरि सम्पृक्तस्य उपमानस्य अभेदारोपाद् रूपकालङ्कारो वर्त्तते।

रूपकालङ्कारस्य उदाहरणमेकं परिवेष्यते कवेः मेहेरस्य 'अस्त्रमजस्त्रम्' इत्याख्यात् काव्यात्। 'महौषधम्' इति कवितायाः कियदंशः एवम् -

'जन-जागरणमेव महौषधम्

कर्त्तुं भ्रष्टाचार-व्याधि-वधम्।

संस्कार-समुच्चार एव महामन्त्रः

सुसञ्चालित-जनतन्त्र-यन्त्रः॥' (महौषधम्/अर्वाचीनसंस्कृतम्, २००४-२००५)

अत्र उदाहरणे जन-जागरणम् उपमेयः, महौषधम् उपमानः। भ्रष्टाचारः उपमेयः, व्याधिः उपमानः। उपमेयोपरि सम्पृक्तोपमानस्य अभेदारोपाद् रूपकालङ्कारो भवति। कवेः मातृगीतिकाञ्जलि-गीतिकाव्यस्य प्रणयि-गीतिकायां तथा प्रणयिनी-गीतिकायां रूपकल्पस्य बहूनि तत्त्वानि समुपलभ्यन्ते। उदाहरण-स्वरूपं प्रणयि-गीतिकायाः पङ्क्तिरेका प्रस्तूयते। नायिकां प्रति नायकः कथयति एवम् -

'ऋक् त्वमसि साम-शोभना, ध्वने-र्मञ्जुला व्यञ्जना।

मम मर्मोद्गारस्य वा, विभाविता कविता नवा।

प्रियाभिलाषा मधुरा भाषा

भावाश्लिष्ट-निचोला त्वम्।

लीला त्वम्, लोला त्वम्॥' (प्रणयि-गीतिका, २/मातृगीतिकाञ्जलिः)

प्रोक्त-गीतिकायाम् एकस्य उपमेयस्य विविधा उपमानाः परिकल्पिताः। (अहं) नायकः उपमेयः, साम उपमानः। त्वम् अर्थात् नायिका उपमेयः, ऋक् उपमानः। नायकः उपमेयः, ध्वनिः उपमानः; नायिका

उपमेयः, व्यञ्जना उपमानः वर्त्तते। नायकः उपमेयः, मर्मोद्गारः उपमानः; नायिका उपमेयः, कविता उपमानः। नायकः उपमेयः, भावः उपमानः; नायिका उपमेयः, भाषा उपमानः। एवंप्रकारेण परस्पर-सम्बन्ध-वर्णनायाम् उपमेयोपरि उपमानस्य अभेदारोपाद् अत्र रूपकालङ्कारो निश्चीयते।

एतद्व्यतिरिक्तं पद्येऽस्मिन् 'त्वमसि, साम' इत्यत्र म-स-वर्णयोः, 'मञ्जुला, व्यञ्जना' इत्यत्र ञ्-ज-वर्णयोः, 'मम, मर्मोद्गारस्य' इत्यत्र म-र-वर्णयोः, 'विभाविता, कविता, नवा' इत्यत्र व-त-वर्णयोः आवृत्ति-हेतोः अनुप्रासालङ्कारोऽपि सन्निवेशितो लक्ष्यते। अतः रूपकानुप्रासालङ्कारयोः मिश्रणं समनुभूयते। अपर-पक्षे प्रणयिनी-गीतिकायामपि एकस्य उपमेयस्य अनेके उपमानाः कविना परिकल्पिताः। उदाहरणार्थमेका पङ्क्तिः। अत्र नायकं प्रति नायिका वदति एवम् -

'अलङ्कारस्य चारुता, प्रदीपिका ज्योतिर्युता।
सत्यरूपस्य नित्यता, गणित-सखी संख्या मता।
त्वमनुप्रासः सरस-न्यासः
पद-लालिती विलोलाऽहम्।
लीलाऽहम्, लोलाऽहम्॥' (प्रणयिनी-गीतिका, ८/ मातृगीतिकाञ्जलिः)

अस्यां गीतिकायाम् – (त्वम्) नायकः उपमेयः, अलङ्कारः उपमानः; (अहं) नायिका उपमेयः, चारुता उपमानः। नायकः उपमेयः, ज्योतिः उपमानः; नायिका उपमेयः, प्रदीपिका उपमानः विद्यते। नायकः उपमेयः, सत्यरूपम् उपमानः भवति, तदा नायिका उपमेयः, नित्यता उपमानः। नायकः उपमेयः, गणितम् उपमानः भवति, तदा नायिका उपमेयः, संख्या उपमानः। यदा नायकः उपमेयः, अनुप्रासः उपमानः विद्यते, तदा नायिका उपमेयः, पदलालिती उपमानः। एवं परस्पर-सम्बन्ध-वर्णनायाम् उपमेयोपरि सम्पृक्तस्य उपमानस्य अभेदारोपाद् अत्र रूपकालङ्कारो लभ्यते।

अपि च, "ज्योतिर्युता, सत्यरूपस्य नित्यता" इत्यत्र स-त-य-वर्णानाम्, "सखी संख्या" इत्यत्र स-ख-वर्णयोः आवृत्तिवशात् अत्र अनुप्रासालङ्कारोऽपि बुध्यते। इत्थं रूपकानुप्रासयोः मिश्रणं संदृश्यते। कविना अस्मिन् प्रसङ्गे विविधं वैदिक-काव्यिक-साङ्गीतिक-साहित्यिक-गाणितिक-तत्त्वजातम् उपमानरूपेण परिकल्पितम्। अतः कवेः मेहेरस्य वर्णनायां किञ्चित् नूतनत्वमपि प्रतिभाति।

- **समासोक्तिः**

साहित्यदर्पणानुसारं समासोक्तिरिति अलङ्कारस्य लक्षणमित्थं निगदितम् -

'समासोक्तिः समैर्यत्र कार्य-लिङ्ग-विशेषणैः।

व्यवहार-समारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥' (सा. द. १०/५६-५७)

अभिराज-राजेन्द्रमिश्रेण स्वकाव्यशास्त्रे समासोक्ति-लक्षणं निरूपितमस्ति एवंरूपम् -

प्रस्तुतेऽप्रस्तुतस्यैव कार्य-लिङ्ग-विशेषणैः।

समैर्यत्र समारोपः सा समासोक्तिरुच्यते॥' (अभि. यशो. पृ. १२६)

एतल्लक्षणानुसारं यत्र समान-कार्य-लिङ्ग-विशेषणैः उपमेये उपमानस्य व्यवहारः समारोप्यते, तत्र समासोक्ति-र्नामालङ्कारो भवति। प्रसङ्गतः समासोक्ति-कृते कवेः हरेकृष्ण-मेहेरस्य मातृगीतिकाञ्जलि-काव्यान्तर्गतायाः सङ्गीत-गीतिकायाः उदाहरणमेकं प्रस्तूयते एवम् -

'पल्लविनी प्रफुल्ल-कुसुमा-वल्लरी,
गति-मन्दं नृत्यति छन्दः-सुन्दरी।
सुनिनदत्-कङ्कणं
स्फुट-भाव-कलाभिनयम्,
नियतं युत-ताल-लयम्।
प्रकृत्याः प्रतिकणं
नियतं युत-ताल-लयम्,
विततं सङ्गीतमयम्॥' (सङ्गीत-गीतिका, ४/मातृगीतिकाञ्जलिः)

अस्मिन् गीते उपमेय-भूतायाः वल्लर्याः (लतायाः) उपरि उपमान-भूतायाः सुन्दरी-नायिकायाः समान-कार्य-लिङ्गान्वितस्य व्यवहारस्य समारोपः क्रियते। लता नायिका च उभे स्त्रीलिङ्गे विद्येते। उभयोः मन्दगति-नर्त्तनादिकं कार्यं समानं भवति। अतः इदं समासोक्तिरिति अलङ्कारस्य प्रकृष्टमुदाहरणं वर्त्तते।

➢ **<u>व्यतिरेकः</u>**

साहित्यदर्पणकारस्य विश्वनाथकविराजस्य मतेन व्यतिरेकालङ्कारस्य लक्षणमेवम् -

'आधिक्यमुपमेयस्योपमानान् न्यूनताऽथवा। व्यतिरेकः ॥' (सा.द.१०/५२-५३)

आधुनिक-काव्यशास्त्रिणा अभिराज-राजेन्द्रमिश्रेण स्वग्रन्थे व्यतिरेकस्य लक्षणं कथितम् -

'आधिक्यमुपमेयस्य न्यूनता वोपमानतः।

सोऽप्यनेकविधः प्रोक्तो व्यतिरेकस्तु कोविदैः॥' (अभि. यशो. पृ. १२३)

एतल्लक्षणानुसारं यत्र उपमानात् उपमेयस्य उत्कर्षः, अपकर्षो वा वर्ण्यते, तत्र व्यतिरेक-नामकः अलङ्कारो भवति। कवेः हरेकृष्णमेहेरस्य 'सौन्दर्य-सन्दर्शनम्' इत्याख्यस्य काव्यस्य 'सौन्दर्यपञ्चकम्' इति कवितायाः व्यतिरेकालङ्कारस्य उदाहरणमेकं प्रस्तूयते। पङ्क्तिः एवंरूपा -

'नेत्र-निर्जित-नीलोत्पलायाः
द्युति-पलायित-चपलायाः
कान्तायाः कान्त-कुन्तलायाः
समलङ्कृत-भूतलायाः
विलोक्य लपनमतन्द्रो धृत-म्लानिः,
सलज्जं जलद-जाल-मध्ये
साभिमानमात्मानं गोपायते
वराको राकाजानिः,
कलङ्क-लेखाङ्कित-कलेवरः
कलितामृत-किरणोऽपि कलाकरः॥' (सौन्दर्य-पञ्चकम्, १/काव्यसञ्जीवनी, २०१५)

उदाहरणेऽस्मिन् नायिकायाः नेत्र-रूपात् उपमेयात् नीलकमल-रूपस्य उपमानस्य न्यूनता वर्णिताऽस्ति। पुनः नायिकायाः द्युतिद्वारा पराजितस्य चपला-रूपस्य उपमानस्यापि न्यूनत्वं दर्शितम्। अत्र नायिकायाः मुखं दृष्ट्वा कलाकर-चन्द्रः लज्जितः सन् आत्मानं मेघजालमध्ये लुक्कायितं करोति, अर्थात् मुखरूपात् उपमेयात् चन्द्र-रूपस्य उपमानस्य अपकर्षो वर्णितोऽस्ति। अतः इदं व्यतिरेकालङ्कारस्य उदाहरणं भवति।

अपि च प्रोक्ते उदाहरणे 'नीलोत्पलायाः, 'पलायित-चपलायाः' इति पदेषु 'प-ला-याः' इति वर्णानाम्, 'कान्त-कुन्तलायाः', 'भूतलायाः' चेत्यादि-पदेषु त-ला-याः इति स्वर-व्यञ्जनानां क्रमिकावृत्तिवशाद् अन्त्य-यमकं परिलक्ष्यते, यद्यपि पदेषु सर्वत्र सार्थता न दृश्यते। पुनश्च तेषु पदेषु क-न-त-ल-य-वर्णानाम् आवृत्तिहेतोः अनुप्रासोऽपि विद्यते। 'सलज्जं जलद-जाल-मध्ये', 'साभिमानमात्मानम्', 'वराको राका', 'कलङ्क-लेखाङ्कित-कलेवरः' चेत्यादिषु पदेषु स्वर-व्यञ्जनानाम् अनेकावृत्ति-हेतोः अनुप्रासालङ्कारो भवति। एवं प्रकारेण सन्ति अनुप्रास-यमक-व्यतिरेकालङ्काराः सम्मिश्रिताः। अत्र मुख-सौन्दर्यादि-हानि-कारणात् काव्यलिङ्गम् इति अलङ्कारोऽपि लक्ष्यते। एवमनेकालङ्काराणां सम्मिश्रणमुपलभ्यते।

उपसंहारः

उपर्युक्त-विवेचनेन सुस्पष्टमिदं ज्ञायते यत् कविना हरेकृष्ण-मेहेरेण प्रायश: प्रचलितानां प्रसिद्धानां विविधालङ्काराणां प्रयोगो विहितोऽस्ति स्वकीय-काव्येषु। अत्र मुख्यरूपेण उपमा, अनुप्रासः, यमकम्, रूपकम्, समासोक्तिः, व्यतिरेकः चेत्यादीनामलङ्काराणां यथास्थानं संयोजना सहजतया मनोज्ञ-रूपेण च कृतास्ति। कवेः रचनाशैली सहृदय-वेद्या रमणीया च विभाति। भाषा-भावयोः परस्परं सुसमन्वयः सम्यग् अनुभूयते। विविधैः पारम्परिकैः छन्दोभिस्तथा स्वकीय-मौलिकैः नव्यच्छन्दोभिः तस्य कविताः प्रणीताः। अतः तस्य काव्येषु पारम्परिकतायाः आधुनिकतायाश्च समन्वयः परिलक्ष्यते। तस्य काव्येषु साङ्गीतिकतया साकम् आनुप्रासिकतायाः लालित्यं माधुर्यं वा संदृश्यते। कवेः कलात्मिका सुकोमला मधुरा पदावली पाठकानां मनांसि मोदयति। वैदर्भी-रीत्याः प्रसादगुणस्य च प्राधान्यमस्ति कवेः रचनासु। विविध-काव्यगुणैः शोभते कमनीया कवेः रचनावली। तस्य काव्येषु जटिलता, दुर्बोधता चेत्यादिकं दूषणं नास्ति। नानालङ्काराणां प्रयोगे कुत्रापि काव्य-दोषादिकं न परिलक्ष्यते। यथास्थानं भावानुकूलं विविधालङ्कार-संयोजनं कवेः हरेकृष्ण-मेहेरस्य कविता-सौन्दर्यं नितरां वर्धयति इति कवे-र्लेखनी नूनमभिनन्दनीया।

सन्दर्भग्रन्थसूचिः --

1. उपाध्याय, आचार्य.बलदेव. (१९८२) *संस्कृत साहित्य का इतिहास* शारदा निकेतन वाराणसी.
2. कविराजः, विश्वनाथः. (१९७७) *साहित्यदर्पणः* (नवम संस्करण.).मोतीलाल-बनारसीदास दिल्ली.
3. मिश्रः, अभिराजराजेन्द्रः. (२००६) *अभिराज-यशोभूषणम्.* वैजयन्त प्रकाशन इलाहाबाद.
4. शुक्लः, हीरालालः. (सम्पा.) (२००२) *ए हिस्ट्री अफ् मडर्न् संस्कृत् लिट्रेचर्.* निउ भारतीय बुक् कर्पोरेशन् दिल्ली.
5. मेहेरः, हरेकृष्णः. (१९९७) *मातृगीतिकाञ्जलिः,* कलाहाण्डि-लेखक-कलापरिषद् ओड़िशा.
6. मेहेरः, हरेकृष्णः. *पुष्पाञ्जलि-विचित्रा, स्वस्तिकविताञ्जलिः, अस्रमजस्रम्, जीवनालेख्यम्, मौनव्यञ्जना, उत्कलीय-सत्कला, हासितास्या वयस्या* (जालस्थानम् : www.hkmeher.blogspot.com)
7. Contributions of Harekrishna Meher to Sanskrit Literature: WebLink:
8. http://tapasvini-kavya.blogspot.in/2013/04contributions-of-drharekrishna-meher-to.html
9. मेहेरः, हरेकृष्णः. (२०१२) संस्कृति-गीतिका. *पद्यबन्धा, (१)*, वीणापाणि-संस्कृत-पीठम् भोपालम् मध्यप्रदेशः
10. मेहेरः, हरेकृष्णः. (२०१७) आधुनिक संस्कृतसाहित्य में काव्यदिशा एक आकलन. *प्राचीप्रज्ञा ११-१२*
11. मेहेरः, हरेकृष्णः. (२००५) जीवनदशकम्. *संस्कृतमञ्जरी,* दिल्ली संस्कृत अकादेमी दिल्ली
12. मेहेरः, हरेकृष्णः. (२००४-२००५) महौषधम्. *अर्वाचीनसंस्कृतम्,* देववाणी परिषद्, दिल्ली
13. मेहेरः, हरेकृष्णः. (२०१५) सौन्दर्यपञ्चकम्. *काव्यसञ्जीवनी,* उत्कल-विश्वविद्यालयः भुवनेश्वरम्

14. त्रिपाठी, जयन्तकुमारः. (२०१२-२०१३) आधुनिक-संस्कृतसाहित्यं प्रति कवि-हरेकृष्णमेहेरस्य अवदानम्, *श्रद्धा ३-४*, ९४-११२, स्नातकोत्तर-संस्कृतविभागः गङ्गाधरमेहेर-स्वयंशासित- महाविद्यालयः सम्बलपुरम् ओडिशा, http://hkmeher.blogspot.in/2014/08/poet-harekrishna-mehers-contribution-to.html

Author's Detail

Name : डॉ. सस्मिता साहु

Designation : अध्यापिका

Address : संस्कृतविभागः,
पञ्चायत-महाविद्यालयः, बरगडम्, ओडिशा.

Email : sasmitasahu80@gmail.com

****

कारकषष्ठीनिषेधसूत्राणां विमर्शः

Uttam Majhi

शोधसारः

पाणिनिना विरचिता *अष्टाध्यायी* ग्रन्थस्य द्वितीयाध्यायस्य तृतीयपादस्य पञ्चषष्टितमं **कर्तृकर्मणोः कृति** (अ॰२/३/६५) सूत्रतः **अधिकरणवाचिनश्च** (अ॰२/३/६८) यावत् इमानि चत्वारि सूत्राणि कारकषष्ठी-विधायकानि। **कर्तृकर्मणोः कृति** (अ॰ २/३/६५) सूत्रानुसारेण कृत्प्रत्ययान्तपदयोगे अनभिहितयोः कर्तरि कर्मणि च षष्ठी विधीयते। यथा- कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। परन्तु कृत्प्रत्ययान्तपदयोगे कर्तरि कर्मणि च प्राप्ता षष्ठी **न लोकाव्ययनिष्ठाखलर्थतृनाम्** (अ॰ २/३/६९) इत्यनेन सूत्रेण प्रतिषिध्यते। अपि च **अकेनोर्भविष्यदाधमर्ण्ययोः** (अ॰ २/३/७०) इत्यनेन भविष्यति विहितस्य अकस्य, भविष्यति विहितस्य अधमर्ण्ये इनश्च प्रयोगे षष्ठी प्रतिषिध्यते। पाणिनीयव्याकरणे बहुविध-कृत्प्रत्ययाः सन्ति। कृद्योगे क्वचिद् षष्ठीविधीयते, क्वचिन्निषेधः, क्वचिच्च विकल्पः। यथा- उकञ्प्रत्ययान्तपदयोगे अव्यययोगे च षष्ठी प्रतिषिध्यते। परन्तु उकञ्प्रत्ययान्तकम्धातोः योगे तोसुन्कसुन्प्रत्ययान्ताव्यययोगे च षष्ठ्यप्रतिषेधः। कृदन्तशतृप्रत्ययान्तपदयोगे षष्ठी प्रतिषिध्यते। परन्तु शतृप्रत्ययान्तद्विष्धातोः प्रयोगे षष्ठीनिषेधो विकल्पेन विधीयते। निष्ठाप्रत्ययान्तपदयोगेऽपि षष्ठी प्रतिषेधः। परन्तु **क्तस्य च वर्तमाने** (अ॰ २/३/६७) इत्यनेन वर्तमाने निष्ठाप्रत्यययोगे षष्ठ्यपि प्राप्नोति। अपि च **अधिकरणवाचिनश्च** (अ॰ २/३/६८) इत्यनेन अधिकरणवाच्ये विहितस्य क्तप्रत्ययस्य च प्रयोगे अनभिहिते कर्तरि कर्मणि च षष्ठी विधीयते। अत उक्तसूत्रद्वयं **न लोकाव्ययनिष्ठाखलर्थतृनाम्**(अ॰ २/३/६९) इति निषेधस्यापवादः। परन्तु सर्वत्र कारकषष्ठीप्रतिषेधे सति शेषे षष्ठी तु स्यादेव। तर्हि निषेधस्य प्रयोजनं किम्? कुत्र षष्ठी कर्तव्या? कुत्र प्रतिषेधः करणीयः? कुत्र विकल्पेन विधीयते? षष्ठीनिषेधसूत्रस्य तात्पर्यं कथम्? इत्येतेषु विषयेषु संशयनिवारणाय कारकप्रकरणे षष्ठीनिषेधसूत्राणां महाभाष्य-काशिकादि वैयाकरणानां मतमुल्लिख्य '**कारकषष्ठीनिषेधसूत्राणां विमर्शः**' इति शोधप्रबन्धं प्रस्तूयते।

कुञ्चीशब्दाः – निषेधः, ल, उ, उक, अव्ययम्, निष्ठा, खलर्थः, तृन्, गामी, अक्, इण्

****

'निषेधः' इति नि-उपसर्गपूर्वकः सिध्-धातोः भावे घञ्प्रत्यये निष्पन्नः। पाणिनीयव्याकरणे षड्विधसूत्रेषु[1] अनिष्टवारणार्थं निषेधसूत्रस्यावश्यकता स्पष्टतया परिलक्षिता। यथा- कृत्प्रत्ययान्तपदयोगे कारकषष्ठीविधायक-

[1] "संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥" *संक्षिप्तसारव्याकरणम्,* "वृद्धिरादैजारालैचोऽङः" इति सूत्रस्य विवरणीटीका।
"संज्ञा च परिभाषा च विधिर्नियम एव च। प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥" *कातन्त्रव्याकरणम्,* "सिद्धो वर्णसमाम्नायः" (१/१/२) सूत्रस्य दुर्गटीका। "अधिकारो विधि संज्ञा निषेधो नियमस्तथा।
परिभाषा च शास्त्रस्य षड्विधं विदुः॥" *कातन्त्रव्याकरणम्,* "सिद्धो वर्णसमाम्नायः" (१/१/२) सूत्रस्य कालाचन्द्रः।

सूत्रं **कर्तृकर्मणोः कृति** (अ. २/३/६५) इत्यनेन कृत्प्रत्ययान्तपदयोगे अनभिहितयोः कर्तरि कर्मणि च षष्ठी-विधीयते। यथा- कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। अनन्तरम् **उभयप्राप्तौ कर्मणि** (अ. २/३/६६) इत्यनेन एकस्मिन्नेव कृति सति अनभिहितयोरुभयोः कर्तृकर्मणोर्युगपत् षष्ठीप्राप्तौ कर्मण्येव षष्ठीविभक्तिः स्यादिति। यथा- आश्चर्यो गवां दोहोऽगोपेन। **क्तस्य च वर्तमाने** (अ. २/३/६७) इत्यनेन वर्तमानार्थस्य क्तप्रत्ययान्तपदस्य योगे षष्ठी विभक्तिर्विधीयते। यथा- राज्ञां मतो बुद्धः पूजितो वा। परन्तु **अधिकरणवाचिनश्च** (अ. २/३/६८) इत्यनेन अधिकरणवाच्ये विहितस्य क्तप्रत्ययस्य च प्रयोगे अनभिहिते कर्तरि कर्मणि च षष्ठीविभक्तिः स्यादिति। यथा- इदमेषामासितं शायितं गतं भुक्तं वा। तर्हि कृत्प्रत्ययान्तपदयोगे कुत्र कुत्र षष्ठीविभक्तिः प्रतिषिध्यते? इति प्रश्नः। अस्मिन्विषये कारकप्रकरणे द्विविधं सूत्रं परिलक्षितम्। यथा- **न लोकाव्ययनिष्ठाखलर्थतृनाम्**(अ. २/३/६९), **अकेनोर्भविष्यदाधमर्ण्ययोः** (अ. २/३/७०) चेति। इत्याभ्यां सूत्राभ्यां कस्मिंश्चित् कृत्प्रत्ययान्तपदयोगेऽपि षष्ठी प्रतिषिध्यते। अतः कारकषष्ठीनिषेधसूत्राणां विषये समीक्षात्मकमालोचना प्रदीयतेऽस्मिन् प्रबन्धे।

षष्ठी निषेधस्य प्रथमसूत्रं **न लोकाव्ययनिष्ठाखलर्थतृनाम्** (अ. २/३/६९) इति। अनेन सूत्रेण **कर्तृकर्मणोः कृति** (अ. २/३/६५) इत्यनेन प्राप्ता षष्ठीप्रतिषेधः क्रियते। 'न' इति अव्ययम्, 'लोकाव्ययनिष्ठाखलर्थतृनाम्' इति षष्ठी बहुवचनम्। खलोऽर्थः खलर्थः, खलर्थ एव अर्थो येषां ते खलर्थाः, षष्ठीतत्पुरुषगर्भबहुव्रीहिः। लश्च उश्च उकश्च अव्ययञ्च निष्ठा च खलर्थश्च तृन् चेति लोकाव्ययनिष्ठाखलर्थतृनस्तेषां लोकाव्ययनिष्ठाखलर्थतृनाम्। **कर्तृकर्मणोः कृति** (अ. २/३/६५) इत्यतः 'कतृकर्मणोः, ' **षष्ठी शेषे** (अ. २/३/५०) इत्यतः 'षष्ठी', **अनभिहिते** (अ. २/३/१) इति सूत्रं चानुवर्तते। अतः सम्पूर्णसूत्रार्थम्- ल-उ-उक-अव्यय-निष्ठा-खलर्थ-तृन्-इत्येतेषां अनभिहिते कर्तरि कर्मणि च षष्ठीविभक्तिर्न भवति। दीक्षितेनोक्तम् "एषां योगे षष्ठी न स्यात्"[1]। तर्हि कुत्र षष्ठी निषेधः कर्तरि कर्मणि वा? इति विषयोऽस्पष्टम्।

सूत्रस्य आदौ 'उ+उक' इति स्थिते सवर्णदीर्घे[2] ऊकेति, ततो 'ल+ऊक' इति स्थिते गुणे[3] कृते लोकेति। 'ल' इत्यनेन व्याकरणे लडादीनां सामान्यग्रहणम्। परन्तु अत्र 'ल' इत्यनेन लादेशाः कृत्प्रत्ययाः गृह्यन्ते। दीक्षितेन लादेशेन शतृशानचौ[4] कृत्प्रत्ययौ गृह्येते। अतो दीक्षितेन केवलं शतृशानच्प्रत्यययोरुदाहरणं प्रदत्तम्-

---

[1] *सिद्धान्तकौमुदी,* अ. २/३/६९

[2] "अकः सवर्णे दीर्घः" (अ. ६/१/१०१)

[3] "आद्गुणः" (अ. ६/१/८७)

[4] "लटः शतृशानचावप्रथमासमानाधिकरणे" (अ. ३/२/१२४)

कुर्वन् कुर्वाणो वा सृष्टिं हरिः। परन्तु काशिकाकारेण लादेशेन शतृशानचौ कानच्क्कसू[1] किकिनौ[2] च एते सर्वे बुध्यन्ते। न्यासकारेण लादेशे कि-किन्-इत्यनयोः ग्रहणविषये उक्तम्-"यद्यपि किकिनोरलादेशत्वात् स्थानिवद्भावेन लग्रहणेन तयोर्ग्रहणं नास्ति। तथापि 'लिट् च' इत्यतिदेशेन भवितव्यम्। विशेषातिदेशे हि नान्तरीयकः सामान्यातिदेश इति; विशेषस्य सामान्येनाविनाभावादिति। तेन सामान्यनिबन्धनः प्रतिषेधः किकिनोरपि सिध्यतीति युक्तं तयोरपि ग्रहणम्।"[3] शेखरकारेणापि काशिकाकारस्य मतं समर्थितम्- "लादेशा इति लकारसम्बन्धिन इत्यर्थः, तेन 'दधिर्गाः' इति सिद्धम्। ....लिङादेशक्वस्वादियोगे लिड्वद्दशकिकिनोर्योगे च निषेधार्थं तस्यावश्यकत्वाच्च।"[4] अतो लडादेशग्रहणेन शतृ-शानच्-क्वसु-कानच्-कि-किन्-प्रत्ययाः गृह्यन्ते। उदाहराणाणि क्रमेण यथा- कुर्वन् कुर्वाणो वा सृष्टिं हरिः। ओदनं पेचितवान्। ओदनं पेचानः। पपिः सोमं ददिर्गाः। कृधातोः शतृप्रत्ययेन कुर्वन्, शानच्प्रत्ययेन कुर्वाण इति। तद्योगे 'सृष्टिम्' इत्यत्र अनुक्तकर्मणि; 'पेचानः' (पच्+लिट्=कानच्) इति कानच्प्रत्यययान्तपदयोगे 'ओदनम्' इत्यत्र अनुक्तकर्मणि; 'पेचितवान्' (पच्+लिट्= क्वसु) इति क्वसुप्रत्ययान्तपदयोगे 'ओदनम्' इत्यत्रानुक्तकर्मणि; 'पपिः' (पा+लिट्=कि) इति किप्रत्ययान्तपदयोगे 'सोमम्' इति अनुक्तकर्मणि; तथा 'ददिः' (दा+लिट् = किन्) इति किन्प्रत्ययान्तपदयोगे 'गाः' इति अनुक्तकर्मणि अनेन निषेधसूत्रेण प्राप्तां षष्ठीविभक्तिं बाधित्वा **कर्मणि द्वितीया** (२/३/२) इत्यनेन द्वितीयाविभक्तिरेव विधीयते।

'उ' इति कृतो विशेषणात् **येन विधिस्तदन्तस्य** (अ॰ १/१/७२) इत्यनेन तदन्तविधिना उकारान्तकृत्प्रत्यस्य ग्रहणम्, पुनः व्यपदेशिवद्भावेन[5] उप्रत्ययस्यापि ग्रहणं भवति। अतः 'उ' इत्यनेन उप्रत्ययान्तः उकारान्तश्च पदयोगे षष्ठीविभक्तिर्न भवति। उदाहरणं यथा- हरिं दिदृक्षुः। हरिम् अलङ्करिष्णुः। प्रथमोदाहरणे दृश्-धातोः सन्प्रत्यये दिदृक्ष् इति स्थिते **सनाशंसभिक्ष उः** (अ॰ ३/२/१६८) इत्यनेन उप्रत्यये 'दिदृक्षुः' इति पदं सिद्धम्। द्वितीयोदाहरणे अलं पूर्वकः कृ-धातोः उकारान्त-इष्णुच्-प्रत्यये[6] 'अलङ्करिष्णुः' इति पदं सिद्धम्। अतः 'दिदृक्षुः' इति उप्रत्ययान्तपदयोगे, 'अलङ्करिष्णुः' इति उकारान्तकृत्प्रत्ययान्तपदयोगे 'हरिम्' इत्यत्र अनुक्तकर्मणि षष्ठीनिषेधात् द्वितीयाविभक्तिर्भवति।

---

[1] "लिटः कानज्वा" (अ॰ ३/२/१०६), "क्वसुश्च" (अ॰ ३/२/१०७)

[2]"आदृगमहनजनः किकिनौ लिट् च"(अ॰ ३/२/१७१)

[3] न्यासः, *काशिकावृत्तिः*, अ॰ २/३/६९

[4] लघुशब्देन्दुशेखरः, अजन्तपुँल्लिङ्गदारभ्याव्ययीभावान्तो भागः, पृष्ठा ७९६-७९७

[5] व्यपदेशिवदेकस्मिन्, परिभाषा ३०

[6] "अलंकञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरूच्यपत्रपवृतुवृधुसहचर इष्णुच्" (अ॰ ३/२/१३६)

'उक' इत्यनेनापि षष्ठीनिषेधो विधीयते। यथा- दैत्यान् घातुको हरिः। 'इन्' धातोः उकञ्[1] प्रत्यये 'घातुकः' इति पदं सिद्धम्। अतः 'घातुकः' इति उकञ्प्रत्ययान्तपदयोगे अनुक्तकर्मणि 'दैत्यान्' इत्यत्र षष्ठीनिषेधात् द्वितीया विभक्तिर्भवति। परन्तु लक्ष्म्याः कामुको हरिः इत्यत्र उकञ्प्रत्ययान्तकामुकशब्दयोगे 'लक्ष्म्याः' इत्यत्र षष्ठीविभक्तिः कथं सम्भवम्? वार्तिककारेण समाधानं कृतम्- उकञ्प्रत्ययान्तकम्धातोः योगे भाषायां षष्ठीप्रतिषेधो न भवतीति[2]। अतः 'लक्ष्म्याः' इत्यत्र 'कामुकः' इति उकञ्प्रत्ययान्तपदयोगे अनभिहित-कर्मणि षष्ठीविभक्तिर्भवति। वार्तिकस्य व्याख्याने भाष्यकारेणोक्तम्- "उकप्रतिषेधे कमेर्भाषायां प्रतिषेधो न भवतीति वक्तव्यम्"[3]। अस्मिन् प्रसङ्गे शेखरकारेणोक्तम्- "इदञ्च भाषायामेव, भाषायामिति भाष्योक्तेः"[4]। सिद्धान्तकौमुदीकारेण वार्तिके[5] 'भाषायाम्' पदं नोल्लिखितम्।

अव्ययशब्देन **कृन्मेजन्तः** (अ॰ १/१/३९), **क्त्वातोसुन्कसुनः** (अ॰ १/१/४०) इति सूत्राभ्यां विहितानां कृत्प्रत्ययान्ताव्ययानां ग्रहणं भवति। उदाहरणं यथा- कटं कृत्वा, सुखं कर्तुमिति। अत्र क्त्वाच्प्रत्ययान्तं तुमुन्प्रत्ययान्तं च कृदन्ताव्ययपदयोगे क्रमेण कटं सुखं इत्यत्र अनुक्तकर्मणि षष्ठीनिषेधात् द्वितीया भवति। सूत्रस्थितोऽव्ययसम्बन्धे विमतं परिलक्षितम्। साहचर्यवशात् सूत्रे कृदन्ताव्ययमेव गृह्यत इति केचित्, कृदन्ताव्यययोगमात्रमेव षष्ठीविभक्तिः प्रतिषेधरिति केचित्, यथा- देवदत्तं हिरुक्[6]। अत्र हिरुक् इति अकृदन्ताव्यमेव तद्योगे षष्ठीनिषेधेन द्वितीया विधीयते। अस्मिन् विषये भाष्यकारेण किमपि नोक्तम्। सिद्धान्त-कौमुदीकारेणापि किमपि नोक्तम्। परन्तु वार्तिककारेण वार्तिकं कृतम्- **"अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः"**[7] इति। अर्थात् तोसुन्कसुनप्रत्ययान्तयोः कृदन्ताव्यययोः प्रयोगे षष्ठीविभक्तिरप्रतिषेधरेव। यथा- पुरा सूर्यस्योदेतो-राधेयः। पुरा क्रूरस्य विसृपो विरप्शिन्। इत्यत्र 'उदितः', 'विसृपः' इति तोसुन्कसुन्प्रत्ययान्तपदयोः प्रयोगे 'सूर्यस्य' तथा 'क्रूरस्य' अनयोः कर्मणि षष्ठी भवति एव।

---

[1] "लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्" (अ॰ ३/२/१५४)

[2] "उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः"। वार्तिकम्, *व्याकरणमहाभाष्यम्,* अ॰ २/३/६९

[3] *व्याकरणमहाभाष्यम्,* अ॰ २/३/६९

[4] *लघुशब्देन्दुशेखरः,* पृष्ठा ७९७

[5] "कमेरनिषेधः" वार्तिकम्, *सिद्धान्तकौमुदी,* अ॰ २/३/६९

[6] "इह कृदन्ताव्ययमेव गृह्यत इति केचित्। वस्तुतस्तु अविशेषाद् अकृदन्तमपीति तत्त्वम्। देवदत्तं हिरुक्। तत्कर्मकं वर्जनमित्यर्थः। *बालमनोरमा, सिद्धान्तकौमुदी,* अ॰ २/३/६९

[7] वार्तिकम्, *व्याकरणमहाभाष्यम्,* अ॰ २/३/६९

निष्ठा[1] इत्यनेन क्तक्तवतु-प्रत्ययोः ग्रहणम्। उदाहरणं यथा-विष्णुना हता दैत्याः। दैत्यान् हतवान्विष्णुः। प्रथमोदाहरणे 'हताः' इति भूते कर्मणि क्तप्रत्ययान्तपदयोगे 'विष्णुना' इत्यत्र षष्ठीनिषेधात् अनुक्तकर्तरि तृतीया भवति। द्वितीयोदाहरणे 'हतवान्' भूते कर्तरि क्तवतुप्रत्ययान्तपदयोगे अनुक्तकर्मणि 'दैत्यान्' इत्यत्र षष्ठीनिषेधात् द्वितीया विभक्तिर्भवति।

परन्तु **क्तस्य च वर्तमाने** (अ॰ २/३/६७) इत्यनेन वर्तमाने विहितस्य क्तप्रत्ययस्य योगे षष्ठी स्यादेव। यथा- राज्ञां मतं बुद्धः पुजितो वा। **अधिकरणवाचिनश्च** (अ॰ २/३/६८) इत्यनेन अधिकरणवाचिनः क्तस्य योगे कर्तरि कर्मणि च षष्ठी स्यादेव। यथा- इदमेषामासितं शयितं गतं भुक्तं वा। अतः सूत्रद्वयमिदं **न लोकाव्ययनिष्ठाखलर्थतृनाम्**(अ॰ २/३/६९) इति निषेधस्यापवादः। एतेन ज्ञापितं यत् भूते निष्ठायोगे कर्तरि कर्मणि च वाच्ये षष्ठीप्रतिषेधः कर्तव्यः। खलर्थशब्देन खलर्थवाचिप्रत्ययाः गृह्यन्ते। अतः "ईषद्दुः सुषुकृच्छ्राकृच्छ्रार्थेषु खल् इति कर्मणि खल्। अर्थग्रहणाद् 'आतो युच्' इति खलर्थको युजपि गृह्यते।"[2] उदाहरणं यथा- ईषत्करः प्रपञ्चो हरिणा। ईषत्पानः सोमो भवता। अत्र 'ईषत्करः' इति खल्प्रत्ययान्तपदयोगे अनुक्तकर्तरि 'हरिणा' इत्यत्र तथा 'ईषत्पानः' इति युच्प्रत्ययान्तपदयोगे अनुक्तकर्तरि 'भवता' इत्यत्र षष्ठीनिषेधात् तृतीया विभक्तिर्भवति।

तृन्-शब्देन प्रत्याहारः गृह्यते[3]। अतः **लटः शतृशानचावप्रथमासमानाधिकरणे** (अ॰ ३/२/१२४) इति सूत्रे शत्रादेशस्य शकारोत्तरवर्ती तृशब्दादारभ्य **तृन्** (अ॰ ३/२/१३५) इति नकारपर्यन्तम्। अतः तृन्-प्रत्याहारेण शानन्-चानश्-शतृ-तृन्प्रत्ययानां ग्रहणं भवति। उदाहरणं यथाक्रमे- सोमं पवमानः, आत्मानं मण्ड्यमानः, वेदमधीयन्, कर्ता लोकान्। उदाहरणेषु 'पवमानः' इति शानन्प्रत्ययान्तपदयोगे[4] 'मण्डयमानः' इति चानश्प्रत्ययान्पदयोगे[5] 'अधीयन्' इति शतृप्रत्ययान्तपदयोगे[6] 'कर्ता' इति तृन्प्रत्ययन्तपदयोगे[7] यथाक्रमे 'सोमम्', 'आत्मानम्', 'वेदम्' 'लोकान्' च इत्यत्र षष्ठीनिषेधात् अनभिहिते कर्मणि द्वितीया विभक्तिर्भवति।

अधुना मनसि शङ्का जाता। पूर्वं लादेशेन शतृप्रत्ययः गृह्यते। पुनः तृन्प्रत्याहारेण शतृप्रत्ययस्य ग्रहणं कथं प्रयोजनम्? समाधाने वक्तुं शक्यते- शाननादि स्थले **लटः शतृशानचावप्रथमासमानाधिकरणे** (अ॰

---

[1] "क्तक्तवतू निष्ठा" (१/१/२६)

[2] *बालमनोरमा, सिद्धान्तकौमुदी,* अ॰ २/३/६९

[3] "तृन्निति नेदं प्रत्ययग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्।" *व्याकरणमहाभाष्यम्,* अ॰ २/३/६९

[4] "पूङ्यजोः शानन्" (अ॰ ३/२/१२८)

[5] "ताच्छील्यवयोवचनशक्तिषु चानश्" (अ॰ ३/२/१२९)

[6] "इङ्-धार्योः शत्रकृच्छ्रिणि" (अ॰ ३/२/१३०)

[7] "आक्तेस्तच्छीलतद्धर्मतत्साधुकारिषु" (अ॰ ३/२/१३४)

३/२/१२४) इत्यतः 'लटः' इति नानुवर्तते। अतः अनुवृत्तेरभावेन शाननादि प्रत्ययाः न लट्-स्थानीयाः। अतः लादेशेन शाननादिप्रत्ययानां ग्रहणमसम्भवम्। उभयोः शतृप्रत्यययोः वैसादृश्यमपि विद्यते। लादेशेन शतृप्रत्ययविधायकं सूत्रं **लटः शतृशानचावप्रथमासमानाधिकरणे** (अ॰ ३/२/१२४) इति परन्तु तृन्प्रत्याहारेण शतृप्रत्ययविधायकं सूत्रं **इङ्-धार्योः शत्रकृच्छ्रिणि** (अ॰ ३/२/१३०)इति। अतः उभयोः शतृप्रत्यययोः भिन्नार्थे ग्रहणं भवति। अपि च तृन्प्रत्याहारेण शानच्प्रत्ययोऽपि ग्रहीतव्यः। परन्तु पूर्वं लादेशेन शानच्प्रत्ययः गृहीतः। शानच्प्रत्ययान्तपदयोगेऽपि षष्ठीविभक्तिर्निषेधः कृतः। अतः पुनः शानच्-ग्रहणस्य सार्थकता नास्ति। अपि च शानन्-चानश्प्रत्ययौ शानच्प्रत्ययस्य सादृशः। अतः अनयोः प्रत्यययोरपि शानच्प्रत्ययेन ग्रहणं भवति। परन्तु प्रयोगानुबन्धस्य सादृश्याभावे पृथक् निर्देश: दोषहीन: समीचीनश्च।

तृन्प्रत्याहारान्तर्गत-शतृप्रत्ययेन षष्ठी नित्यं प्रतिषिध्यते। परन्तु **द्विषः शतुर्वा**[1] इत्यनेन वार्तिकेन शतृप्रत्ययान्तद्विष्धातोः योगे षष्ठीनिषेधो विकल्पेन विधीयते। महाभाष्यकारेणोक्तम्-"द्विषः शतुर्वेति वक्तव्यम्। तच्चाऽवश्यं वक्तव्यं प्रत्ययग्रहणे सति प्रतिषेधार्थम्। तदेव प्रत्याहारग्रहणे सति विध्यर्थं भविष्यति"[2]। उदाहरणं यथा- मुरस्य मुरं वा द्विषन्। इह 'द्विषन्'[3] इति शतृप्रत्ययान्तपदयोगे अनभिहिते कर्मणि **कर्तृकर्मणोः कृति** (अ॰ २/३/६५) इत्यनेन षष्ठी नित्यप्राप्तैव। परन्तु **न लोकाव्ययनिष्ठाखलर्थतृनाम्**(अ॰ २/३/६९) इत्यनेन षष्ठीविभक्तिः प्रतिषिध्यते। अतः अनेन वार्तिकेन षष्ठीप्रतिषेधः विकल्पेन विधीयते। अतः विकल्पे 'मुरस्य' पक्षे 'मुरम्' इति उभयरूपं सिद्धम्।

उपसंहारे दीक्षितेनोक्तम्-"सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव"[4]। अस्मिन्विषये एका परिभाषा अस्ति- "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा"[5] इति। अनेन परिभाषावलेन **न लोकाव्ययनिष्ठाखलर्थतृनाम्** (अ॰ २/३/६९) इत्यनेन **कर्तृकर्मणोः कृति** (अ॰ २/३/६५) इत्यनेन अनन्तरविधिना प्राप्ता कारकषष्ठी प्रतिषिध्यते। परन्तु षष्ठीनिषेधे दूरवर्ती **षष्ठी शेषे** (२/३/५०) इत्यनेन शेषत्वविवक्षायां प्राप्ता षष्ठी न प्रतिषिध्यते। तर्हि **न लोकाव्ययनिष्ठाखलर्थतृनाम्**(अ॰ २/३/६९) इत्यनेन षष्ठीनिषेधस्य फलं किम्? उत्तरे आह-"शाब्दबोधे प्रकारवैलक्षण्यं फलमिति भावः।"[6] यथा- ब्राह्मणस्य कुर्वन्। ब्राह्मणसंबन्धिसृष्ट्यनुकूल-व्यापारवानिति शाब्दबोधकत्वम्, अतः 'कुर्वन्' इति शतृप्रत्ययान्तपदयोगे

---

[1] वार्तिकम्, *सिद्धान्तकौमुदी*, अ॰ २/३/६९

[2] *व्याकरणमहाभाष्यम्*, अ॰ २/३/६९

[3]"द्विषोऽमित्रे" (अ॰ ३/२/१३१)

[4] *सिद्धान्तकौमुदी*, अ॰ २/३/६९

[5] परिभाषा, ६२

[6] *बालमनोरमा*, *सिद्धान्तकौमुदी*, अ॰ २/३/६९

शेषत्वविवक्षायां 'ब्राह्मणस्य' इति कर्मणि शेषे षष्ठी, परन्तु कर्मत्वविवक्षायां तु द्वितीयैव। नरकस्य जिष्णुः। नरकसंबन्धिजयवानित्यर्थः। अत्रापि 'जिष्णुः'[1] इति उप्रत्ययान्तपदयोगे शेषत्वविवक्षायां 'नरकस्य' इति कर्मणि शेषे षष्ठी, परन्तु कर्मत्वविवक्षायां तु द्वितीयैव। शेखरकारस्तु 'नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानम् इति वार्तिकात्कारकषष्ठीनिषेधविषये शेषत्वविवक्षा नेति ज्ञाप्यते'[2] इति स्वीकुर्वन्ति।

कारकषष्ठी प्रतिषेधस्यापरं सूत्रम्- **अकेनोर्भविष्यदाधमर्ण्ययोः** (अ॰ २/३/७०) इति। अनेन सूत्रेणापि कृत्प्रत्ययान्तपदयोगे कर्तरि कर्मणि च षष्ठीप्रतिषिध्यते। अक् च इन् च अकेनौ, तयोरितरेतरयोगद्वन्द्वः, तयोरकेनोः। भविष्यत् च आधमर्ण्यं च भविष्यदाधमर्ण्ययौ, तयोरितरेतरयोगद्वन्द्वो, तयोर्भविष्यदाधमर्ण्ययोः। अकस्य भविष्यति इनस्तु आधमर्ण्ये चेति यथासंख्यतानुदेशेन[3] भवितव्यम्। परन्तु भाष्यकारेण "अकस्य भविष्यतीति वक्तव्यम्"[4], "तत इन आधमर्ण्ये च भविष्यति चेति वक्तव्यम्"[5] इति योगविभागेन व्याख्या कृता। भाष्यप्रमाणात् यथासंख्यतानुदेशस्तु न भवतीति। बालमनोरमाकारेणापि महाभाष्यकारस्य मतं समर्थितम्[6]। अतोऽकस्य भविष्यति काले विहितस्य, इनस्तु भविष्यति चाधमर्ण्ये च विहितस्य प्रयोगे षष्ठी विभक्तिर्न भवतीति सूत्रार्थम्। क्रमेण उदाहरणं यथा- सतः पालकोऽवतरति। व्रजं ग्रामी। शतं दायीति।

अतः **भविष्यति गम्यादयः**(अ॰ ३/३/३) इत्यस्य अधिकारे **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** (३/३/१०) इत्यनेन विहितस्य 'ण्वुल्' प्रत्ययस्य ग्रहणं भवति। अतः 'सतः पालकोऽवतरति' (सज्जनान् पालयिष्यन् प्रादुर्भवति) इत्यत्र 'पालकः' इति भविष्यति ण्वुलप्रत्ययान्तपदस्य प्रयोगे अनभिहिते कर्मणि 'सतः' इत्यत्र षष्ठीनिषेधात् **कर्मणि द्वितीया** (२/३/२) इत्यनेन द्वितीया विधीयते।

परन्तु 'ओदनस्य पाचकः' इत्यत्र भविष्यदार्थस्याभावात् **ण्वुलतृचौ** (अ॰ ३/१/१३३) इत्यनेन विहितस्य 'पाचकः' इति ण्वुलप्रत्ययस्य योगे अनभिहिते कर्मणि 'ओदनस्य' इत्यत्र न तु षष्ठीनिषेधः[7]। तेनैव प्रकारेण 'व्रजं गामी' इत्यत्र **भविष्यति गम्यादयः** (अ॰ ३/३/३) इत्यस्य अधिकारे **आवश्यकाधमर्ण्ययोर्णिनिः**

---

[1] "ग्लाजिस्थश्च ग्स्नुः" (अ॰ ३/२/३९)

[2] *लघुशब्देन्दुशेखरः*, अजन्तपुँल्लिङ्गदारभ्याव्ययीभावान्तो भागः, पृष्ठा ७९८

[3] "यथासंख्यमनुदेशः समानम्" (अ॰ १/३/१०)

[4] *व्याकरणमहाभाष्यम्*, अ॰ २/३/७०

[5] तदेव

[6] "यथासंख्यं नेष्यते, भाष्यात्। भविष्यति आधमर्ण्ये च वर्तमानयोः अकेनोः योगे षष्ठी नेति फलितम्। तत्र आधमर्ण्यांशः अकेन नान्वेति,' आवश्यकाधमर्ण्ययोर्णिनिः' इत्युक्तेः। अतो भविष्यदंश एवाके अन्वेति। इनेस्तु भविष्यदाधमर्ण्ययोरुभयोः अप्यन्वयः, सम्भवात्।" *बालमनोरमा*, अ॰ २/३/७०

[7] "ओदनस्य पाचक इत्यत्र तु न षष्ठीनिषेधः, 'ण्वुलतृचौ' इत्यस्य भविष्यति विधानाभावात्।" तदेव

(३/३/१७०) इत्यनेन भविष्यति आवश्यकार्थे णिनिप्रत्ययान्तं 'गामी' इति पदस्य प्रयोगे 'व्रजम्' इति षष्ठीनिषेधात् अनभिहिते कर्मणि द्वितीया विभक्तिर्भवति।

परन्तु कुत्रापि 'व्रजं गमी'[1] इति प्रयोगः परिलक्ष्यते। अतः 'गामी' 'गमी' वा इति पदनिष्पत्तौ बालमनोरमाकारतत्त्वबोधिनीकारयोः विमतं परिलक्षितम्। तत्त्वबोधिनीकारस्य मते 'गामी' इति **आवश्यकाधमर्ण्ययोर्णिनिः** (अ॰ ३/३/१७०) इत्यनेन आवश्यकार्थे 'णिनि' प्रत्यययोगे निष्पन्नः, यद्यपि णिनि-प्रत्ययः कालसामान्यार्थे विहितः, तथापि अत्र **भविष्यति गम्यादयः** (अ॰ ३/३/३) इत्यधिकारे सति अतो भविष्यत्यर्थे विहितः[2]। बालमनोरमाकारस्य मते- 'गमी' इति "गमेरिनिः"[3] इत्यनेन विहितस्य औणादिकः 'इनि' प्रत्ययेन निष्पन्नः। परन्तु भविषति विधातुं 'गमेरिनिः' इदं सूत्रं **भविष्यति गम्यादयः** (अ॰ ३/३/३) इत्यधिकारे पठनीयम्[4]। अस्मिन्विषये पदमञ्जरीकारस्य मते- गम्यादिगणीयाः शब्दाः केचिदुणादयः निष्पन्नाः, केचिदष्टाध्यायी सूत्रेण निष्पन्नाः[5]। 'शतं दायी' इत्यत्र **आवश्यकाधमर्ण्ययोर्णिनिः** (अ॰ ३/३/१७०) इत्यनेन अधमर्ण्यार्थे णिनिप्रत्ययान्तं 'दायी' इति पदस्य प्रयोगे 'शतम्' इति षष्ठीनिषेधात् अनभिहिते कर्मणि द्वितीया विभक्तिर्भवति। इहापि कारकषष्ठ्या निषेधरेव न तु शेषेषष्ठ्या। अतः ग्रामस्य गामी, शतस्य दायीत्यपि भवति।

परन्तु **गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि** (अ॰ २/३/१२) इत्यत्रोक्तं द्वितीयाग्रहणेन **कर्तृकर्मणोः कृति** (अ॰ २/३/६५) इत्यनेन प्राप्तं षष्ठीविभक्तिं बाधित्वा 'व्रजं गामी' इत्यादिस्थले द्वितीयाविभक्तिः स्यादेव। तर्हि भविष्यति 'णिनि' प्रत्ययस्य प्रयोगे षष्ठीनिषेधस्य किमावश्यकम्? केचित् उक्तम्- "किं च भाष्यकारेण गत्यर्थसूत्रं प्रत्याख्यातम्, तन्मते ग्रामस्य गन्तेत्यपि भवति, तद्वद् व्रजं गामीत्यत्रापि षष्ठी प्राप्नोतीतीनो योगे निषेध उपपद्यत एव"[6]। तत्त्वबोधिनीकारेणापि एवमुक्तम्- "इहैव सूत्रे ग्रामं ग्रमीति भाष्योदाहरणात्तत्सूत्रं नाङ्गीक्रियते। तेन ग्रामस्य गन्तेति षष्ठ्येव साध्वी, न ग्रामं गन्तेति द्वितीयेति"[7]।

---

1 व्याकरणमहाभाष्यम्, अ॰ २/३/७०

2 "आवश्यकाधमर्ण्ययोर्णिनिः' इत्यावश्यके णिनिः। यद्यप्ययं कालसामान्ये विहितस्तथापि 'भविष्यति गम्यादयः' इत्युक्तेर्भविष्यदर्थकः।" तत्त्वबोधिनी, अ॰ २/३/७०

3 उणादिप्रकरणम्, ४/६

4 "गमेरिनिः' इत्यौणादिक इनिः। स च भविष्यति विहितः, 'भविष्यति गम्यादयः' इत्युक्ते।" बालमनोरमा, अ॰ २/३/७०

5 "गम्यादिषु केचिदुणादयः, केचिदष्टाध्यायीगताः।" पदमञ्जरी, अ॰ ३/३/३

6 प्रकाशः, प्रक्रियाकौमुदी, अ॰ २/३/७०

7 तत्त्वबोधिनी, अ॰ २/३/७०

उपसंहृतिः

आलोचनान्ते वक्तुं शक्यते- **कर्तृकर्मणोः कृति** (अ॰ २/३/६५) इत्यनेन कृत्योगे कर्तरि कर्मणि च षष्ठी प्राप्ता। पुनः कृत्योगे षष्ठी प्रतिषेधार्थं निषेधसूत्रं विधीयते। **न लोकाव्ययनिष्ठाखलर्थतृनाम्** (अ॰ २/३/६९) इत्यत्र 'निष्ठा' प्रत्ययेन भूते क्तस्य प्रयोगे षष्ठीप्रतिषेधः स्यादेव इति ज्ञातव्यः नतु वर्तमाने। **अकेनोर्भविष्यदाधमर्ण्ययोः** (अ॰ २/३/७०) इत्यनेन अकप्रत्ययेन भविष्यति षष्ठी प्रतिषेधः स्यादेव, परन्तु **ण्वुल्तृचौ** (अ॰ ३/१/१३३) इत्यनेन कालसामान्ये 'ण्वुल्' (अक्) प्रत्ययेन विहिता षष्ठी स्यादेव। परन्तु कारकषष्ठीनिषेधे सम्बन्धमात्रविवक्षायां शेषे-षष्ठी स्यादेव। अतः कृत्प्रत्ययान्तपदयोगेऽपि कर्मत्वविवक्षायां द्वितीया, शेषत्वविवक्षायां षष्ठ्येव विधीयते।

सन्दर्भग्रन्थसूचिः

1. इश्वरचन्द्र, सम्पादकः (प्रथमभागः द्वितीयभागश्च २०१७)। *अष्टाध्यायी,* चन्द्रलेखा- हिन्दीव्याख्या सहिता (पुनर्मुद्रितसंस्करणम्)। चौखम्बा संस्कृत प्रतिष्टान।

2. गोविन्दाचार्चः, सम्पादकः (२०२०)। *वैयाकरणसिद्धान्तकौमुदी,* मूलमात्रम् (प्रथमसंस्करणम्)। चौखम्बा सुरभारती प्रकाशन।

3. तिवारी, हरिनारायण, सम्पादकः (द्वितीयोऽध्यायः २०१४)। *व्याकरणमहाभाष्यम्,* ज्योत्स्ना समुद्भाषितम् (पुनर्मुद्रितसंस्करणम्)। चौखम्बा विद्याभवन।

4. त्रिपाठी, जयशङ्करलाल, सुधाकरमालवीय च सम्पादकौ (तृतीयभागः २००९, चतुर्थभागः २०१७)। *काशिका,* न्यास-पदमञ्जरी-भावबोधिनी सहिता (पुनर्मुद्रितम्)। तारा बुक एजेन्सी।

5. द्विवेदी, जानकीप्रसाद, सम्पादकः (प्रथमो भागः १९९७)/ *कातन्त्रव्याकरणम्,* कातन्त्रवृत्ति-कातन्त्रवृत्तिपञ्जिका-कलापचन्द्र-सहिता (प्रथमसंस्करणम्)। सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय।

6. पाण्डेय, रमाकान्त, सम्पादकः (२०१५)। *प्रौढमनोरमा,* सशब्दरत्न-अनन्या हिन्दीव्याख्योपेता, कारकादव्ययीभावान्तो भागः (प्रथमसंस्करणम्)। चौखम्बा विद्याभवन।

7. पञ्चोली, बालकृष्ण, सम्पादकः (द्वितीयभागः १९६६)। *वैयाकरणसिद्धान्तकौमुदी,* लक्ष्मीव्याख्या सहिता (प्रथमसंस्करणम्)। मोतिलाल बनारसी दास।

8. मिश्र, विश्वनाथ, सम्पादकः (२०१६)। *परिभाषेन्दुशेखरः,* सुबोधिनी हिन्दीव्याख्योपेतः (प्रथमसंस्करणम्)। चौखम्बा सुरभारती प्रकाशन।

9. मिश्रः, शशीभूषणः, सम्पादकः (२०१६)। *सिद्धान्तकौमुद्याः कारकप्रकरणम्* (प्रथमसंस्करणम्)। वि. एन्. पावलिकेशान्।

10. शर्मा, गिरिधर परमेश्वरानन्द च सम्पादकौ (प्रथमभागः २०१०)। *वैयाकरणसिद्धान्तकौमुदी,* बालमनोरमा-तत्त्वबोधिनी-सहिता (द्वादशपुनर्मुद्रणम्)। मोतिलाल बनारसीदास।

13. सान्याल, अयोध्यानाथ, सम्पादकः (१४१८ वङ्गब्दे)। *वैयाकरणसिद्धान्तकौमुदी,* कारकप्रकरणम् (तृतीयसंस्करणम्)। वर्धमान विश्वविद्यालय।

<u>Author's Detail</u>

Name : Uttam Majhi
Designation : Ph.D. Research Scholar,
Address : Department of Sanskrit, pali & prakrit,
Visva-Bharati, Santiniketan
West Bengal - 712412
Email : uttamsans@gmail.com

****

काव्यशास्त्रीय ग्रन्थों में वर्णित कविसमय

Sonali Bajpai

शोधसार

कवि काव्य जगत का स्रष्टा होता है इसलिए उसे प्रजापति भी कहा गया है। कवि अपने काव्य जगत में ऐसे वर्णन करता है जिनका लौकिक जीवन से कोई सम्बन्ध नहीं होता है यह वर्णन कवि परम्परा से चलता रहता है जिसे ही कविसमय की संज्ञा दी गई है यह शब्द परम्परा प्राकृतिक या लौकिक रूप से सिद्ध तो नहीं होती परन्तु सहृदय सामाजिक पर यह गहरा प्रभाव डालती है क्योंकि यथार्थ जीवन से काल्पनिक जीवन सर्वथा ही सुखमय प्रतीत होता है।

कुञ्जीशब्द - कवि, काव्यशास्त्र, कविसमय, दोष, कविप्रसिद्धि, काव्यमीमांसा, अशास्त्रीय, अलौकिक, अवस्था, देश, काल, विरुद्ध ।

****

कविसमय का उल्लेख प्रायः सभी काव्यशास्त्रीय ग्रन्थों में किसी-न-किसी रूप में प्राप्त होता है चाहे वह काव्यगत दोष हो या अलंकार साधन। सभी काव्यशास्त्रियों ने कविसमय पर अपनी लेखनी चलाई है। कविसमय की परिभाषा लिखते हुए यायावर राजशेखर ने लिखा है-

‘अशास्त्रीयमलौकिकं च परम्परायातं यमर्थमुपनिबध्नन्ति कवयः स कविसमयः’[1]।

‘पूर्वे ही विद्वांसः सहस्रशाखं साङ्गं च वेदमवगाह्य, शास्त्राणि चावबुध्य, देशान्तराणि द्वीपन्तराणि च परिभ्रम्य, यानर्थानुपलभ्य प्रणीतवन्तस्तेषां देशकालान्तरवशेन अन्यथात्वेपि तथात्वेनोपनिबन्धो यः स कविसमयः। कविशब्दश्चायं मूलमपश्यद्भि प्रयोग दर्शिभिः प्रयुक्तो रूढश्च’[2]।

राजशेखर के अनुसार प्राचीन विद्वानों ने अर्थों का प्रत्यक्ष दर्शन कर रचनाएं कीं। पश्चाद्वर्ती कवियों ने उन शब्दार्थों का यथावत् प्रयोग किया, जो शनैःशनैः परम्परा के रूप में परिणत हो गया और इसे ही कविसमय कहा जाने लगा। कविसमय की निर्दिष्ट परिभाषा से यह ज्ञात होता कि कविसमय कवियों द्वारा प्रयोग किये जाने वाली शब्दार्थ परम्परा, शास्त्रीय तथा लौकिक जगत् से भिन्न होता है। अतः कविसमय के लिए अशास्त्रीय, अलौकिक तथा परम्परागत अर्थों का निबन्धन आवश्यक होता है।

---

[1] राय डा० गङ्गासागर, 2013, काव्यमीमांसा (चतुर्दश अध्याय पृष्ठ. 166), चौखम्भा विद्याभवन, वाराणसी।

[2] Ibid

भामह, दण्डी, वामन आदि विद्वानों ने कविसमय शब्द का प्रयोग न कर इसका उल्लेख काव्यगत दोषों के अन्तर्गत किया है। दोष शब्द से इनका अभिप्राय देश-काल-लोक-आगम-न्याय का विरोधी और न्यायिक तत्त्व प्रतिज्ञा, हेतु, दृष्टान्त आदि से हीन होना है, जिसका ही उल्लेख करते हुए आचार्य भामह ने कहा है-

देशकालकलालोकन्यायगमविरोधि च।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं नेष्यते[1]॥

इसी प्रकार का विवेचन महाकवि दण्डी ने भी किया है-

न सहिता विवक्षामीत्यसंधानपदेषु यत्।
तद्विसधीति निर्दिष्टे न प्रगृह्यादिहेतुकम्॥
देशोऽद्रिवनराष्ट्रादि कालो रात्रिंदिवर्तवः।
नृत्यगीतप्रभृतयः कलाः कामार्थसंश्रयाः॥
चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता।
हेतुविद्यात्मको न्यायः सस्मृतिः श्रुतिरागमः॥
तेषुतेष्यथारूढं यदि किञ्चित् प्रवर्तते।
कवेः प्रमादाद्देशादिविरोधिन्येतदुच्यते[2]॥

देश-काल-लोक-न्याय-आगमशास्त्र में अप्रसिद्ध वस्तु का यदि कवि अपने काव्य में वर्णन करता है तो यह देशविरुद्ध-कालविरुद्ध-लोकविरुद्ध-न्यायविरुद्ध काव्य के रूप में गणित किया जाता है। देशविरुद्ध का उदाहरण देते हैं-

कर्पूरपादपामर्शसुरभिर्मलयानिलः।
कलिङ्गवनसभूता मृगपाया मतङ्गजा[3]॥

प्रस्तुत उदाहरण में कलिंग वन में हाथी की उत्पत्ति का वर्णन देश विरुद्ध है क्योंकि हाथी की उत्पत्ति सिंहल वनों में प्रसिद्ध है, कलिंग वन में नहीं, अतः यह देशविरोधी दोष हुआ।

श्रव्यहंसगिरो वर्षाः शरदो मत्तबर्हिणः।
हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः[4]॥

---

[1] काव्यालङ्कार, 4:2.

[2] काव्यादर्श, 3:159, 162, 163, 164.

[3] Ibid. 3:165.

[4] Ibid. 3:168.

यहां वर्षा में हंसो। का शब्द, शरद में मोर का मत्त होना, हेमन्त में सूर्य की निर्मलता और जाड़े में चन्दन की इच्छा का वर्णन किया गया है। यह वर्णन विरोधी काल में संयोग स्थापित कर रहा है क्योंकि हंसों के कलरव शरद् में, मयूर-नृत्य वर्षा में, सूर्य की निर्मलता व चन्दन की इच्छा ग्रीष्म ॠतु में परिलक्षित होती है।

आधूतकेसरो हस्ती तीक्ष्णश्रृङ्गस्तुरंगमः।
गुरुसारोऽयमेरण्डो नि:सार खरिद्रुमः[1]॥

यहां हाथी द्वारा अपने केसर को हिलाना, घोड़े के तीक्ष्ण सिंह, एरण्ड के वृक्ष का सारयुक्त व खैर के वृक्ष का सारहीन होना बताया गया है, यह लोकविरूद्धत्व का उदाहरण है। इसी प्रकार आचार्य वामन ने भी देश-काल-स्वभाव-लोकशास्त्र-चतुर्वर्गशास्त्रों के विरुद्ध अर्थ प्रयोग को काव्य दोष के रूप में गिना है-

देशकालस्वभावविरुद्धार्थानि लोकविरुद्धानि[2]।
कलाचतुर्वर्गशास्त्रविरुद्धार्थानि विद्याविरुद्धानि[3]।
देशविरुद्ध का उदाहरण देते हुये कहते है-
सौवीरेष्यस्ति नगरी मधुरा नाम विश्रुता।
अक्षोटनारिकेलाढ्या यस्याः पर्यन्तभूमयः[4]॥

यहां मथुरा नगरी का देशविरुद्ध वर्णन किया गया है। मथुरा नगरी सुघ्न प्रान्त में यमुना तट पर बसी है सीवीर प्रान्त में नही, और उसकी भूमि करीले और बदरीफल बहुल है, अक्षोट और नारिकेलफल बहुल नही।

कदम्बकुसुमस्मेरं मधौ वन शोभत[5]।

यहां वसन्त ॠतु में कदम्ब के पुष्पों का वर्णन कालविरुद्ध है, कदम्ब वर्षा ॠतु में फूलता है, वसन्त ॠतु में नही।

श्रृङ्गेण कलिकाकोशस्तथा भृशमपीड्यत।
यथा गोष्पदपुरं हि ववर्ष बहुलं मधु[6]॥

---

[1] काव्यादर्श, 3:172.

[2] काव्यालङ्कारसूत्रवृत्ति, 2/2/23.
[3] Ibid 2/2/24.
[4] काव्यालङ्कारसूत्रवृत्ति, 2/2 (देशविरुद्ध उदाहरण) दिल्ली अनुसन्धान परिषद्, आत्माराम एण्ड सन्स, दिल्ली।
[5] Ibid 2/2 (लोकविरुद्ध उदाहरण)
[6] Ibid 2/2 (स्वभावविरुद्ध उदाहरण)

यहां कली के निकले हुये मधु से गोष्पद-गाय के खुर के बराबर स्थान भर गया यह जो कहा गया है वह भी स्वभाव विरुद्ध अर्थ को बताता है।

कामोपभोगसाफल्यफलो राज्ञां महीजयः[1]।

यहां पृथ्वी विजय का फल कामोपभोग को बताया गया है, यह बात धर्मशास्त्र के विरुद्ध है, धर्मशास्त्र में धर्म अथवा अश्वमेधादि यज्ञ राजाओं के पृथ्वी विजय का फल है।

यहां ध्यान देने योग्य बात है कि राजशेखर ने अशास्त्रीय व अलौकिक प्रयोग को ही कविसमय कहा है परन्तु भामह, दण्डी, वामन ने दोष में लोक-काल-स्वभाव आदि विरुद्धता की बात कही है, लेकिन यह दोषवर्णन कविसमय का उल्लेख अधिक प्रतीत होता है क्योंकि लोक-काल-आगम-स्वभाव-न्याय के विरुद्ध वर्णन होने पर भी कवि-समयगत बातों का वर्णन दोष नहीं माना जाता है अर्थात् लोकयात्रा और कवि-समय के विरोध होने पर 'कविसमय', 'लोकयात्रा' की अपेक्षा प्रबल माना जाता है।

आचार्य वामन ने कविसमय के स्थान पर काव्यसमय का प्रयोग किया है तथा इसका लक्षण भी कविसमय के अनुरूप बताया है-

सम्प्रति काव्यसमयं शब्दशुद्धिश्च दर्शयितुं प्रयोगिकाख्यमधिकरणमारभ्यते तत्र काव्यसमयस्तावदुच्यते[2]।

आचार्य वामन ने काव्यालङ्कारसूत्रवृत्ति के 'प्रायोगिक' नामक पञ्चम् अधिकरण के प्रथम अध्याय 'काव्यसमय' में सत्रह सूत्रों द्वारा काव्य की अनुसरणीय परम्पराओं का निरूपण किया है-

न पदादौ खल्वादयः।

पदादौ खल्वादयःशब्दाः न प्रयोज्याः। आदिशब्दःप्रकारार्थः। येषामदौ प्रयोगो न श्लिष्यति ते गृह्यन्ते, न हि पुनर्वत हन्त प्रभृतयः[3]॥

नाऽर्धे किञ्चिदसमाप्तप्रायं वाक्यम्[4]॥

छन्द के अर्ध में असमाप्तप्राय वाक्य का प्रयोग नही करना चाहिये अर्थात् वृत्त के अर्थ में कोई अपूर्ण वाक्य प्रयुक्त नही करना चाहिए-

जयन्ति ताण्डवे शम्भोर्भृङ्गराङ्गलिकोटयः।
कराः कृष्णस्य च भुजाश्चक्रांशुकपिशत्विषः[5]॥

---

[1] काव्यालङ्कारसूत्रवृत्ति, 2/2 (धर्मशास्त्रविरुद्ध उदाहरण)

[2] Ibid., 5:1

[3] Ibid. 5:1.5.

[4] Ibid. 5:1.6.

[5] Ibid पृ. 286. दिल्ली अनुसन्धान परिषद्, आत्माराम एण्ड सन्स, दिल्ली।

प्रस्तुत श्लोक के उत्तरार्ध का 'कराः' पद् वस्तुतः पूर्वार्ध के वाक्य का पद है, वहाँ प्रयुक्त न होकर दूसरे उत्तरार्ध में प्रयुक्त होने से पूर्वार्ध में अपूर्ण वाक्य का प्रयोग हुआ है, यह उचित नहीं है, नवीन आचार्यों ने इसे 'अर्धान्तरैकपदता' नामक दोष माना है।

इसी प्रकार आचार्य भोज ने सरस्वतीकण्ठाभरण में गुण-दोषों का विवेचन किया है और दोष प्रकरण में वाक्यार्थ दोष के अन्तर्गत कविसमय का उल्लेख किया है-

इदानीं कविसमयबहिर्भूतत्वेनोपमानौचितीमाह-

अप्रसिद्धोपमानं यदप्रसिद्धोपमं हि तत्[1]॥

यथा-

कुमुदमिव मुखं तस्या गौरिव महिषः शशीव काव्यमिदम्।
शरदिव विभाति तरुणी विकसितपुलकोत्करा सेयम[2]॥

आचार्य अप्पयदीक्षित की चित्रमीमांसा में आचार्य भोज की ही तरह अलंकार वर्णन में कविप्रसिद्धि(कविसमय) का उल्लेख प्राप्त होता है-

कविप्रसिद्ध्यनुरोधेनोपमानोपमेयत्वयोग्ययोरेव साधर्म्यमुपमा, न त्वतथाभूतयोः। अत एव 'कुमुदमिव मुखं प्रसन्नम्' इत्यादिनोपमा[3]।

कविप्रसिद्धि के अनुरोध से योग्य उपमानत्व एवं उपमेयत्व के बीच साधर्म्य रहने पर उपमालंकार है न कि अयोग्य एवं असाधर्म्य के बीच।इसलिये'कुमुद की तरह मुख प्रसन्न है'इत्यादि में उपमालंकार नही हुआ है। सर्वोऽपि ह्यलङ्कार कविसमयप्रसिद्ध्यनुरोधेन हृद्यतया काव्यशोभाकर एवालङ्कारतां भजते।अतः 'गो सदृशः गवयः' इतिनोपमा[4]।

सभी अलंकार कविप्रसिद्धि के अनुरोध से अपने क्रान्तिमत्वादि रूप से काव्य की शोभा बढ़ाकर अलंकारत्व को प्राप्त करते हैं जैसे 'गो सदृश गवयः' में कविसकेतप्रसिद्धि के कारण चमत्कार के अभाव में उपमालंकार नही हुआ।

जयदेव ने चन्द्रालोक में विद्याविरुद्ध अर्थ को कविसमय का कारण माना गया है-

तव दुग्धाब्धिसम्भूतेःकथं जाता कलङ्किता।

---

[1] सरस्वतीकण्ठाभरण, 1/52.

[2] Ibid (पृ. 43) पाण्डुरङ्ग जावजी, बाम्बे।

[3] चित्रमीमांसा (पृ. 37) चौखम्भा संस्कृत सिरीज, वाराणसी।

[4] Ibid.

कवीनां समयाद्विद्याविरुद्धोऽदोषतां गतः[1]॥

चन्द्रमा की उत्पत्ति क्षीरसागर से बतलायी गयी है, उसके अनुसार वह निष्कलंक है और जिसकी उत्पत्ति अत्रि मुनि की आंख से है वह सकलंक है किन्तु कवि समाज में चन्द्र एक ही और वह सकलंक माना गया है।

कविसमयगत शिक्षा का सर्वप्रथम विवरण अलंकारशेखर में दिया गया है-

इदानीं कविसम्प्रदायस्य सर्वापेक्षयाभ्यर्हितत्वं दर्शयन्नाह-

असतोऽपि निबन्धेन सतामप्यनिबन्धनात्।
नियमस्य पुरस्करात् सम्प्रदायस्त्रिधा कवेः[2]॥

असतोऽपीति। वस्तुगत्या यत्र भवति तदपि कविभिर्निबध्यते। यथा-

रत्नानि यत्र तत्रादौ हंसाद्यल्पजलाशये।
जलेभाद्यं नभोनद्यामम्भोजाद्यं नदेष्वपि॥
तिमिरस्य तथा मुष्टिग्राह्यत्वं मूचिभेद्यता।
शुल्कत्वं कीर्तिपुण्यादौ काष्र्ण्यं चाकीर्त्यद्यादिषु॥
प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः।
ज्योत्स्नापानं चकोराणां प्रवालं सर्ववीरूधाम्॥
केसराशोकयोः सत्स्त्रीगण्डूषात् पादघाततः।
मासान्तरेऽपि पुष्पाणि रोमालिस्त्रिबलिः स्त्रियाम्॥

सतामपीति यथा-

वसन्ते मालतीपुष्पं फलपुष्पे च चन्दने।
कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता॥

नियमस्येति यथा-

हिमत्येव भूर्जत्वक् चन्दनं मलये परम्।
हेमन्तशिशिरौ व्यक्ता सर्वदा कमलस्थितिः[3]॥

---

[1] चन्द्रालोक, 2:43

[2] अलंकारशेखर, 6:1.1.

[3] Ibid. (पृ. 59) चौखम्भा संस्कृत सिरीज, वाराणसी।

आचार्य मम्मट ने काव्यप्रकाश में दोषों का वर्णन करते हुये 'प्रसिद्धिविरुद्धता' दोष के अन्तर्गत कविसमय का उल्लेख किया है। कविसमय या कविप्रसिद्धि का उल्लङ्घन होने पर 'प्रसिद्धिविरुद्धता' दोष होता है।

मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्[1]॥

इति प्रसिद्धिमतिक्रान्तम्।

मञ्जीर आदि के शब्द का कथन करने में रणित जैसे शब्दों का, पक्षियों के शब्द में कूजित आदि, सुरत में स्तनित, मणित आदि तथा मेघादि शब्द में गर्जित शब्दों का प्रयोग करना चाहिये।

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः।
खः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः[2]॥

काव्यप्रकाश में अप्रयुक्त दोष का वर्णन भी प्राप्त होता है यह भी कविसमय का ही रूप प्रतीत होता है जिसका अर्थ है कोशादि में जिस अर्थ में पढा हुआ होने पर भी कवियों द्वारा न अपनाया हुआ शब्दप्रयोग अप्रयुक्त दोष कहलाता है-

अप्रयुक्तं तथाऽऽम्नातमपि कविभिर्नादृतम्।

यथा-

यथाऽयं दारुणाचारः सर्वदैव विभाव्यते।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा[3]॥

अत्र दैवतशब्दो दैवतानि पुंसि वा इति पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते। इसी प्रकार आचार्य विश्वनाथ ने साहित्यदर्पण में काव्यदोष के अन्तर्गत 'अप्रयुक्तत्व दोष' का वर्णन आचार्य मम्मट की तरह ही किया है व इसका तात्पर्य भी पूर्वोक्त अप्रयुक्त दोष की ही प्रकार है-

अप्रयुक्तत्वं तथा प्रसिद्धावपि कविभिरनादृतत्वम्[4]।

यथा- 'भाति पद्मः सरोवरे।'

---

[1] काव्यप्रकाशपृ) . (320 डा० नरेन्द्रज्ञानमण्डल लिमिटेड, वाराणसी।

[2] Ibid.

[3] Ibid (पृ. 268) डा० नरेन्द्र ज्ञानमण्डल लिमिटेड, वाराणसी।

[4] साहित्यदर्पण (पृ. 56) चौखम्भा विद्याभवन, वाराणसी।

'अप्रयुक्तत्व' वह दोष है जिसे, किसी पद की कोषादि में उस रूप में प्रसिद्धि होने पर भी कवि-सम्प्रदायद्वारा न अपनाया जाना, अप्रयुक्ति कहा गया है। 'भाति पद्मः सरोवरे' में 'पद्मः' पद का प्रयोग पुंल्लिङ्ग में किया है जो कोषादि में प्रसिद्ध है परन्तु कविसम्प्रदाय में 'पद्म' शब्द सदा नपुंसकलिङ्ग में ही प्रयुक्त हुआ करता है। 'अप्रयुक्तत्व' दोष से वही कवि बच सकता है जिसने काव्य-साहित्य का अध्ययन व अनुशीलन किया हो।

इसी प्रकार दोष विवेचन में ही प्रसिद्धित्याग दोष का भी वर्णन प्राप्त होता है- प्रसिद्धित्यागो यथा-

घोरो वारिमुचां रवः[1]।

प्रसिद्धित्याग वह दोष है जिसे 'कविसमयप्रसिद्धि' का त्याग कहा गया है। 'घोरो वारिमुचां रवः' में मेघो के गर्जन के लिये रवः शब्द का प्रयोग हुआ जो कविसम्प्रदाय में स्वीकार्य नहीं है, यहां मेघों के गर्जन के लिये 'गर्जित' शब्द का प्रयोग किया जाता है।

कवीनां समये ख्याते गुणः ख्यातविरुद्धता[2]।

कविसमयख्यातानि च-

मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्योः
रक्तौ च क्रोधरागौ; सरिदुदधिगतं पङ्कजेन्दीवरादि।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसा॥
पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यै-
र्यूनामङ्गेषु हाराः, स्फुटति च हृदयं विप्रयोगस्य तापैः।
मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतो-
र्भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वत्॥
अह्न्यम्भोजं, निशायां विकसति कुमुदं, चन्द्रिका शुक्लपक्षे
मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात्।
न स्याज्जाती वसन्ते; न च कुसुमफले गन्धसारद्रुमाणा-
मित्याद्युन्नेयमन्त्यत्कविसमयगतं सत्कवीनां प्रबन्धे[3]॥


---

[1] साहित्यदर्पण)पृ. (56चौखम्भा विद्याभवन, वाराणसी।

[2] Ibid., 7:22.

[3] Ibid., 7:23, 24, 25.

यायावरीय राजशेखर ने काव्यमीमांसा में कविसमय का सांगोपांग वर्णन किया है। कविसमय में कुछ अर्थ तो कविसमय के रूप में प्रसिद्ध रहा है और कुछ बाद में विद्वानों द्वारा उपक्रमार्थवश गढा गया है। कविसमय के, यहां अनेक भेदोपभेद बताये गये हैं-



स्वर्ग्य और पातालीय की अपेक्षा भौम प्रधान तथा व्यापक विषय वाला होता है।

जो पदार्थ लोक तथा शास्त्र में अदृष्ट हो उसका निबन्धन असत् का उल्लेख है, शास्त्र तथा लोक में दृष्ट पदार्थ का अनिबन्धन सत् का अनुल्लेख है तथा पदार्थ-विषयक उल्लेख-अनुल्लेख से निगमन नियम है।

असत् के निबन्धन में, नदियों में कमल-कुमुदादि का वर्णन, तालाबो में हंस का वर्णन, पर्वत पर स्वर्ण-रत्नादि का वर्णन बताया गया है-

दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः[1]॥

यहां शिप्रा नदी में कवि कालिदास ने कमल का वर्णन किया है। सत् के अनिबन्धन में, वसन्त में मालती का वर्णन न करना, चन्दन वृक्ष में फल-फूल का वर्णन न करना तथा अशोक वृक्ष में फल का वर्णन न करना आदि बताया गया है-

मालतीविमुखश्चैत्रो विकासी पुष्पसम्पदाम्।
आश्चर्यं जातिहीनस्य कथं सुमनसः प्रियाः[2]॥

अनेक प्रचलित व्यवहारों का एक ही स्थान पर प्रदर्शन किया जाना नियम कहलाता है, जैसे समुद्र में ही घड़ियाल, ताम्रपर्णी नदी में ही मोतियों का पाया जाना आदि-

गोत्राग्रहारं नयतो गृहत्वं स्वनाममुद्राङ्कितमम्बुराशिम्।

---

[1] मेघदूत, पूर्वमेघ - 31

[2] काव्यमीमांसा. 169.

दायादवर्गेषु परिस्फुरत्सु दंष्ट्रावलेपो मकरस्य वन्द्यः[1]॥

ध्वन्यालोक में राजानक आनन्दवर्धन ने कविसमय का स्पष्ट उल्लेख तो नहीं किया है परन्तु रस से सम्बद्ध औचित्य का अनुसरण करने वाली देश-काल इत्यादि से भिन्न वस्तु का अनुगमन करना श्रेष्ठ बताया गया है-

रसभावादिसम्बद्धा यद्यौचित्यानुसारिणी।
अन्वीयते वस्तुगतिर्देशकालादिभेदिनी[2]॥

अधिकांशतः ऐसा देखा जाता है कि शब्दार्थ को काव्य में अवस्था, देश, काल, स्वरूप इत्यादि के भेद से निबद्ध किया जाता है जिसका अपलाप सम्भव नहीं किन्तु उसकी शोभा रस के आश्रय से ही होती है लेकिन इसमें भी औचित्य का पालन अनिवार्य होता है और काव्य को रस, भावादि से सम्बद्ध रखा जाये तो देश-काल से विभेद को प्राप्त होने वाली वस्तु की गति इतनी अनन्त हो जाती है कि इसको सहस्र प्रयत्नों द्वारा भी निबद्ध किया जाए तो वह काव्यस्थिति समाप्त नहीं होगी।

इस प्रकार कविसमय, काव्य में चारुत्व लाने का प्रमुख आधार है, जिसका विवेचन काव्यशास्त्रियों ने विभिन्न रूपों में किया है। अनेक कल्पों में सृष्टि की रचना करने के लिये प्रकृति का उपयोग किया गया तथा विधि ने इस सृष्टि में विचित्र और आश्चर्यजनक वस्तुओं का ही आविर्भाव किया है, उसी प्रकार कवियों को संख्यातीत बुद्धियों का समूह इस काव्यस्थिति का उपभोग करता रहा है फिर भी काव्यवस्तु समाप्त नहीं हुई प्रत्युत नवीन व्युत्पत्तियों से बढ़ती ही जा रही है।

<u>सन्दर्भग्रन्थसूचि</u>

1. मिश्र केशव, 1984, अलंकारशेखर, चौखम्भा संस्कृत सिरीज, वाराणसी।

2. द्विवेदी शिवप्रसाद, 2020, ध्वन्यालोक, चौखम्भा सुरभारती प्रकाशन, वाराणसी।

3. शर्मा डा.रामानन्द, 2013, काव्यालङ्कार, चौखम्भा संस्कृत सिरीज, वाराणसी।

4. विश्वेश्वर आचार्य, 1954, काव्यालङ्कारसूत्रवृत्ति, दिल्ली अनुसन्धान परिषद्, आत्माराम एण्ड सन्स, दिल्ली।

5. श्रीरामचन्द्र आचार्य, 2016, काव्यादर्श, चौखम्भा सुरभारती प्रकाशन, वाराणसी।

6. रायडा० गङ्गासागर, 2013, काव्यमीमांसा, चौखम्भा विद्याभवन, वाराणसी।

7. विश्वेश्वर आचार्य, 2013, काव्यप्रकाश, डा० नरेन्द्र ज्ञानमण्डल लिमिटेड, वाराणसी।

8. त्रिपाठी डा श्रीकृष्णमणि, 2019, चन्द्रालोक, चौखम्भा सुरभारती प्रकाशन, वाराणसी।

---

[1] काव्यमीमांसा, 170.

[2] ध्वन्यालोक, 4:9.

9. चिन्तामणि T.R., 1937, सरस्वतीकण्ठाभरण, पाण्डुरङ्ग जावजी, बाम्बे।

10. सिंह डा. सत्यव्रत, 2015, साहित्यदर्पण, चौखम्भा विद्याभवन, वाराणसी।

11. शर्मा ऋषि डा. उमाशंकर, 2021, संस्कृत साहित्य का इतिहास, चौखम्भा भारती अकादमी, वाराणसी।

12. मिश्रा जगदीश चन्द्र, 1971, चित्रमीमांसा, चौखम्भा विद्याभवन, वाराणसी।

13. शर्मा श्रीशेषराज, 2013, मेघदूत, चौखम्भा विद्याभवन, वाराणसी।

Author's Detail

Name : Sonali Bajpai
Designation : Research scholar,
Address : Department of Sanskrit & Prakrit Languages,
University of Lucknow.
Uttar Pradesh, Bhārat (India) 226007
Email : sonalibajpai1994@gmail.com

****

कृत्यप्रत्ययार्थविमर्शः

Dr. Suneli Dei

शोधसारः

महर्षिपाणिनिना पाणिनीयव्याकरणे ३९९६सूत्रैः प्रकृतिप्रत्ययाभ्यां साधुशब्दानामनुशासनं कृतम्। धातुः प्रातिपदिकञ्च प्रकृतिरूपेण गृह्येते। प्रकृतिः सर्वदा आदौ प्रयुज्यते, प्रत्ययः सर्वदा प्रकृतेः अनन्तरं प्रयुज्यते। पाणिनिमतेन पदं द्विविधम्-सुबन्तं तिङन्तञ्च। धातोः तिङ्-प्रत्ययाः प्रयुज्यन्ते, प्रातिपदिकात् सुप्-प्रत्ययाः प्रयुज्यन्ते। कृत्तद्धितसमासाश्च इति सूत्रानुसारं कृत्यप्रत्ययान्तः प्रातिपदिकं भवति। अत एव कृत्यप्रत्ययान्त- प्रातिपदिकात् सुप्-प्रत्ययाः प्रयुज्यन्ते। तस्मात् कृत्यप्रत्ययान्तपदं सुबन्तं भवति। १) तव्यत् २) तव्य ३) अनीयर् ४) केलिमर् ५) यत् ६) क्यप् ७) ण्यत् चेति सप्त कृत्यप्रत्ययाः भवन्ति।

तयोरेव कृत्यक्तखलर्थाः[1] इति सूत्रानुसारेण भाववाच्ये कर्मवाच्ये च कृत्यप्रत्ययाः प्रयुक्ताः भवन्ति। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च इति सूत्रेण प्रैष-अतिसर्ग-प्राप्तकालेषु इत्येतेष्वर्थेषु लिङ्-प्रत्ययाः कृत्यप्रत्ययाः अपि प्रयुज्यन्ते।[2] अर्हतीत्यर्हः, तद्योग्यः। अर्हे कृत्यतृचश्च इति सूत्रेण अर्हे कर्त्तरि वाच्ये धातोः लिङ्-प्रत्ययाः कृत्यप्रत्ययाश्च भवन्ति।[3] कृत्याश्च इति सूत्रानुसारं आवश्यकार्थे आधमर्ण्यार्थे च धातोः कृत्यप्रत्ययाः भवन्ति।[4] शकि लिङ् च इति सूत्रानुसारं शक्यर्थगम्यमानाद् धातोः अपि लिङ्-प्रत्ययाः कृत्यप्रत्ययाश्च स्युः। [5] प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिके अर्थे विद्यमानाद् धातोः लिङ्-प्रत्ययाः कृत्यप्रत्ययाश्च स्युः।[6] कृत्यल्युटो बहुलम् [7] इति सूत्रेण कृत्यप्रत्ययाः ल्युट्-प्रत्ययाश्च बहुलेषु अर्थेषु प्रयुक्ताः भवन्ति।

कुञ्चीशब्दाः - तयोरेव कृत्यक्तखलर्थाः, प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च, अर्हे कृत्यतृचश्च, शकि लिङ् च, कृत्यल्युटो बहुलम्।

****

१.० उपक्रमः

कृत्यप्रत्ययार्थविमर्शः इत्याख्यं शोधपत्रमिदं महर्षेः पाणिनेः अष्टाध्यायीं भट्टोजिदीक्षितस्य सिद्धान्तकौमुदीं जयादित्यवामनयोः काशिकावृत्तिञ्चाधारीकृत्य प्रस्तुतम्। अष्टाध्यायी सूत्रात्मकशैल्या विरचितः एकः व्याकरणग्रन्थः। प्रकृतिप्रत्ययशैल्या तेन साधुशब्दानामनुशासनं कृतम्। सूत्रात्मकशैल्या विरचितायाः

---

[1] पा. ३.४..७०

[2] पा. ३.३.१६३

[3] पा. ३.३.१६९

[4] पा. ३.३.१७१

[5] पा. ३.३.१७२

[6] पा. ३.३.१६४

[7] पा. ३.३.११३

अष्टाध्याय्याः द्विविधः व्याख्यानग्रन्थः दृश्यते - १) वृत्तिशैल्या रचितः व्याख्यानग्रन्थः। अष्टाध्याय्याः वृत्तिग्रन्थेषु काशिकावृत्तिः श्रेष्ठा। २) प्रक्रियाशैल्या प्रकरणक्रमेण रचितः व्याख्यानग्रन्थः। अष्टाध्याय्याः प्रक्रियाग्रन्थेषु सिद्धान्तकौमुदी सर्वश्रेष्ठा।

१.१ कृत्यप्रत्ययाः

कृदतिङ् (पा. ३.१.९३) इति सूत्रेण महर्षिः पाणिनिः सूचितवान् यत् धात्वधिकारे[1] उक्तः धातोः तिङ्-प्रत्ययभिन्नः यः प्रत्ययः प्रयुक्तः भवति, सः प्रत्ययः कृत्प्रत्ययः भवति। कृत्यप्रत्ययाः कृत्प्रत्ययान्तर्गताः भवन्ति।[2] कृत्याः इति अधिकारसूत्राधीने यानि यानि सूत्राणि सन्ति, तैः सूत्रैः उपदिष्टाः प्रत्ययाः कृत्यप्रत्ययाः भवन्ति। ते प्रत्ययाः भवन्ति-१) तव्यत्, २) तव्य, ३) अनीयर्, ४) केलिमर्, ५) यत्, ६) क्यप्, ७) ण्यत्।

१. **तव्यत् –तव्य-अनीयर्-प्रत्ययाः** - तव्यत्तव्यानीयरः[3] इति सूत्रेण तव्यत् प्रत्ययः, तव्यप्रत्ययः, अनीयर्-प्रत्ययश्च सर्वेभ्यः धातुभ्यः स्युः।

२. **केलिमर्-प्रत्ययः** – केलिमर उपसंख्यानम्[4] इति वार्त्तिकानुसारेण सर्वेभ्यः धातुभ्यः केलिमर्-प्रत्ययः स्यात्।

३. **यत्-प्रत्ययः-** महर्षिपाणिनिना अचो यत् [5], पोरदुपधात्[6], शकिसहोश्च[7], गदमदचरयमश्चानुपसर्गे[8] चेति सूत्रैः तथा तकिशसिचतियतिजनिभ्यो यद्-वाच्यः[9], चरेराङि चागुरौ [10] चेति वार्त्तिकाभ्यां यत्-प्रत्ययस्य विधानं कृतम्। अजन्तधातुभ्यः, पवर्गान्ताद् अदुपधात् धातोः, अनुपसर्गेभ्यः गद-मद-चर-यमधातुभ्यः, शक्-सह्-तक्-शस्-चत्-यत्-जन्--धातुभ्यश्च यत्-प्रत्ययः भवेत्।

४. **क्यप्-प्रत्ययः-** भुवो भावे[11], हनस्त च[12], एतिस्तुशास्वृदृजुषः क्यप्[1] ऋदुपधाच्चाक्लृपिचृतेः[2], ई च खनः[3],

---

[1] धातोः (पा.३.१.९१)

[2] कृत्याः (पा. ३.१.९५)

[3] पा.३.१.९६

[4] सि.कौ.-२८३४, पा. ३.१.९६. वा.-२९२०

[5] पा. ३.१.९७

[6] पा. ३.१.९८

[7] पा. ३.१.९९

[8] पा. ३.१.१००

[9] सि.कौ.-२८४३, पा. ६.४.६५, . वा.-१९२२

[10] सि.कौ.-२८४८, पा. ३.१.१००. वा.-१९२५

[11] पा. ३.१.१०७

[12] पा. ३.१.१०८

भृञोऽसंज्ञायाम्[4] इति सूत्रैः क्यप्-प्रत्ययस्य विधानं क्रियते। भूधातोः भावे क्यप्-प्रत्ययः स्यात्। अनुपसर्गे सुप्युपपदे हन्-धातोः क्यप्-प्रत्ययः स्यात्। एतिस्तुशास्वृदृजुष्-धातुभ्यः क्यप्-प्रत्ययः स्यात्। खन्-धातोः क्यप्-प्रत्ययः स्यात् ईकारश्चान्तादेशः भवति। भृञ्-धातोः क्यप्-प्रत्ययः स्यात् असंज्ञायाम् विषये। ऋकारोपधाच्च धातोः क्यप्-प्रत्ययः स्यात् क्लृप्-चृती वर्जयित्वा।

५. **ण्यत्-प्रत्ययः** - ऋहलोर्ण्यत्[5], ओरावश्यके[6], आसुयुवपिरपिलपित्रपिचमश्च[7] चेति सूत्रैः ण्यत्-प्रत्ययस्य विधानं भवति। ऋवर्णान्ताद् हलन्ताद् धातोः ण्यत्-प्रत्ययः स्यात्। अवश्यम्भावे द्योत्ये उवर्णान्ताद् धातोः ण्यत्-प्रत्ययः स्यात्। आ-उपसर्गपूर्वकात् सुधातोः यु-वप्-रप्-त्रप्-चम्-धातुऊयश्च ण्यत्-प्रत्ययः स्यात्।

६. **वैकल्पिकविधानम्-** हनो वा यद् वधश्च वक्तव्यः[8] इति वार्त्तिकेन, मृजेर्विभाषा, वदः सुपि क्यप् च, विभाषा कृवृषोः इति सूत्रत्रयेण कृत्यप्रत्ययानां वैकल्पिकविधानं क्रियते। हनो वा यद् वधश्च वक्तव्यः[9] इति वार्त्तिकेन हन् धातोः विकल्पेन यत्-प्रत्ययः स्यात् हन् धातोः स्थाने वधादेशश्च भूत्वा वध्यः इति रूपं भवेत्। अन्यपक्षे हन्धातुः हलन्तत्वाद् ण्यत्-प्रत्ययः भूत्वा घात्यः इति रूपं सिद्ध्यति। वदः सुपि क्यप् च[10] इति सूत्रेण सुप्युपपदे अनुपसर्गे भावे क्यप् यत् च स्याताम्। मृजेर्विभाषा[11] इति सूत्रेण मृज्-धातोः उभयोः क्यप्-प्रत्यय-ण्यत्-प्रत्यययोः विधानं दृश्यते। विभाषा कृवृषोः[12] इति सूत्रेण कृञो वृषेश्च विकल्पेन क्यप् प्रत्ययः स्यात्।

---

1 पा. ३.१.१०९

2 पा. ३.१.११०

3 पा. ३.१.१११

4 पा. ३.१.११२

5 पा. ३.१.१२४

6 पा. ३.१.१२५

7 पा. ३.१.१२६

8 सि.कौ.-२८४३, पा.६.४.६५, . वा.-१९२३

9 सि.कौ.-२८४३, पा.६.४.६५, . वा.-१९२३

10 पा. ३.१.१०६

11 पा. ३.१.११३

12 पा. ३.१.१२४

१.२ कृत्यप्रत्ययार्थाः

१.२.० उपक्रमः

कृत्यप्रत्ययाः कस्मिन् कस्मिन्नर्थे प्रयुक्ताः भवेयुः, तस्मिन् विषये अष्टाध्यायीसूत्रोल्लेखपूर्वकं क्रमेण उल्लिख्यन्ते--

१.२.१ तयोरेव कृत्यक्तखलर्थाः

तयोरेव कृत्यक्तखलर्थाः[1] इति सूत्रानुसारेण भाववाच्ये कर्मवाच्ये च कृत्यप्रत्ययाः प्रयुक्ताः भवन्ति। भाववाच्ये यथा-त्वया एधितव्यम्। एध (वृद्धौ) धातोः तव्यत्-प्रत्यययोगेन एधितव्यमिति पदस्य निष्पत्तिर्भवति। अत्र तित् स्वरितम् (पा.६.१.८५) इति सूत्रेण तव्यत्-प्रत्ययस्य आदिस्वरः स्वरितस्वरविशिष्टः भवति। त्वया कर्त्तव्यम्। डुकृञ् (करणे) धातोः तव्य-प्रत्यययोगेन कर्त्तव्यम् इति पदस्य निष्पत्तिर्भवति। अत्र आद्युदात्तश्च (पा.३.१.३) इति सूत्रेण तव्यप्रत्ययस्य आदिस्वरः उदात्तस्वरविशिष्टः भवति। यद्यपि तव्यत्प्रत्ययान्तपद-तव्यप्रत्ययान्तपदयोः मध्ये रूपदृष्ट्या किमपि पार्थक्यं नास्ति, तथापि स्वरदृष्ट्या तव्यत्-तव्यप्रत्यययोः विधानं पाणिनिना कृतम्॥ भाववाच्ये कृत्यप्रत्ययान्तपदस्य प्रयोगः नपुंसकलिङ्गे भवति। तथा चोक्तं भट्टोजिदीक्षितेन- भावे औत्सर्गिकमेकवचनं क्लीवत्वञ्च।[2] कर्मवाच्ये यथा- चेतव्यश्चयनीयो वा धर्मस्त्वया। अत्र चिञ् (चयने) धातोः तव्यप्रत्यययोगेन चेतव्यपदस्य निष्पत्तिः भवति, चिञ् (चयने) धातोः अनीयर्-प्रत्यययोगेन चयनीयपदस्य सिद्धिर्भवति।

१.२.२ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च इति सूत्रेण प्रैष-अतिसर्ग-प्राप्तकालेषु इत्येतेष्वर्थेषु लोट्-प्रत्ययाः कृत्यप्रत्ययाः अपि प्रयुज्यन्ते[3]। प्रेषणम् प्रैषः, कामचाराभ्यनुज्ञानमतिसर्गः, निमित्तभूत्तस्य कालस्यावसरः प्राप्तकालता। प्रैषार्थे यथा- त्वया विद्यालयः गन्तव्यः। त्वं विद्यालयं गच्छेत्यर्थः। अतिसर्गार्थे यथा- त्वया विद्यालयः गन्तव्यः। यदि तव इच्छा अस्ति, तर्हि त्वं विद्यालयं गच्छेत्यर्थः। प्राप्तकालार्थे यथा- त्वया विद्यालयः गन्तव्यः। अधुना त्वया विद्यालयगमनार्थं समयः उपस्थितः इत्यर्थः।

---

[1] पा. ३.४..७०

[2] पा. ३.१.९६, सि.कौ.वृत्तिः-२८३४

[3] पा. ३.३.१६३

१.२.३ अर्हे कृत्यतृचश्च

अर्हतीत्यर्ह, तद्योग्यः। अर्हे कृत्यतृचश्च इति सूत्रेण अर्हे कर्त्तरि वाच्ये धातोः लोट्-प्रत्ययाः कृत्यप्रत्ययाश्च भवन्ति।[1] यथा- त्वया कन्या वोढव्या, वाह्या, वहनीया वेति। कन्योद्वहने त्वं योग्यः इत्यर्थः।

१.२.४ कृत्याश्च

कृत्याश्च इति सूत्रानुसारं आवश्यकार्थे आधमर्ण्यार्थे च धातोः कृत्यप्रत्ययाः भवन्ति।[2] आवश्यकार्थे यथा- त्वया अवश्यं कटः कर्त्तव्यः करणीयः कार्यः कृत्यः वा। आधमर्ण्यार्थे यथा- देवदत्तेन शतं दातव्यम् देयम् वा।

१.२.५ शकि लिङ् च

शकि लिङ् च इति सूत्रानुसारं शक्यर्थगम्यमानाद् धातोः अपि लिङ्-प्रत्ययाः कृत्यप्रत्ययाश्च स्युः। [3] यथा- भवता खलु भारो वोढव्यः वहनीयः वाह्यः वा। भवान् भारं वोढुं शक्यः इत्यर्थः।

१.२.६ लिङ् चोर्ध्वमौहूर्तिके

प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिके अर्थे विद्यमानाद् धातोः लिङ्-प्रत्ययाः कृत्यप्रत्ययाश्च स्युः।[4] यथा-ऊर्ध्वं मुहूर्त्तात् (उपरि मुहूर्त्तस्य) भवता खलु कटः कर्त्तव्यः करणीयः कार्यः वा।

१.२.७ कृत्यल्युटो बहुलम्

कृत्यल्युटो बहुलम् [5] इति सूत्रेण कृत्यप्रत्ययाः ल्युट्-प्रत्ययाश्च बहुलेषु अर्थेषु प्रयुक्ताः भवन्ति। यथा- स्नान्त्यनेन इति स्नानीयं चूर्णम्। अत्र करणार्थे कृत्यप्रत्ययस्य (अनीयर्-प्रत्ययस्य) प्रयोगः भवति। तथैव दीयतेऽस्मै इति दानीयो विप्रः। अत्र सम्प्रदानार्थे कृत्यप्रत्ययस्य (अनीयर्-प्रत्ययस्य) प्रयोगः भवति।

१.२.८ निपातनसिद्धकृत्यप्रत्ययान्तपदानि

पूर्वोक्तान् अर्थान् विहाय लोके कानिचन कृत्यप्रत्ययान्तपदानि दृश्यन्ते, यानि पदानि पाणिनिना साक्षात् सूत्रे उल्लिख्य तेषां साधुत्वं प्रदर्शितम्। एतादृशानि सूत्राणि निपातनसूत्राणि इति कथ्यन्ते। वार्त्तिककारेण कात्यायनेन अपि एतदर्थं वार्त्तिकानि विरचितानि। अत्र एतेषां निपातनसिद्धकृत्यप्रत्ययान्तपदानामर्थनिर्देशः क्रियते -- १. वास्तव्यः[6] इति तव्यप्रत्ययान्तपदं अधिवासीत्यर्थे,

---

[1] पा. ३.३.१६९

[2] पा. ३.३.१७१

[3] पा. ३.३.१७२

[4] पा. ३.३.१६४

[5] पा. ३.३.११३

[6] वसेस्तव्यत् कर्त्तरि णिच्च पा. ३.१.९६, सि.कौ.-२८३४, वा. १९२०

२. अवद्यम् (पापम्) इति यत्-प्रत्ययान्तपदं गर्ह्यार्थे, ३. पण्या (गौः) इति यत्-प्रत्ययान्तपदं पणितव्यार्थे, ४. वर्या (कन्या)[1] इति यत्-प्रत्ययान्तपदम् अनिरोधार्थे ५. बह्यम्[2] (शकटम्) इति यत्-प्रत्ययान्तपदं करणार्थे, ६. अर्यः[3] (स्वामी वैश्यः वा) इति यत्-प्रत्ययान्तपदं स्वाम्यर्थे वैश्यार्थे च, ७. उपसर्या[4] (गौः) इति यत्-प्रत्ययान्तपदं गर्भग्रहणे प्राप्तकाला इत्यर्थे (गर्भाधारणार्थं योग्या इत्यर्थे), ८. अजर्यम्[5] (अक्षयमैत्री) इति यत्-प्रत्ययान्तपदं सङ्गतार्थे, ९. राजसूयः इति क्यप्-प्रत्ययान्तपदं यज्ञार्थे, १०. सूर्यः इति क्यप्-प्रत्ययान्तपदं भानु-अर्थे, ११. मृषोद्यम् इति क्यप्-प्रत्ययान्तपदं मिथ्यावचनार्थे, १२. रुच्यः इति क्यप्-प्रत्ययान्तपदं रोचते इत्यर्थे, १३. कुप्यम् इति क्यप्-प्रत्ययान्तपदं सुवर्णरजतभिन्नधनार्थे, १४. कृष्टपच्याः इति क्यप्-प्रत्ययान्तपदं कृष्टे पच्यन्ते स्वयमेव इति कर्मकर्त्तर्यर्थे, १५. अव्यथ्यः[6] इति क्यप्-प्रत्ययान्तपदं न व्यथते इत्यर्थे, १६. भिद्यः (नदी) इति क्यप्-प्रत्ययान्तपदं नदार्थे, १७. उद्ध्यः[7] (नदी) इति क्यप्-प्रत्ययान्तपदं नदार्थे, १८. पुष्यः (नक्षत्रम्) इति क्यप्-प्रत्ययान्तपदं नक्षत्रार्थे, १९. सिध्यः[8] (नक्षत्रम्) इति क्यप्-प्रत्ययान्तपदं नक्षत्रार्थे, २०. विपूयः (मुञ्जः) इति क्यप्-प्रत्ययान्तपदं रज्ज्वाद्यर्थे, २१. विनीयः (कल्कः) इति क्यप्-प्रत्ययान्तपदं पिष्ट-औषधिविशेषार्थे, २२. जित्यः[9] (हलिः) इति क्यप्-प्रत्ययान्तपदं वलेन क्रष्टव्यार्थे, २३. युग्यम्[10] (वाहनम्) इति क्यप्-प्रत्ययान्तपदं वाहनार्थे, २४. भोज्यम्[11] इति ण्यत्-प्रत्ययान्तपदं भक्ष्यपदार्थार्थे, २५. आनाय्यः[12] इति ण्यत्-प्रत्ययान्तपदं दक्षिणाग्निविशेषार्थे, २६. प्रणाय्यः[13] इति ण्यत्-प्रत्ययान्तपदं प्रीत्यनर्हे चौराद्यर्थे भोगेषु विरक्तार्थे अन्तेवास्याद्यर्थे, २७. पाय्यम् इति ण्यत्-प्रत्ययान्तपदं मानार्थे, २८. सान्नाय्यम् इति ण्यत्-प्रत्ययान्तपदं

---

[1] अवद्यपण्यवर्या गर्ह्यपणितव्याऽनिरोधेषु पा.३.१.१०१

[2] वह्यं करणम् (पा.३.१.१०२)

[3] अर्यः स्वामिवैश्ययोः (पा. ३.१.१०२)

[4] उपसर्या काल्या प्रजने (पा. ३.१.१०४)

[5] अजर्यं सङ्गतम् (पा. ३.१.१०५)

[6] राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्याव्यथ्याः (पा. ३.१.११४)

[7] भिद्योद्ध्यौ नदे (पा. ३.१.११५)

[8] पुष्यसिध्यौ नक्षत्रे (पा. ३.१.११५)

[9] विपूयविनीयजित्या मुञ्जकल्कहलिषु (पा. ३.१.११७)

[10] युग्यं च पत्रे (पा. ३.१.१२१)

[11] भोज्यं भक्ष्ये (पा. ७.३.६९)

[12] आनाय्योऽनित्ये (पा. ३.१.१२७)

[13] प्रणाय्योऽसम्मतौ (पा. ३.१.१२८)

हविर्विशेषार्थे, २९. निकाय्यः इति ण्यत्-प्रत्ययान्तपदं निवासार्थे, ३०. धाय्या[1] इति ण्यत्-प्रत्ययान्तपदं सामिधेनी ऋगर्थे, ३१. कुण्डपाय्यः इति ण्यत्-प्रत्ययान्तपदं क्रत्वर्थे, ३२. सञ्चाय्यः[2] इति ण्यत्-प्रत्ययान्तपदं क्रत्वर्थे, ३३., ३४., ३५. परिचाय्यः उपचाय्यः समूह्यः[3] इत्येतानि त्रीणि ण्यन्तप्रत्ययान्तपदानि अग्निधारणार्थस्थलविशेषार्थे, ३६. चित्यः इति ण्यत्-प्रत्ययान्तपदं अग्नि-अर्थे, ३७. अग्निचित्या[4] इति ण्यत्-प्रत्ययान्तपदं अग्नेश्चयनार्थे, ३८. भव्यः इति यत्-प्रत्ययान्तपदं भवतीतीत्यर्थे, ३९. गेयः इति यत्-प्रत्ययान्तपदं गायतीतीत्यर्थे, साम्नाम् गेयः सामवेदस्य गायकः वा इत्यादिः, ४०. प्रवचनीयः इति अनीयर्-प्रत्ययान्तपदं वेदस्य प्रवक्ता इत्यर्थे, ४१. उपस्थानीयः इति अनीयर्-प्रत्ययान्तपदम् उपतिष्ठतीत्यर्थे, ४२. जन्यः इति यत्-प्रत्ययान्तपदं जायते इति इत्यर्थे, ४३. आप्लाव्यः इति ण्यत्-प्रत्ययान्तपदम् आप्लवते असौ इत्यर्थे, ४४. आपात्यः[5] इति ण्यत्-प्रत्ययान्तपदं आपतति असौ इत्यर्थे ४५. आचर्यः[6] (देशः) इति यत्-प्रत्ययान्तपदं गमनस्य योग्ये देशे अर्थे च प्रयुक्तानि भवन्ति।

१.३ उपसंहारः

शोधपत्रेऽस्मिन् तव्यत्–तव्य-अनीयर्-केलिमर्-यत्-क्यप्-ण्यत्-प्रत्ययाः इत्येते सप्तसंख्याकाः कृत्यप्रत्ययाः आलोचिताः। केलिमर्-प्रत्ययः वार्त्तिकोक्तः भवति। अन्ये षट् प्रत्ययाः सूत्रोक्ताः भवन्ति।

तव्यत्–तव्य-अनीयर्-केलिमर्-प्रत्ययाः सर्वेभ्यः धातुभ्यः प्रयुक्ताः भवन्ति।

अजन्तधातुभ्यः यत्-प्रत्ययः भवति। पवर्गान्ताद् अदुपधात् धातोः, अनुपसर्गेभ्यः गद्-मद्-चर्-यमधातुभ्यः, शक्-सह्-तक्-शस्-चत्-यत्-जन्—धातुभ्यश्चापि यत्-प्रत्ययः भवति।

भूधातोः भावे, अनुपसर्गे सुप्युपपदे हन्-धातोः, एतिस्तुशास्वृदृजुष्-धातुभ्यः क्यप्-प्रत्ययः भवति। खन्-धातोः क्यप्-प्रत्ययः स्यात् ईकारश्चान्तादेशः भवति। भृञ्-धातोः क्यप्-प्रत्ययः स्यात् असंज्ञायाम् विषये। ऋकारोपधाच्च धातोः क्यप्-प्रत्ययः स्यात् क्लृप्-चृती वर्जयित्वा।

ऋवर्णान्ताद् हलन्ताद् धातोः ण्यत्-प्रत्ययः भवति। अवश्यम्भावे द्योत्ये उवर्णान्ताद् धातोः ण्यत्-प्रत्ययः भवति।आ-उपसर्गपूर्वकात् सुधातोः यु-वप्-रप्-त्रप्-चम्-धातुऊयश्च ण्यत्-प्रत्ययः भवति।

---

[1] पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु (पा. ३.१.१२९)

[2] क्रतौ कुण्डपाय्यसञ्चाय्यौ (पा. ३.१.१३०)

[3] अग्नौ परिचाय्योपचाय्यसमूह्याः (पा. ३.१.१३१)

[4] चित्यऽग्निचित्ये च (पा. ३.१.१३२)

[5] भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा (पा. ३.४.६८)

[6] चरेराङि चागुरौ (पा.३.१.१००, सि.कौ.२८४८, वा.- १९२५)

कृत्यप्रत्ययानां वैकल्पिकविधानविषयेऽपि अत्रोल्लिख्यते। भाववाच्ये, कर्मवाच्ये, प्रैष-अतिसर्ग-प्राप्तकालेषु इत्येतेष्वर्थेषु, अर्हे कर्त्तरि वाच्ये, आवश्यकार्थे, आधमर्ण्यार्थे, शक्यर्थगम्यमानाद् धातोः, प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिके अर्थे विद्यमानाद् धातोश्च कृत्यप्रत्ययाः प्रयुज्यन्ते। उपर्युक्तान् अर्थान् विहाय बहुलेषु करणसम्प्रदानादिष्वर्थेषु कृत्यप्रत्ययानां प्रयोगः दृश्यते। एतदर्थं महर्षिपाणिनिना कृत्यल्युटो बहुलम् इति सूत्रं प्रणीतम्। अपि च लोके बहवः कृत्यप्रत्ययान्ताः शब्दाः दृश्यन्ते, येषां शब्दानां सिद्ध्यर्थं महर्षिपाणिनिना निपातनसूत्राणि रचितानि। शोधपत्रेऽस्मिन् पञ्चचत्वारिंशत्संख्याकानि (४५) कृत्यप्रत्ययान्तपदानि अर्थनिर्देश-पूर्वकं संकलितानि। वास्तव्यः आचर्यः चेति पदद्वयस्य सिद्धिः वार्त्तिकाभ्यां भवति। अन्येषां त्रिचत्वारिंश-त्संख्याकानां (४३) कृत्यप्रत्ययान्तपदानां साधुत्वं निपातनसूत्रैः प्रदर्श्यते। पञ्चचत्वारिंशत्संख्याकेषु (४५) निपातनसिद्धकृत्यप्रत्ययान्तपदेषु एकं तव्यप्रत्ययान्तपदम्, द्वे अनीयर्-पदे, एकादश यत्-प्रत्ययान्तपदानि, पञ्चदश क्यप्-प्रत्ययान्तपदानि, षोडश ण्यत्-प्रत्ययान्तपदानि च सन्ति।

सन्दर्भग्रन्थसूचिः

१. आर्येन्द्रः शर्मा. (Ed.). (1970). काशिका (भागद्वयात्मिका) (1st ed.). ओसमानिआ यूनिभरसिटि(संस्कृत-अकादमी), हाइदरावाद्.

२. कील्हार्न (Ed.). (1972). पतञ्जलिप्रणीतं महाभाष्यम् (भागत्रयात्मकम्). भण्डारकर ओरियेण्टाल रिसर्च इन्ष्टिच्युट्, पूना.

३. गोपबन्धुः मिश्रः. (Ed.). (1994). वैयाकरणसिद्धान्तकौमुदी (कृत्यप्रकरणम्). चौखम्बा-ओरिएण्टालिआ, वाराणसी.

४. गोविन्दः आचार्यः. (Ed.). (2020). वैयाकरणसिद्धान्तकौमुदी (कृदन्तप्रकरणम्). चौखम्बा –सुरभारती-प्रकाशनम्, वाराणसी

५. नारायणः मिश्रः. (Trans.). (1977). अष्टाध्यायीसूत्रपाठः (हिन्दीभाषया अनूदितः). चौखम्बा-ओरिएण्टालिआ, वाराणसी.

६. नरेशः झा. (Trans.). (2019). अष्टाध्यायीसूत्रपाठः (हिन्दी-संस्कृतभाषाभ्याम् अनूदितः). चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी.

७. श्रीगिरिधरः शर्मा श्रीपरमेश्वरानन्दः शर्मा च. (Ed.). (1997). वैयाकरणसिद्धान्तकौमुदी (चतुर्भागात्मिका, बालमनोरमया तत्त्वबोधिन्या च समलङ्कृता). मोतिलालबनारसीदासः, दिल्ली.

Author's Detail

Name : Dr. Suneli Dei
Designation : Assistant Professor
Address : Dept. of Sanskrit
Gangadhar Meher University
Amruta Vihar, Sambalpur-768004
Email : drsunelidei@gmail.com

****

धातोः स्वरूपविवरणम् - एका समीक्षा

Soma Pramanick

शोधसारः

तिङन्तपदस्य या प्रकृतिः सा एव धातुपदेनाभिधीयते। धातुः क्रियायाः वाचकः। क्रियासम्बन्धे शौनकादयः प्राचीनाः ऋषय अवदन्-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते॥

धातुः द्विविधः सकर्मकः अकर्मकश्च। एतयोर्मध्ये फलविशिष्टव्यापारबोधकः धातुः सकर्मकः। फलेन अविशेषितः केवलव्यापारबोधको धातुरेव अकर्मकः धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वम्, तद्बोधकत्वे चाकर्मकत्वम्, इति वैयाकरणसम्प्रदाये उक्तम्। अत एव दृश्यते यत् व्यापारबोधकत्वविषये समानार्थकत्वेऽपि फलावच्छिन्नव्यापारस्य केवलव्यापारस्य चेति उभयस्य भेदवशात् धातवः द्विविधाः भवितुमर्हन्ति। सकर्मकाः अकर्मकाश्च। भट्टोजिदीक्षितस्यापि उक्तिरस्ति-

फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥

यस्याः क्रियायाः कर्म विद्यते सा सकर्मिका, यस्याः च क्रियायाः कर्म न विद्यते सा अकर्मिका इत्युच्यते। प्रत्येकं क्रियाया एव एकं फलं व्यापारश्च विद्यते। येन उद्देश्येन क्रियायाः प्रवृत्तिर्भवति तत् फलमित्युच्यते। यच्च तस्य फलस्य जनकः असौ व्यापार इत्युच्यते। यस्मिन् स्थले फलं व्यापारश्च कर्तरि एव निबद्धः तिष्ठति सा क्रिया अकर्मिका इत्युच्यते। यथा-असौ हसति। अस्मिन् स्थले हसनक्रिया अकर्मिका। यतः तस्याः क्रियायाः फलं व्यापारश्च कर्तरि एव विद्यमानम्। यस्मिन् स्थले कर्तृभिन्ने अन्यस्मिन् कस्मिंश्चित् पदार्थे फलं तिष्ठति, तत्र क्रियायाः सकर्मकत्वं भवेत्। यथा- देवदत्तः ओदनं पचति। अत्र अधिश्रयणात् आरभ्य स्थाल्यपकर्षणं यावत् पाकक्रियायाः व्यापारो विस्तृतो विद्यते। पदार्थस्य विक्लित्तिरूपिणी शिथिलता तस्य फलम्। इयं शिथिलता विक्लित्तिर्वा कर्तृभिन्ने अन्यस्मिन् पदार्थे ओदनरूपे विद्यते इति पाकक्रिया सकर्मिका। अत एव धातवः त्रिविधाः अकर्मकाः, सकर्मकाः, द्विकर्मकाश्च। अस्माकं तु मतेन धातवस्तु चतुर्विधाः भवन्ति।

बोपदेवस्य मतेन उक्तानां दश लकाराणां मध्ये प्रत्येकस्मिन् एव अष्टादश (18) विभक्तयो भवन्ति। पाणिनिस्तु तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस् इत्यादि अष्टादशविभक्ति-निर्देश-पूर्वकं तेषां स्थले क्रमशः अशीत्य-धिकशतं (180) विभक्तीनाम् आदेशविधानं कृतवान्। यद्वा भवतु, दशलकाराणां प्रत्येकं प्रथमं नवविभक्तयः परस्मैपदीयाः अवशिष्टाश्च नव आत्मनेपदीयाः। उक्तेषु प्रत्येकं नव-विभक्तिषु प्रथमत्रयं प्रथमपुरुषः, द्वितीयत्रयं मध्यमपुरुषः, तृतीयत्रयं च उत्तमपुरुषनाम्ना प्रसिद्धाः। उक्तेषु त्रिषु पुरुषेषु मध्ये ऊत्तमपुरुषः अस्मदर्थे, मध्यम-पुरुषः युष्मदर्थे प्रथमपुरुषश्च अस्मद्युष्मद्यतिरिक्ते विषये नियमिताः भवन्ति। प्रत्येकं पुरुषस्य मध्ये एकवचन-द्विवचन-बहुवचन-रूप-भेदो विद्यते। सर्वेषु लिङ्गेषु एव तिङन्तपदं समानम्। अत एव निरुक्तवृत्तौ स्मर्यते-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते॥

आख्यातम् अर्थात् क्रियापदं तिङन्तपदं वा। क्रियावाचकमाख्यातम्। भावप्रधानमाख्यातम्20। एतस्मिन् विषये उक्तं भवति। एतच्चतुष्प्रभेदमाख्यातं भवति- कर्तरि, भावे, कर्मणि, कर्मकर्तरि चेति। पचति इति कर्तरि, भूयते, पच्यते इति भावकर्मणोः, पच्यते स्वयमेव इति कर्मकर्तरि।

कुञ्चीशब्दाः – अकर्मकाः, सकर्मकाः, द्विकर्मकाः।

****

तिङन्तपदस्य या प्रकृतिः सा एव धातुपदेनाभिधीयते। धातुः क्रियायाः वाचकः। क्रियासम्बन्धे शौनकादयः प्राचीनाः ऋषय: अवदन्-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते[1]॥

धातुः द्विविधः सकर्मकः अकर्मकश्च। एतयोर्मध्ये फलविशिष्टव्यापारबोधकः धातुः सकर्मकः। फलेन अविशेषितः केवलव्यापारबोधको धातुरेव अकर्मकः धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वम्, तदबोधकत्वे चाकर्मकत्वम्, इति वैयाकरणसम्प्रदाये उक्तम्। अत एव दृश्यते यत् व्यापारबोधकत्वविषये समानार्थकत्वेऽपि फलावच्छिन्नव्यापारस्य केवलव्यापारस्य चेति उभयस्य भेदवशात् धातवः द्विविधाः भवितुमर्हन्ति। सकर्मकाः अकर्मकाश्च।भट्टोजिदीक्षितस्यापि उक्तिरस्ति-

फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः[2]॥

एतासां सर्वासां कथानां तात्पर्यमित्थं भवति-धातोरर्थ एव क्रिया। कर्तुः यो व्यापारः स एव क्रियापद-वाच्यः। यथा अधिश्रयणं चुल्यां स्थाल्याः संस्थापनम्, उदकासेचनम्, तण्डुलावपनम्, एधोपकर्षणम् इत्यादिभ्य आरभ्य स्थाल्यापकर्षणपर्यन्तं यान् व्यापारान् कर्ता सम्पादयति। स एव व्यापारः पाकक्रिया इत्युच्यते। वैयाकरणानां मतेन क्रिया पुनः द्विविधा। साध्या सिद्धा च। अत एव भर्तृहरिर्वदति-

क्रियायाः साध्यतावस्था सिद्धता च प्रकीर्तिता।
सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ् विधिम्॥

तिपादिनिष्पन्ना क्रिया साध्या इत्युच्यते। घञादि निष्पन्ना च क्रिया सिद्धा इत्यभिधीयते। यथा- पचति पाकश्च। यस्याः क्रियायाः कर्म विद्यते सा सकर्मिका, यस्याः च क्रियायाः कर्म न विद्यते सा अकर्मिका

---

[1] निरुक्तवृत्तिः 1/1/9.

[2] भूषणकारिका।

इत्युच्यते। प्रत्येकं क्रियाया एव एकं फलं व्यापारश्च विद्यते। येन उद्देश्येन क्रियायाः प्रवृत्तिर्भवति तत् फलमित्युच्यते। यच्च तस्य फलस्य जनकः असौ व्यापार इत्युच्यते। यस्मिन् स्थले फलं व्यापारश्च कर्तरि एव निबद्धः तिष्ठति सा क्रिया अकर्मिका इत्युच्यते। यथा-असौ हसति। अस्मिन् स्थले हसनक्रिया अकर्मिका। यतः तस्याः क्रियायाः फलं व्यापारश्च कर्तरि एव विद्यमानम्। यस्मिन् स्थले कर्तृभिन्ने अन्यस्मिन् कस्मिंश्चित् पदार्थे फलं तिष्ठति, तत्र क्रियायाः सकर्मकत्वं भवेत्। यथा- देवदत्तः ओदनं पचति। अत्र अधिश्रयणात् आरभ्य स्थाल्यपकर्षणं यावत् पाकक्रियायाः व्यापारो विस्तृतो विद्यते। पदार्थस्य विक्लित्तिरूपिणी शिथिलता तस्य फलम्। इयं शिथिलता विक्लित्तिर्वा कर्तृभिन्ने अन्यस्मिन् पदार्थे ओदनरूपे विद्यते इति पाकक्रिया सकर्मिका।

क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम् इत्यादि हरिकारिकायाः उपपन्नं भवति यद् वक्ता यदा फलविवक्षां करोति तदा क्रिया सकर्मिका भवति। यदा च स तत् न करोति तदा अकर्मिका भवति। अत एव एका एव क्रिया वक्तुः इच्छानुसारं सकर्मिका, अकर्मिका च भवितुमर्हति। यथा- रामो वनं गच्छति, रामः वने गच्छति। प्रथमे उदाहरणे क्रिया सकर्मिका। यतः तत् संक्रान्तस्य फलस्य विवक्षा विद्यते। द्वितीये उदाहरणे फलस्य विवक्षाभावात् गतिक्रिया अकर्मिका। पाणिनिव्याकरणे **कर्तुरीप्सिततमं कर्म**[1] इत्यस्मिन् सूत्रे तमप् ग्रहणेन कर्तुः धातुवाच्याफलविवक्षा एव उद्दिष्टा भवति।

ये सर्वे सकर्मकाः धातवः कर्मद्वयं गृह्णन्ति ते द्विकर्मका उच्यन्ते। अत एव द्विकर्मक-धातोर्गणनया त्रिविधाः धातवो भवन्ति। अत एव कारकोल्लासे उच्यते-

धातव स्त्रिविधा धीरैरुक्ताः केचिदकर्म्मकाः।
सकर्म्मकाश्च कतिचित् कतिचिच्च द्विकर्म्मकाः[2]॥

अत एव धातवः त्रिविधाः अकर्मकाः, सकर्मकाः, द्विकर्मकाश्च। अस्माकं तु मतेन धातवस्तु चतुर्विधाः भवन्ति। अकर्मकाः, सकर्मकाः, द्विकर्मकाः, त्रिकर्मकाश्च। परन्तु योगलभ्यार्थको धातुः नानाविधो भवितुमर्हति। यथा- णिजन्तः, सनन्तः, यङन्तः, काम्याद्यन्तश्च। णिच्, सन्, यङ् एते त्रयः प्रत्ययाः धातोरुत्तरं भवति। काम्य-क्यच्-क्यङ् इत्येवं काम्यादिः त्रयः प्रत्ययाः नाम्नः परं युक्ताः भवन्ति। किन्तु उभयविधास्ते प्रत्यया एव धात्वंशनाम्ना धात्ववयवनाम्ना वा प्रसिद्धाः। यतः धातोः परं णिच् प्रभृति प्रत्यययोगेन सम्पूर्णं नूतनो धातुर्भवति। नाम्नः परं पुनः काम्यादि योगेन नामधातुनाम्ना एकजातीयः नूतनो धातुः सम्पद्यते। पाचि पिपक्ष् प्रभृतिधातवः योगविभागलभ्यर्थकाः। स्कन्भ्, यु- प्रभृति धातवः सूत्रात् प्राप्ताः अत एव ते सौत्रधातवनाम्ना ख्याताः। भू प्रभृतयो धातवः गणोक्तनाम्ना प्रसिद्धाः। भ्वादि प्रभृतयो दशगणाः बोपदेवो वदति

[1] अ.ध्या.सू.सं. 1/4/49.

[2] कारकोल्लासः 3.

हिन्दोल-आन्दोलप्रभृतयः केचनान्येऽपि शिष्टसम्मताः लौकिका धातवो दृश्यन्ते। धातोरुत्तरं वर्तमानादिषु कालेषु क्रियाविशेषाभिधायकानां दशलकाराणां प्रयोगो भवति, यथा-लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्। व्यापारस्य बाहुल्यहेतोः क्रियायाः स्वरूपविषये प्राचीनानां शाब्दिकानां मुनीनाम् आसीद् नानाविधा उपपत्तय इति दृष्टिगोचरीभवति। तन्मध्ये एकः सम्प्रदायो वदति - **अनित्या क्रिया, सा यथा व्यक्त्या आकृतिः व्यज्यते, एवमधिश्रयणोदकासेचनतण्डुला-वपनादिभिर्विभज्यते। तदा यत्तत्व्यक्तित्वाच्च तद्रूपैव प्रतीयते। व्यक्ता सती फलमोदनादि साधयति।** द्वितीय सम्प्रदायो वदति- **उत्पाद्यते न व्यज्यते। फलोत्पत्त्या चासावनुमीयत उत्पन्नेति, न स्वयं प्रत्यक्षग्राह्या।** तृतीयः सम्प्रदायो वदति- **तण्डुलविघटनलक्षण- क्रियावयवादनन्तरमेवौदनादेः फलनिर्वृत्तिदर्शनात् फलस्य निष्पादिका सा क्रिया।** चतुर्थः सम्प्रदायो वदति- **अवयवा ये तण्डुलानामीषन्मृदुभावादयो ये चाधिश्रयणादयस्ते सर्वे तदर्थाः, तादर्थ्याच्च यथा- इन्द्रः स्थूणा इति स्थूणायामिन्द्ररूपमध्यस्यते, एवं तेषु क्रियारूपम्।** पञ्चमः सम्प्रदायो वदति- **अधिश्रयणादीनाम् अवयवक्रियाणां बुद्ध्या परिकल्पितः समुदायः पचिक्रिया।**

लट्. लिट् प्रभृतिशब्दाः पारिभाषिकरूपेण बोद्धव्याः। पाणिनेः पूर्वमपि एतेषां प्रचलनमासीत्। नामैकदेशग्रहणे नाममात्रग्रहणं इति न्यायानुसारं सत्यभामा यथा भामा इत्येवम् उच्यते तथैव कालशब्दस्य लकारमादाय एते शब्दाः रचिताः अत एव एतेषां आदिवर्णः कालशब्दस्य अभिधायकः। **लिङर्थे लेट्**[1] पाणिनिसूत्रानुसारं वेदे लेट् लकारस्य प्रयोगो भवति। भाषायां तु अयं परित्यक्तः। अत एव नवलकाराणां पाणिनीयः क्रमः कातन्त्रमुग्धबोधहरिनामामृते च तेषां तुल्यार्थकः शब्दो स्वस्वव्याकरणे प्रदत्तो भवति- लौकिकभाषायां साधारणतया वर्तमानार्थे लट् लकारः अतीतार्थे लिट्, लङ्, लुङ् लकाराः अनुज्ञायां लोट्, आशीर्वादे आशीर्लिङ्, भविष्यदर्थे लुट्, लृट् लकारौ, विध्यर्थ विधिलिङ्, क्रियातिपत्तौ लृङ् लकारो व्यवहृतो भवति।

शास्त्रं वदति- कालो हि जगदाधारः कालाधारो न विद्यते। अत एव उक्तं भवति- ननु कालो हि सर्वगतो नित्य एको निरवयवो निष्क्रियः इत्यादिभिराकारैः आकाशमिव प्रतीयते, कथं तर्हि वर्तमानादिभिः व्यपदिश्यते इति। एतस्य उत्तरे कातन्त्रस्य टीकाकारो लिखितवान्- सत्यं, तस्य ये वर्तमानादयो व्यपदेशास्ते क्रियाद्वारका एव क्रियासु वर्तमानादिकाला उपचर्यन्ते, तस्मात् वर्तमान-भूत-भविष्यत् क्रियासम्बन्धात् तद्वति पदार्थे वर्तमानादयः कालशब्दाः सिद्धाः[2]। भर्तृहरिर्वदति-

आदित्यग्रहणक्षत्रपरिस्पन्दमथापरे।

---

[1] अ.ध्या.सू.सं. 3/4/7.

[2] आख्यात 10 सूत्रटीका।

भिन्नमावृत्तिभेदेन कालं कालविदो विदुः॥

क्रियान्तरपरिच्छेदप्रवृत्तो या क्रियां प्रति।

निर्ज्ञातपरिमाना सा काल इत्यभिधीयते[1]॥

पाणिनीयवार्तिकपाठे स्मृतं भवति- सन्ति च कालविभागाः। एतस्य व्याख्यायां पतञ्जलिर्वदति- सन्ति खल्वपि कालविभागाः। तिष्ठन्ति पर्व्वताः। आरब्धकालस्य कार्यस्य परिसमाप्तिर्यावत् न भवति तावत् पर्यन्तं काल एव वर्तमानः।आरब्धोऽपरिसमाप्तश्च वर्त्तमानः। तस्मिन् वर्तमाने लट्लकारो भवति[2]। वर्त्तमानः चतुष्प्रकारः। प्रवृत्तोपरतः, वृत्ताविरतः, नित्यप्रवृत्तः, सामीप्यश्च। उक्तञ्च-

प्रवृत्तोपरतश्चैव वृत्ताविरत एव च।

नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः॥

प्रवृत्तोपरतो यथा - मांसं न खादति। वृत्ताविरतो यथा - बालकाः इह क्रीडन्ति। नित्यप्रवृत्तो यथा - पर्वतास्तिष्ठन्ति। सामीप्यं द्विविधम् - अतीतसामीप्यं भविष्यत्सामीप्यञ्च। अतीतसामीप्यं यथा - कदा आगतोऽसि? एष आगच्छामि। भविष्यत् सामीप्यं यथा- कदा गमिष्यसि एष गच्छामि।

लिट् प्रत्ययस्य अर्थः वक्तृपरोक्षत्वं अतीतत्वञ्च परोक्षं द्विप्रकारम्। कार्य्यादिव्यासङ्गजनितम् अदर्शनम् अर्थात् प्रत्यक्षस्य अगोचरं वस्तु स्वभावप्रवृत्तं प्रत्यक्षस्य अयोग्यम्। केचिद् वदन्ति परोक्षशब्दद्वारा केवलं दर्शनस्याभावः अत्यन्तम् अपह्नवश्च सूचितो भवति। पुनः केषाञ्चिद् मते परोक्षं त्रिप्रकारम्। कृतकार्यस्य अस्मरणम् अत्यन्तापह्नवः प्रत्यक्षाभावश्च कृतकार्य्यस्य अस्मरणं यथा- सुप्तोऽहं किं विललाप, मत्तोऽहं किं विचचार। अत्यन्तापह्नवः यथा- कपित्थ्यां दृष्टोऽसि मया। एतस्य उत्तरे कोऽपि वदति- नाहं कपित्थीं जगाम। प्रत्यक्षाभावो यथा- जघान कंसं किल वासुदेवः।

दृष्टिविशेषेण अतीतकालः द्विविधः अद्यतनः अनद्यतनश्च। अद्यतनसम्बन्धे मतभेदो विद्यते। कस्यचिद् मते पूर्वरात्रेः अन्तिमं दण्डचतुष्टयं परात्रेः प्रथमसार्धप्रहरः मध्यवर्तिसम्पूर्णं दिनम् एतस्य कालस्य नाम अद्यतन इति। केऽपि वदन्ति गतरात्रेः शेषार्धम् आगामिरात्रे प्रथमार्धसहितं मध्यवर्ति दिनं एव अद्यतनम्। भर्तृहरि-दुर्गसिंहसंक्षिप्तकारादीनां मतेन पूर्वरात्रेः अन्तिमः प्रहरः आगामिरात्रेः प्रथमः प्रहरः मध्यवर्तिनो दिनस्य प्रहरचतुष्टयम् इत्येवं षट् प्रहरात्मककाल एव अद्यतनः।

शेषो गतायाः प्रहरो निशाया आगामिनी या प्रहरश्च तस्याः।

दिनस्य चत्वार इमे च यामाः कालं बुधा ह्यद्यतनं वदन्ति॥

---

[1] वाक्यपदीय-प्रकीर्णकाण्डम् 3/9/76.

[2] वर्तमाने लट् (पा. सू. 3/2/123).

अद्यतनसम्बन्धे यदुक्तं तद्यतीतः अतीतकाल एव अनद्यतनः। **लट् स्मे**[1] इति सूत्रबलेन अनद्यतनातीतार्थे स्म योगे लट् भवति।

लुट् लकारस्यार्थः भविष्यदनद्यतनकालः **अनद्यतने लुट्**[2], लृट् लकारस्यार्थः साधारणो भविष्यत्कालः[3]। यथा- श्वः कर्ता अद्य श्वो वा गमिष्यति च। सारमञ्जरीकारो वदति- वर्तमाने यस्य प्रागभावो विद्यते अर्थात् यद् जन्यं वस्तु अधुनापि न जातं किन्तु पश्चात् जनिष्यते, तस्य वस्तुनः काल एव भविष्यत्कालः। अभिज्ञावचनेऽपि लृट् भवति। यथा- स्मरसि कृष्ण। गोकुले वत्स्यामः। अष्टाध्याय्यां लेट् नाम्ना एको लकारो विद्यते। असौ केवलं वेदे दृष्टो भवति, प्रियः सूर्ये प्रियो अग्ना भवति। **लिङर्थे लेट्** इति सूत्रस्य उपरि सिद्धान्तकौमुदीकारः अवदत् वैदिके प्रयोगे विध्यर्थे कार्य्यकारणभावादीनां अर्थे च धातोरुत्तरं लेट् भवति।

लोट् लकारस्यार्थः आशीर्वादः प्रेरणा च[4]। यथा- जीवतु भवान्, कुरु कटम् इति च। प्राचीनाः वदन्ति- या तिङ् विभक्तिः विधेयरूपेण वक्तुः अनुमतिं प्रतिपादयति असौ लोट् लकार उच्यते।

लङ्[5] लकारस्य लुङ्[6] लकारस्य चार्थः अतीतत्वम्। अनद्यतने लङ् अनद्यतने वा साधारणे अतीतकाले लुङ् भवति, यथा- रामो रावणम् अहन् अद्य ह्यो वा अभुक्ष्महि। मा स्म योगेन लङ् लुङ् च भवतः। कातन्त्रे सूचितं भवति मा स्म योगे ह्यस्तनी च। (आख्यात. प्र. 23) अधुना चिन्तनीयं मा स्म शब्दः अकृतद्वन्द्वः कृतद्वन्द्वः वा अर्थात् किमसौ एकः शब्दः अथवा मा स्म इति च पृथक् अव्ययद्वयं एकत्रीकृत्य मास्म शब्दः जातः। पाणिनिः वदति **माङि लुङ्**, [7] **स्मोत्तरे लङ् च**[8] एतस्मात् मा तथा स्म एतत् द्विकं भिन्नं भिन्नं शब्दम् अवगम्य कामक्रोधौ स्म मा पुषा इत्यादि प्रयोगोऽपि आरब्धः। एतस्मिन् विषये वररुचिस्तु वदति न हि मा स्म शब्दवत् स्म मा शब्दोऽप्यस्ति। वररूचेः इत्थं मतवादः सर्ववर्मणः अभिप्रेतः पाणिनीयानामपि न अनभिप्रेतः। किन्तु वररुचेरनन्तरं बौद्धकविः कुमारदासः तदीये जानकीहरणकाव्ये लिखितवान्-

जुगुप्सत स्मैनमदुष्टभावं मैवं भगवानक्षतसाधुवृत्तम्।

---

[1] अ. ध्या. सू. सं. 3/2/118.

[2] तदेव 3/3/15.

[3] लृट् शेषे च (पा.सू. 3/3/13).

[4] लोट् च (पा.सू. 3/3/162), आशिषि लिङ्लोटौ (पा.सू. 3/3/173).

[5] अनद्यतने लङ् (पा.सू. 3/2/111).

[6] अ.ध्या.सू.सं. 3/2/110.

[7] तदेव 3/3/175.

[8] तदेव 3/3/176.

इतीव वाचो निगृहीतकण्ठैः प्राणैररुध्यन्त महर्षिसूनोः[1]॥

एतदवलोक्य वृत्तिकारो दुर्गसिंहो लिखति स्म। व्यस्तेऽपि इच्छन्ति केचित् स्म करोन्मा। संक्षिप्तसारे दौर्गवृत्तिः अनुस्रियते इत्यत्र गोमीचन्द्रः अवदत् व्यस्तयोर्दुरस्थयोः अपि अनयोः योगे विधिरयं इति सूचनार्थं जानकीहरणप्रयोगदर्शनम्। अत एव सर्ववर्मणः परम् अनेके नवीनाः वैयाकरणाः मा स्म शब्दे मा तथा स्म एतद् द्वयं पृथक् अव्ययरूपेण कल्पयन्ति। यद्वा भवतु मास्म नाम्ना एकः अव्ययशब्दोऽपि विद्यते। माङ् योगे कालत्रयेऽपि नित्यमेव लुङ् भवेत्।

विधिलिङ् लकारस्यार्थः विधि-निमन्त्रणामन्त्रण-याञ्चा प्रभृतयः[2]। यथा- कटं कुर्य्यात्। इह भुञ्जीत, यथेच्छं क्रियताम्, लभेय भिक्षाम् इत्यादि, भाट्टदीपिकायां खण्डदेवः अवदत्- लिङाद्यर्थौ विधिवाक्ये प्रवर्तनाप्रेषणा विध्यपरपर्यायः निषेधवाक्ये च निर्वर्तना निवारणा निषेधप्रतिषेधापरपर्यायः, विषयेऽस्मिन् टीकाकारो वदति- लिङाद्यर्थः प्रवर्तना हि उत्कृष्टस्य निकृष्टं प्रति सा आज्ञा प्रेषणेति चोच्यते। निकृष्टस्य उत्कृष्टं प्रति सा अध्येषणा। समस्यासमं प्रत्युत्कर्षापकर्षौ दासीन्येन सा अनुज्ञा अनुमतिरिति च व्यवह्रियते विधिसम्बन्धे विद्यन्ते अनेके मतभेदाः। केचित् वदन्ति- प्रवृत्तेर्निवृत्तेर्वा प्रयोजकम् आप्तवचनमेव विधिः केचिद् वदन्ति प्रवर्त्तकरूपः आप्तवचनव्यापार एव विधिः। कस्यापि मतेन कर्तव्यतायाः उपदेश एव विधिः कातन्त्रवृत्तिकारो दुर्गसिंहो वदति- इष्टसाधनता बोधकं प्रत्ययघटितं वाक्यमेव विधिः। कुमारिलस्य मतेन यद् वाक्यम् अत्यन्तम् अप्राप्तस्य विषयस्य प्रापकं तदेव विधिः। बोपदेवोऽपि प्रायेण समरूपामेव कथामवदत्। भगवान् गौतम उक्तवान्- विधायकं वाक्यमेव विधिः पतञ्जलेर्मुनेर्मतेन नियोगः अथवा अनुज्ञा एव विधिः। उपाध्यायाः वदन्ति- विधिः कदापि वा वर्णोत्पत्तिस्वरूपो भवति। कदापि वा अभावस्वरूपो भवति। विधिलिङ् लकारस्य अन्येऽपि अर्थाः सन्ति यथा- कृतिसाध्यता, इष्टसाधनता, बलवदनिष्टाननुबन्धित्वं वा, आशीर्लिङ् अर्थात् लिङ् अयम् आशंसने भविष्यत् काले च प्रयुज्यते। यथा- शतायुर्भूयाः।

लृङ् लकारस्यार्थः अतीतत्वं क्रियातिक्रमश्च[3]। केनापि कारणेन क्रियायाः अनिष्पत्तिरेव क्रियातिक्रमः। अत एव अतीते भविष्यत् कालावच्छेदे वा क्रियायाः अनिष्पत्तिबोधकः यस्तिङ् स एव लृङ् लकारनाम्ना बोद्धव्यः। एतेषामुदाहरणं यथा- अमंक्षद् वसुधा तोये यदि त्वं नाधरिष्यथाः (भूते क्रियातिपत्तिः) यदि वर्षमजीविष्यम् तदा पुत्रपौत्रादिनद्रक्ष्यम्। (भविष्यत्काले क्रियातिपत्तिः)।

---

[1] 1/84.

[2] विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (पा. सू. 3/3/161).

[3] लिङ्गिमित्ते लृङ् क्रियातिपत्तौ (पा.सू. 3/3/139).

बोपदेवस्य मतेन उक्तानां दश लकाराणां मध्ये प्रत्येकस्मिन् एव अष्टादश(18) विभक्तयो भवन्ति। पाणिनिस्तु तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस् इत्यादि अष्टादशविभक्ति-निर्देश-पूर्वकं तेषां स्थले क्रमशः अशीत्यधिकशतं (180) विभक्तीनाम् आदेशविधानं कृतवान्। यद्वा भवतु, दशलकाराणां प्रत्येकं प्रथमं नवविभक्तयः परस्मैपदीयाः अवशिष्टाश्च नव आत्मनेपदीयाः। उक्तेषु प्रत्येकं नव-विभक्तिषु प्रथमत्रयं प्रथमपुरुषः, द्वितीयत्रयं मध्यमपुरुषः, तृतीयत्रयं च उत्तमपुरुषनाम्ना प्रसिद्धाः। उक्तेषु त्रिषु पुरुषेषु ऊत्तमपुरुषः अस्मदर्थे, मध्यमपुरुषः युष्मदर्थे प्रथमपुरुषश्च अस्मद्युष्मद् व्यतिरिक्ते विषये नियमिताः भवन्ति। प्रत्येकं पुरुषस्य एकवचन-द्विवचन-बहुवचन-रूप-भेदो विद्यते। सर्वेषु लिङ्गेषु एव तिङन्तपदं समानम्। अत एव निरुक्तवृत्तौ स्मर्यते-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते॥

आख्यातम् अर्थात् क्रियापदं तिङन्तपदं वा। **क्रियावाचकमाख्यातम्। भावप्रधानमाख्यातम्**[1]। एतस्मिन् विषये उक्तं भवति। एतच्चतुष्प्रभेदमाख्यातं भवति- कर्तरि, भावे, कर्मणि, कर्मकर्तरि चेति। पचति इत कर्तरि, भूयते, पच्यते इति भावकर्मणोः, पच्यते स्वयमेव इति कर्मकर्तरि।

निष्कर्ष:

सामान्यत: धातु: इत्यर्थे शास्त्रेषु नैके शब्दा:प्रयुक्ता दृश्यन्ते। यथा- आख्यातम्, क्रिया, भाव:, व्यापार:, भावना प्रभृतय:। एतेषु शब्देषु सूक्ष्मार्थपार्थक्यं स्यादपि वस्तुत:धात्वर्थे एते शब्दा: प्रयुक्ता भवन्ति। आवैदिककालात् आख्यातस्य प्रयोग: क्रियावाचके दृश्यते क्रियावाचकमाख्यातम् इति। सोम: आख्यातस्य देवता, ऋषिस्तु भारद्वाज:। वैयाकरणा: धातूनां फलव्यापारयो: शक्ति: तिङश्चाश्रये शक्ति: स्वीकृता।

सन्दर्भग्रन्थसूचिः

(1) अष्टाध्यायी of पाणिनिः (2003). सम्पादकः विद्यारत्नः, श्रीदेवेन्द्रकुमारः, प्रभाख्यटीकासहिता, (1st ed) कलिकाताः वलरामप्रकाशनी।

(2) वाक्यपदीयम् of श्रीभर्तृहरिः (2003). सम्पादकः व्याख्याकारश्च, तिवारी, प्रो. हरिनारायणः, हरिवृषभ-कृतवृत्तिसंवलितम्, नारायण-हिन्दीव्याख्यया संवलितः चेति टीकाद्वयोपेतम्, वाराणसीः चौखम्बा संस्कृत सीरीज अफिस्।

[1] इति नैरुक्ताः

(3) आप्टे, वामन-शिवरामः (2007). संस्कृत-हिन्दी-कोशः, (1st ed). दिल्ली : मोतीलाल-बनारसीदास-पाब्लिशार्स्-प्राइभेट्-लिमिटेड्।

(4) गैरला, वाचस्पति: (1960). संस्कृत साहित्य का इतिहास, (1st ed) काशी : चौखम्बा विद्याभवन।

(5) त्रिपाठी, ड. जयशङ्करलालः (1985). काशिका, (1st ed). वाराणसीः तारा प्रिन्टिंस् वर्क्स्।

(6) दीक्षितः, श्रीमद्भट्टोजी (1961). वैयाकरणसिद्धान्तकौमुदी (सम्पूर्णम्), (1st ed) सम्पादकौ, शर्मा, महामहोपाध्यायः गिरिधरः, शर्मा, महामहोपाध्यायः परमेश्वरानन्दः, श्रीवासुदेवदीक्षितप्रणीतया बालरनोरमाख्यया व्याख्यया श्रीज्ञानेन्द्रसरस्वती-विरचितया तत्त्वबोधिन्या-ख्यया च सनाथिता, वाराणसीः मोतीलाल-बनारसीदास।

(7) दीक्षिता, पुष्पा (2010). प्रक्रियानुसारी पाणिनीयधातुपाठः, (1st ed) नवदेहली : संस्कृत भारती।

(8) देवशर्मा, श्रीकालीजीवनः (1995). शब्दशास्त्रेर् इतिहास, (1st ed) कलिकाताः रामकृष्णमिशन इन्स्टिटिउट् अव् काल्चार्।

(9) पाण्डा, ड. श्रीविश्वरञ्जनव्याकरणाचार्यः (2018). तिङन्ते भू-एधधातुविमर्शः, (1st ed) कलिकातासंस्कृतपुस्तकविपणि।

(10) हालदारः, गुरुपदः। (2006) व्याकरण-दर्शनेर्-इतिहास, (पुनर्मुद्रणम्) कलिकाताः संस्कृत बुक् डिपो।

Author's Detail

Name : Soma Pramanick
Designation : Research Scholar, State Aided College Teacher (SACT-1) in Sanskrit, Bhairab Ganguly College, Belgharia, Kolkata.
Address : Raiganj University, Raiganj-733134 (W.B)
Madhabi Alay, 596/19A/1,
Parui Das Para Road. Nabapally,
Kolkata- 700061 (W.B.)
Email : somapra18@gmail.com

****

निरुक्त-पाणिनिव्याकरणयोः पारिभाषिकशब्दानां परिशीलनम्

Subir Dolui

शोधसारः

संस्कृतवाङ्मये विद्यमानेषु चतुर्दशविद्यास्थानेषु निरुक्तमन्यतमत्वेन परिगण्यते। सर्वैः शास्त्रैः सह सर्वेषां शास्त्राणामन्तरङ्गत्वं संस्कृतज्ञानपरम्परायाः महत्वपूर्णमेकं वैशिष्ट्यम्। अतो वेदपुरुषस्य श्रोत्रत्वेन परिगण्यमानेन, *निरुक्तेन* सह व्याकरणस्यापि कश्चिद् सम्बन्धो वर्तते। स्वीयेन *निरुक्त*कारेणापि 'तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं' वचनेनेदं स्पष्टीकृतम्। संस्कृतवाङ्मये पारिभाषिकशब्दानां सुष्ठुव्यवहारः प्राचीनकालादाराभ्य अद्यप्रभृतिः निरवच्छिन्नेन प्रचलति। अतः बहुचर्चितविषयोऽयं नास्ति सन्देहावकाशः। विषयेऽस्मिन् विशेषतः *निरुक्तोक्तैः* पारिभाषिकशब्दैः सह *अष्टाध्यायी*ति व्याकरणान्तर्गतानां पारिभाषिकशब्दानां तुलनात्मकसमीक्षैव नूतनतात्र। उभयोः सिद्धान्ते मतपार्थ्यक्यं, स्यादेव। तयोः आचार्ययोः मतपार्थक्ययोः किमस्ति कारणं, युक्तिः, तथा च व्याकरणादिषु शास्त्रेषु *निरुक्तस्य* किमवदानं स्याद्, अस्मिन्विषये मामकी युक्तिः पत्रेऽस्मिन् स्थानं लभते।

कूञ्जीशब्दाः – पारिभाषिकः, पदजातम्, नाम, आख्यातम्, निपातः, उपबन्धः, उपसर्गः, निवृत्तिस्थानम्, भावः, अभ्यस्तः, अभ्यासः।

****

उपोद्घातः– सर्वत्रार्थक-परि-पूर्वकाद् दीप्त्यर्थक-भाष्-धातोरचि टापि निष्पन्नोऽयं परिभाषाशब्दः। परिभाषातः आगतः पारिभाषिकः। परिष्कृतं भाषणमिति *शब्दकल्पद्रुमः*[1]। संस्कृतवाङ्मये पारिभाषिकशब्दानां बहुत्रैव व्यवहारो दृश्यते। तत्र *शिक्षा-प्रातिशाख्य-व्याकरण-दर्शने*षु एतेषां शब्दसम्भारो दृश्यते। अस्य मूलं तु *शिक्षा-प्रातिशाख्य-निरुक्तादिषु* ग्रन्थेषूपलभ्यते नास्तीत्यत्र क्वापि विप्रतिपत्तिः। *महाभाष्य*कृता कृत्रिमाकृत्रिमभेदेन पारिभाषिकशब्दाः द्विधा विभक्ताः[2]। तत्र खलु वाग्व्यवहारप्रसिद्धा पशुः, अपत्यं, देवदत्त इत्यादयः शब्दाः अकृत्रिमा, द्वितीये तावत् कृत्रिमाः टि, घु, भ प्रभृतयः अन्तर्भवन्ति। 'संक्षेपनिर्वाहार्थं परिभाषेति सांकेतिक-विशेषः। शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदमिति शक्तिवादे गदाधरः[3]। इह मुख्यतो *निरुक्ते* उपवर्णितैः पारिभाषिकशब्दैः सह व्याकरणान्तर्गतानां पारिभाषिकशब्दानां समीक्षणे मदीया मतिः।

---

[1]शब्दकल्पद्रुमः, ३.१२६।

[2] अष्टाध्यायी, १.४.२३, महाभाष्यम्।

[3]शब्दकल्पद्रुमः, ३.१२६।

पदजातम् — प्राचीनकालादाराभ्य अद्यप्रभृतिः भाषाविशारदो वाक्येषु प्रयुक्त- पदविषये, पदविभागविषये च महच्चिन्तनं प्रकटितवन्तः। *ऋक्प्रातिशाख्ये*[1], अथर्वप्रातिशाख्ये[2], *वाजसनेयप्रातिशाख्ये*[3], *ऋग्वेदभाष्य-भूमिकायां*[4], *निरुक्ते*[5] अस्मिन्विषये चर्चा प्रचलिता। पदविभागस्य प्राचीननामासीत् 'पदजातम्'। प्राचीन-परम्परायां प्राचार्योः प्रायशः पदविभागार्थे पदजातय उल्लिखिता। विविधेषु *प्रातिशाख्य-ऋग्वेदभाष्यभूमिका-निरुक्ता*दिषु ग्रन्थेषु अस्य निदर्शनमस्तीति[6]। प्रायशः सर्वेषु प्राचीनेषु ग्रन्थेषु वाक्ये व्यवहृतः पदस्य चातुर्विध्यमुपवर्णितं वर्तते। वाक्यस्थपदविभागवर्णनावसरे *निरुक्त*कारेणापि नामाख्यातोपसर्गनिपाताः इति क्रमेण पदस्य चातुर्विधत्वं प्रकल्पितम्[7]। *निरुक्ते* मुख्यतः पदजातयः पदसमूहो वेति अर्थे 'पदजातानि' इति शब्दो व्यवह्रियते[8]। पदजाति इत्युक्ते स्त्रीनपुंसकप्रविभागेन सुबन्तपदप्रकारा एवं कर्तृ-कर्म- भाववचनक्रमेण आख्यात-जातिः आङादिप्रकारेणोपसर्गजातिः, तथा चादिविभागेन निपातजातिः उपदिश्यते *निरुक्ता*दयग्रन्थे। अस्य आदिमप्रयोगः ब्राह्मण-प्रातिशाख्यादि ग्रन्थे भवितुं शक्यते तत्रतः अन्येषु *निरुक्ता*दिषु ग्रन्थेष्वनुवर्तते। *अष्टाध्यायी*व्याकरणे अस्य नामान्तरमस्ति पदम्। *अष्टाध्यायी*व्याकरणे सुबन्ततिङन्तयोः सामान्येन पदसंज्ञा विहिता[9]। यद्यपि *निरुक्ते* तिङन्तपदकृते भिन्ना शास्त्रनिरूपितविधिरवलम्ब्यते।

नाम — *निरुक्ते* नामविषये उच्यते — 'सत्त्वप्रधानानि नामानि'[10]। अत्र 'सत्त्वशब्दः' द्रव्यपदार्थको, द्रव्यप्रधानमित्यर्थः। इह कस्यचिदपि सिद्धवस्तु सामान्येन नामशब्देन व्यपदिश्यते। संस्कृतवाङ्मये नामन् इति शब्दस्य बहुधा प्रयोगो दृश्यते। *ऋक्प्रातिशाख्ये*ऽपि सत्त्वर्थे नामशब्दः प्रयुज्यते। 'तन्नाम येनाभिदधाति सत्त्वम्'[11]। *बृहद्देवता*याम् अयमेव किञ्चिद् भिन्नोपायेन वर्णितम् —

शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते।

---

[1] नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शब्दाः। १२/५/६९९।

[2] चतुर्णां पदजातानां नामाख्यातोपसर्गनिपतानां संध्यपद्यौ गुणौ प्रतिज्ञम्।१/१।

[3] तच्चतुर्धा नामाख्यातोपसर्गनिपाताः।८/५२।

[4] तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च।

[5] निरुक्तम्, १/१।

[6] तदेव।

[7] तदेव।

[8] पदजातानि पदजातयः पदसमूहा इत्यर्थः। निरुक्तम्, १/१ (स्क:स्वा)।

[9] अष्टाध्यायी, १/४/१४। सुप्तिङन्तं पदम्।

[10] निरुक्तम्, १/१।

[11] ऋक्प्रातिशाख्यम्, xii.१९।

तदक्षरविधौ युक्तं नामेत्याहु र्मनीषिणः[1]॥

व्याकरणे म्नायते अभ्यस्यते नम्यतेऽभिधीयतेऽर्थोऽनेन प्रकारेण वाचकशब्दे संज्ञाशब्दे च नामशब्दप्रयोगः सुलभः। नामशब्दस्य अव्ययरूपः प्रयोगः संस्कृतवाङ्मये इतस्ततो विहितः। प्रायशः कस्यचिदपि सिद्धवस्तुनः नामकरणमनेन नामशब्देन व्यज्यते। तद्यथा हिमालयो नाम नागाधिराजः। तत्र अव्ययरूपनामशब्दस्य अर्थवैचित्र्यमपि लक्षणीयमस्ति। कोपे-उपगमे-प्रकाश्ये-सम्भावनायां- कुतसने च नामशब्दस्य बहूशः प्रयोगो दृश्यते। तत्र कोपे 'ममापि नाम दशाननस्य परैरभिभवः।' *निरुक्तो*क्त नामशब्देन सह व्याकरणोक्तस्य प्रातिपदिकस्य सूक्ष्मभेदो वर्तते। यतोहि *निरुक्ते* द्रव्यार्थे सर्वेषामेव सिद्धवस्तुनां सामान्येन नामशब्देन व्यपदिश्यते। पाचकः, परिव्राजक इत्यादयः। परन्तु व्याकरणे धातुं, प्रत्ययं, प्रत्ययान्तं च वर्जयित्वा अर्थवन्ताः शब्दाः प्रातिपदिकसंज्ञकाः भवन्ति। एतानतिरीच्य कृदन्ताः, तद्धितान्ताः, समासाश्च प्राधान्येन प्रातिपदिकसंज्ञकाः भवन्ति।[2] विशेषोपायेन एतेषां प्रातिपदिकानां सुपादियोगे पदसंज्ञा भवन्ति। शब्दप्रक्रियासाधनं व्याकरणस्य मुख्यकार्यम्, अतो व्याकरणे अस्य उपादेयत्वमनस्वीकार्यम्। परन्तु अर्थप्रधान*निरुक्ते* नाम पदचतुष्टयस्यान्यतमपदत्वेन परिगण्यते अत्र सर्वेषामेव सिद्धवस्तूनां संज्ञाकरणं सामान्येन नामशब्देन व्यपदिश्यते।

आख्यातम् — अभिव्याप्त्यर्थक-आङ्-पूर्वकाद्-प्रकथनात् ख्या-धातोः क्त-प्रत्ययेण नपुंसकलिङ्गे अमादेशे आख्यातपदं व्युत्पन्नम्। सामान्येनाख्यातपदेन सम्यक् व्याख्यानं परिशीलनमित्याख्यायते, परन्तु प्राचीनपरम्परायाम् आख्यातस्य अर्थवैविध्यं परिलक्ष्यते। *ऋक्प्रातिशाख्ये, वाजसनेयीप्रातिशाख्ये,* धात्वर्थे-क्रियार्थे वेति आख्यातपदं प्रयुक्तमासीद्।[3] *अथर्वप्रातिशाख्ये* अस्य क्रियारूपत्वमुपलक्षितम्।[4] *यास्कीयनिरुक्ते* आख्यातपदेन सामान्येन क्रियोपलक्ष्यते। "भावप्रधानमाख्यातम्।"[5] भावः क्रिया, तत्प्रधानम् आख्यातमिति। इह आख्यातपदेन उपक्रमादवसानमवधिः क्रियासमुदायबोधः भूयते[6]। अत्र वक्तुमुचितं भवति यत्, *निरुक्ते* आख्यातपदं क्रियार्थे-धात्वर्थे उभे संप्रयुज्यते। विशेषतः अनेकैः *निरुक्त*प्राचार्यैः धात्वर्थमात्रे आख्यात-

---

[1] वृहद्देवता, i.४३।

[2] अष्टाध्यायी, १.२.४५, १.२.४६; अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च।

[3] ऋक्प्रातिशाख्यम्, xii.१९, वाजसनेयीप्रातिसाख्यम्, v.१।

[4] अथर्व-प्रातिशाख्यम्, i.१.१२.१८, १.३.३.६।

[5] निरुक्तम्, १.१।

[6] तत्रैव

शब्दप्रयोगाः विहिताः। "तत्र नामान्याख्यातजानिति शाकटायनो नैरुक्तसमयश्च"[1], अस्मिन् नैरुक्तश्लोके यास्केन शाकटायनमुद्धृत्य आख्यातस्य धात्वर्थत्वमवबोधितम्। एवमेव 'त्रिभ्य आख्यातेभ्य जायत इति शाकपुनिः', इत्यत्र अग्निशब्दो व्याखानं कुर्वता श्रीमता यास्केन *निरुक्त*प्राचार्य्यं शाकपुनिमुद्धृत्य त्रिभ्योः धातुभ्यः अग्निशब्दो-त्पत्तिर्सम्भव्यते इति व्याख्यानकाले धात्वर्थे आख्यातशब्दप्रयोगः कृतः[2]। *महाभाष्य*कारेणाप्याख्यातार्थे धातुशब्दप्रयोगः कृतः[3]। अन्यच्च *निरुक्ते* आख्यातशब्दस्य क्रियारूपत्वमुपदेशितम्[4]। *अष्टाध्यायी*ति व्याकरणे पारिभाषिकशब्दत्वेनाख्यातपदप्राप्तिर्नास्ति, परन्तु अस्याभासः प्राप्यते। "द्वयजृद्ब्राह्मणक्प्रथमाध्वरपुरश्चरण-नामाख्याताट्ठक्"[5] अत्रापि आख्यातस्य क्रियारूपार्थो विधीयते। 'आख्यातमाख्यातेन क्रिया सातत्ये'[6]। वस्तुतो *निरुक्तो*क्ताख्यातपदेन सह व्याकरणोक्तस्य तिङन्तपदस्य साधर्म्यं परिलक्ष्यते। *अष्टाध्यायी*ति व्याकरणे तिङन्तपदेनैव क्रियोपपत्तिर्भवति। *निरुक्ते*ऽपि उच्यते — "आख्यातं तिङन्तपदं तेन तत्रैकदेशो धातुजानितित्यर्थः"[7]।

अभ्यासः ओ अभ्यस्तः — अभि-पूर्वकाद्-क्षेपणार्थकाद्-अस्धातोः योगे अभ्यासशब्दो निष्पद्यते। 'अभिमुख्येनास्यते क्षिप्यते असु क्षेपे कर्मणि घञ्। अभ्यसनं। आवृत्तिः 'इति *शब्दकल्पद्रुमः*। *ऋक्तन्त्रप्रातिशाख्ये*[8], *कात्यायनश्रौतसूत्रे*[9] अस्य आदिमः प्रयोगः परिलक्ष्यते। *यास्कीयनिरुक्ते*ऽपि अभ्यासशब्दः बहूधा परिलक्षितः[10]। अत्र अभ्यासशब्दो द्विरावृत्त्यर्थे प्रयुज्यते। द्विरावृत्तिरूपः अभ्यासशब्दो *निरुक्ते* प्रथमादिष्टमिति मन्यन्ते केचन विद्वांसः। … It is easily passes on to its technical sense of reduplication which is first found in Nirukta[11]. अत्र वक्तुमुचितं भवति यत्, *निरुक्ते*

---

[1] तदेव, १.११.

[2] निरुक्तम्, १.१ दुर्गाचार्यटीका।

[3] महाभाष्यम्, iii.१, नाम च धातुजं आह् निरुक्ते व्याकरणे शाकटायनस्य च तोकम्।

[4] निरुक्तम्, १.१, इह आख्याते हि पाकादीत्यादि क्रियाबोधः भवति।

[5] अष्टाध्यायी, ४.३.७२।

[6] तत्रैव

[7] निरुक्तम्, १.१ दुर्गाचार्य्यः।

[8] ऋक्प्रातिशाख्यम्, i..१६५, दोऽभ्यासे।

[9] … repetition in Kātyāyanaśrautasūtra … Technical Terms and Technique of Sanskrit Grammar, K.C. Chaterjee, p. 73.

[10] निरुक्तम्, २.३ कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः। ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन्ख्यानमिति। नि.2.2।

[11] K. C. Chaterjee, Technical Terms and Technique of Sanskrit Grammar, p. 73.

"अभ्यासे भूयं समर्थं मन्यन्ते"[1] इत्यनेन नैरुक्तश्लोकेन 'अभ्यासः' इति शब्दो यस्मिन्नर्थे प्रयुक्तमासीद्, *अष्टाध्याय्यां* "मिथ्योपपदात् कृञोभ्यासे" अस्मिन् सूत्रे तदेव अर्थः परिलक्षितः।

*अष्टाध्यायी*व्याकरणप्रसिद्धाभ्यस्तशब्दोऽपि *यास्कीयनिरुक्ते* बहूधा प्राप्यते। विशेषत *ऋग्वेदीय* मन्त्रव्याख्यानकाले मन्त्रस्थपदं पर्यालोचनकाले च द्वित्वकृतपदसमुदयस्य अभ्यस्तसंज्ञा दीयते *निरुक्त*कारेण[2]। तद्यथा *ऋग्वेदीय* 'एरिरे' पदमिदं आ पूर्वकात् गत्यर्थक-ईर्-धातुतः निष्पन्नं भवति। *निरुक्त*व्याख्याकारनये अत्र ईर्-धातोः अभ्यस्ते ईर् लिट् ईरे — ईर+ ईर+ ईरे = ई+ ईरे = ईरिरे>आ + ईरिरे = एरिरे इति पदं निष्पन्नम्[3]। एवमेव शब्ददित्वे विहिते तयोः द्वयोः दित्वकृतपदयोः सामान्येनाभ्यस्तसंज्ञाकरणं *निरुक्ते* व्याकरणे च ध्वनितं स्यात्। अध्यापकः क्षितिशचन्द्रच्याटार्जीनये, शब्दद्वित्वसमुदयस्य (reduplicated) अभ्यस्तसंज्ञेति, विषयकं चिन्तनं *निरुक्ते* प्रथममु- पवर्णितमासीत्[4]। अर्थात्, *निरुक्ते* आदौ एव सिद्धान्तोऽयं ध्वनित: स्यात्। यास्कः पाणिनिप्राचार्य्यः पण्डितानामनुमानं यदि *इत्थं* भवेत्तर्हि *निरुक्त*स्य महदवदानं अन्येषु शास्त्रेष्वपि वर्तते, नात्र क्वापि विप्रतिपत्तिः।

उपसर्गः – *ऋक्प्रातिशाख्ये*[5] *तैत्तिरीयप्रातिशाख्ये*[6] *वाजसनेयप्रातिशाख्ये*[7] *निरुक्ते*[8] आदौ अस्मदीयैः पूर्वाचार्यैः उपसर्गशब्दप्रयोगाः विहिताः। प्र-परादीनां क्रियायोगे उपसर्गसंज्ञा भवतीति न्यायम्। *अष्टाध्याय्याम*पि उपसर्गाः क्रियया युज्यन्ते, तथा प्राग्धातोः प्रयुज्यन्ते[9]। किन्तु प्राचीनपरम्परायाम् उपसर्गाणां व्यवहारवैचित्र्यं परिलक्ष्यते। विशेषतः छन्दसि उपसर्गाः स्वतन्त्ररूपेण बहुधा प्रयुक्ता:; पुनश्च धात्वन्तेऽपि प्रयुक्ताः[10]। *निरुक्ते* उपसर्गविषये महदालोचनं विद्यते। वाक्ये चतुर्षु पदेषु उपसर्गः अन्यतमत्वेनोच्यते *निरुक्ते*।[11] यद्यपि उपसर्गस्य

[1] निरुक्तम्, १०.४।

[2] निरुक्तम्, २.१२, ४.२३।

[3] तदेव, लक्षणसरुपः, २.१२, ४.२३।

[4] Kshitish Chandra Chaterjee, Technical Terms and Technique of Sanskrit Grammar — 1, p. 74, "Abhyasta" in the sense of 'reduplicated' is also found for the first time in Nirukta.

[5] ऋक्प्रातिशाख्यम्, ९.६।

[6] तैत्तिरीयप्रातिशाख्यम्, १.१५।

[7] वाजसनेयीप्रातिशाख्यम्, IV.२४।

[8] निरुक्तम्, १.३।

[9] अष्टाध्यायी, १.४.५९।

[10] तदेव, १.४.८२, १.४.८१।

[11] निरुक्तम्, १.१, तद्यान्येतानि चत्वारिपदजातानि नामाख्यातेचोपसर्गनिपाताश्च।

कापि संज्ञा *निरुक्त*कारेण न कृता। केवलं वाक्ये उपसर्गव्यवहारः, अर्थवाचकत्वञ्च तेनाङ्गिकृतम्। प्राचीनपरम्परायाम् उपसर्गाः अर्थवाचकार्थः द्योतको वेति अस्मिन्विषये पण्डिताः द्विधाविभक्ता आसन्। प्रायशः सर्वे प्राचार्या उपसर्गाणां वाचकत्वपक्षधरा आसन् इति ज्ञायते। *निरुक्त*प्राचार्य्यः गार्ग्यमतमुद्धृत्य *निरुक्त*कारेणापि उपसर्गस्य अर्थवाचकत्वमङ्गीकृतम्[1]। एतदतिरीच्य छन्दसि प्रयुक्तानां विंशतिसंख्यकानामुपसर्गाणां पृथगर्थकरणमपि *निरुक्त*कारेण विस्तरेणालोचितम्। यद्यपि प्राचार्य्यप्रवरशाकटायननये उपसर्गाः स्वयमनर्थकाः, अर्थात् पृथक्प्रयुक्तानामुपसर्गानामर्थापत्तिः न स्यात्, उपसर्गाः अर्थद्योतकाः भवन्ति[2]। अतः उपसर्गाणां वाचकता-द्योतकताविषये प्रचीनपरम्परायां मतवैष्यम्यमस्तीति ज्ञायते।

अष्टाध्याय्यां पारिभाषिकशब्दत्वेन उपसर्गप्रयोगो विहितः। अत्र उपसर्गाणां पृथक्पदत्वमपि नास्ति, यथा *निरुक्ता*दिषु प्राचीनग्रन्थेषु दृश्यते। *अष्टाध्यायी*ति व्याकरणे उपसर्गः अव्ययपदान्तर्गत-सुबन्तपदविशेषः। इह प्र-परादीनां क्रियासंयोगे उपसर्गसंज्ञा भवति। अत्र वक्तुमुचितं भवति यत्, वैयाकरणमूर्धन्याचार्य्यः पाणिनि उपसर्गस्य द्योतकत्वपक्षधरः आसीद् न तु वाचकत्वपक्षधरः। यतोहि व्याकरणे पृथक्प्रयुक्तानां उपसर्गाणां अस्तित्त्वमेव नास्ति, *अष्टाध्यायाम्*उपसर्गाः सदैव क्रियया युज्यन्ते। पृथक्प्रयुक्तानां प्रादीनां व्याकरणे सामान्येन कर्मप्रवचनीयसंज्ञा[3] भवतीति न्यायम्।

निपातः – *प्रातिशाख्य-निरुक्ता*दिषु शास्त्रेषु विहितेषु चतुःप्रकारेषु पदेषु निपातः अन्यतमत्वेन परिगण्यते। *निरुक्त*कारनये निपातानां बहवोऽर्था विद्यन्ते। “उच्चावचेष्वर्थेषु निपतन्तीति निपाताः”[4]। प्राचीनपरम्परायां चतुःप्रकारकाः निपाताः परिलक्ष्यन्ते। “उच्चावचेषु चार्थेषु निपाताः समुदाहृताः”[5]। यास्कीये *निरुक्ते* उपमार्थक-कर्मोपसंग्राहार्थक-पादपूरणार्थकभेदेन निपातस्य त्रयभेदा उपवर्णिताः। “अप्युपमार्थेऽपि कर्म्मोपसंग्रहार्थेऽपि पादपूरणाः”[6]। एतेषु पादपूरणार्थकनिपाताः अनर्थकाः भवन्ति[7]। प्रातिशाख्यादिषु ग्रन्थेष्वपि इयं रीतिः

---

[1] निरुक्तम्, १.३, उच्चावचाः पदार्था भवन्तीति गार्ग्यः।

[2] तदेव, १.३, न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः, नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति।

[3] अष्टाध्यायी, १.४.८३, कर्मप्रवचनीयाः।

[4] निरुक्तम्, १.२।

[5] बृहद्देवता, २.८९।

[6] निरुक्तम्, २.१।

[7] तदेव, १.२.१५, पृ. ४०।

अवलम्ब्यते[1]। मूलतो वैदिकमन्त्रेषु ऋषयः छन्दप्रयोजनाद् इत्येतेषां निपातानां सुष्ठुव्यवहारं अकुर्वन् इत्यनुमीयते।

अष्टाध्यायां निपातस्य व्यवहारवैविध्यं परिलक्ष्यते। "प्राग्रीश्वरान्निपाताः"[2] इति सूत्राद् "विभाषाकृञि"[3] इति सूत्रपर्यन्तम् अद्रव्यार्थे प्रयुक्तानां चादिशब्दानां सामान्येन निपातसंज्ञा विधीयते[4]। यद्यपि प्राचीनपरम्परायां वाक्यावस्थिताः निपाताः उपमार्थक-कर्म्मोपसंग्रहार्थक-पादपूरणार्थकाः क्रमेण चतुःप्रकारकाः आसन्[5]। एतेषु पादपूरणार्थकस्य निपातस्य प्रयोग एव नास्ति *अष्टाध्याय्याम्,* अयं तु निश्चयेण वैदिकप्रयोगः। पाणिनीयपरम्परायां मुख्यतः शुद्धनिपातः, गतिः, कर्मप्रवचीयभेदेन निपातः त्रिप्रकारकोऽस्ति। प्रादिगणे परिगणिताः अद्रव्यवाचकाः शब्दाः प्रायेण शुद्धनिपातसंज्ञका भवन्ति। तद्यथा च, वा, अह, एवम्। गतिश्च सूत्राधिकारे पठिताः शब्दाः गतिसंज्ञकाः भवन्ति। पुनश्च प्रादीनां क्रियायोगे उपसर्गसंज्ञा भवति।

भावः – *निरुक्ते* भावशब्दो बहुधा प्रयुक्तः। इह भावशब्देन सामान्येन क्रियोपलक्ष्यते। "उच्यते भावप्रधान-माख्यातम्"[6]। अनेन भावशब्देन आख्यातमाचष्टे। 'पूर्वापरीभूतं भावमाख्यातेनाचष्टे, व्रजतिपचतीत्युप-क्रमप्रभृतिः अपवर्गपर्यन्तम्'[7]। *ऋग्वेदप्रातिशाख्ये* धात्वर्थे भावशब्दस्य प्रयोगो विहितः। 'तदाख्यातम् येन भावं स धातुः'[8]। *अष्टाध्यायी*व्याकरणे भावो वै क्रिया। "यस्य च भावेन भावलक्षणम्"[9] अस्मिन् सूत्रे भावशब्देन एकेन क्रियया क्रियान्तरं लक्ष्यते। ज्ञायते यत्, संस्कृतवाङ्मये भावशब्दस्य महदर्थपरिवर्तनं न जातम्। प्राचीने भावशब्दः यस्मिन्नर्थे प्रयुक्तमासीद्, अर्वाचीने पाणिन्यादिव्याकरणे तस्मिन्नेव प्रयोगः परिलक्षितः। सर्वत्रैव अस्य क्रियारूपार्थो विहितः।

---

[1] ऋक्प्रातिशाख्यम्। इतरे निपाताः, निपातः पादपूरणः, १२.२१, १२.२५।

[2] अष्टाध्यायी, १.४.५६।

[3] तदेव, १.४९८।

[4] तदेव, १.४.५७, चादयोऽसत्तवे।

[5] बृहद्देवता, २.८९।

[6] निरुक्तम्, १.१।

[7] तत्रैव।

[8] ऋक्प्रातिशाख्यम्, xii.५।

[9] अष्टाध्यायी, २.३.३७।

सत्त्वः — *निरुक्ते* मुख्यतो नामपदमभिव्यञ्जयितुं सत्त्वशब्दस्य प्रयोगः क्रियते। *निरुक्त*पूर्वकालिके युगे प्राति-शाख्यादि ग्रन्थेऽपि अयमेव स्तूयते[1]। *अष्टाध्यायी*व्याकरणेऽपि सत्त्वशब्दो द्रव्यपदार्थकः। 'चादयोऽसत्त्वे'[2] सूत्रे सत्त्वशब्दो द्रव्यपदार्थकः। *वैयाकरणमहाभाष्ये* अयमेव ध्वनितः स्यात्। 'अयं सत्त्वशब्दः अस्त्येव द्रव्यपदार्थकः'[3]। सत्त्वशब्दस्य द्रव्यरूपार्थः आदौ शिक्षा-प्रातिशाख्यादयः ग्रन्थे उपलभ्यते, तदनन्तरं *निरुक्ते*, तत्रतः *अष्टाध्याय्याम*प्यनुवर्तते। अस्य आदिमप्रयोगो शिक्ष-वेदाङ्गादिषु शास्त्रेषूपलभ्यते नास्ति सन्देहावकाशः।

कर्म्मोपसंग्रहः — *निरुक्ते* निपातस्य अवान्तरभेदत्वेन कर्मोपसंग्रहार्थको निपात उपवर्णितोऽस्ति। अत्र कर्म्मशब्दः अर्थपर्यायवाचिन इति टीकाकारः[4]। कर्म्मणः(अर्थस्य) उपसंग्रह इति कर्म्मोपसंग्रहः। येन शब्देन अर्थपृथक्त्वं विज्ञायते, सामान्येन स कर्मोपसंग्रहे इति। "यस्यागमादर्थपृथकत्वमह विज्ञायते न तौद्देशिकमिव विग्रहेण पृथकत्वात्स कर्मोपसंग्रहः"[5]। तद्यथा 'रामः श्यामश्च गच्छतः', अस्मिनुदाहरणे 'रामस्य गमनम्'; 'श्यामस्य गमनम्' एतदुभयोः अर्थयोः पृथक्त्वं चेति निपातः सूचयति अतो *निरुक्त*कारनये च कर्मोपसंग्रहार्थकः। 'अन्यथा रामो गच्छति', 'श्यामो गच्छतीति' क्रमेण वाक्यद्वयनिबन्धनेनार्थपृथक्त्वं कर्तव्यम्। 'कर्म्मोपसंग्रहः' शब्दः तु वैदिकः। लौकिके अस्य प्रयोगो न प्राप्यते। *अष्टाध्यायी*ति व्याकरणे कर्मोपसंग्रहशब्दस्य व्यवहारः अलक्षितः। अत्र वक्तुमुचितं भवति यत्, प्राचीनपरम्परायां कर्मप्रवचनीयशब्देन यदुपलक्ष्यते लौकिके तत्तु समुच्चयार्थे स्यात्। अर्थात् पाणिनिपरम्परायां समुच्चयार्थे अस्य शब्दस्य परिगणनं भवति। यतोहि च, वा, अह, इत्येतेषां शब्दानां लौकिके पाणिनीये वेति केवलं समुच्चयरूपः प्रयोगः प्राप्यते। परन्तु चेत्यादयो निपातस्य कर्म्मोपसंग्र-समुच्चयार्थ उभयोरेव प्रयोगो *निरुक्त*कारेण विहितः। एतयोः कर्म्मोपसंग्रह-समुच्चयार्थयोः अर्थान्तरं न्यूनमिति कारणाद् उत्तरवर्तिकाले विशेषतः लौकिके अस्य समुच्चयरूपार्थः सर्वजनसम्मतः स्यादिति कृतानुमानं न दोषाय।

उपजनः – वैदिकसाहित्ये 'उत्पत्तिः' अर्थे उपजनशब्दव्यवहारः प्राप्यते। "वेद मासो धृतव्रतो द्वादशः प्रजाव्रतः। वेदा य उपजायते"[6]। अस्मिन् मन्त्रे 'उपजायते' इत्यनेन उत्पत्तिवाचकस्य 'जन्मः' शब्दस्य

---

[1] ऋक्प्रातिशाख्यम्, xii.८, सत्त्वाभिधायकं नाम निपातः पादपूरणः।

[2] अष्टाध्यायी, १.४.५७।

[3] तत्रैव, पतञ्जलिः।

[4] कर्म्मशब्दो हि प्रायेणार्थपर्यायवाचिन एतस्मिंञ्छास्त्रे। दुः।

[5] निरुक्तम्, १.२।

[6] ऋग्वेदः, i.२५।

प्रतीतिर्भवति। *ऋक्प्रातिशाख्ये*ऽपि अयमेवार्थो ध्वनितः। तत्र 'पुरुश्चन्द्र' इत्यत्र 'श'' उपजनः' इत्यर्थे व्यवह्रियते[1]। *निरुक्ते* उपजनमाधिक्यं द्योतयति। उपेत्युपजनम्। **उपजनम्** – आधिक्यम्[2]। पाणिन्याचार्य्य विरचितायामष्टाध्याय्याम् 'उपजनः' इदृशः शब्दप्रयोगो नास्ति, यद्यपि पतञ्जलिविरचिते *महाभाष्ये* विशेषतो वर्णागमः अर्थे उपजनशब्दो उदाहृतः[3]। *निरुक्ते* अस्मिन्नेवार्थे उपजनशब्दस्य बहुधा प्रयोगो दृश्यते। "अथापि वर्णोपजनः, आस्थाद् द्वारो भरुजेति"[4]।

उपबन्धः – सामीप्यार्थकाद्-उप-पूर्वकाद्-बन्धनार्थकाद्-बन्ध्-धातोः घञि; 'बन्धनाद्यर्थं तत्समीपे वस्त्वन्तरबन्धने' इत्यर्थे उपबन्धशब्दस्तु प्रातिशाख्यादिषु ग्रन्थेषु उपलभ्यते। "उपबन्धस्तु देशाय नित्यम्"[5]। यास्कविरचिते *निरुक्ते* प्रत्ययार्थे उपबन्धशब्दस्तु प्रयुज्यते। 'अध्वर्य्युरध्वर...अपि वाधीयाने युरूपबन्धः'[6] इत्यस्मिन् *नैरुक्त*श्लोके -अध्वर्युशब्दनिर्वचनोपदेशकाले 'युः' इति प्रत्ययस्य प्रयोग उपबन्धशब्देन *निरुक्त*कारेण विहितः। अपि वा अधीयाने अध्येतरीत्यर्थः। 'तदधीते तद्वेद:'[7] इत्यस्मिन्नर्थेऽयं युरूपबन्धः प्रत्ययः[8]। *निरुक्त*टीकाकारदुर्गाचार्य्यनये उपबन्धस्तु नामकरणम्। "... एतस्मिन् निर्वचने युः अयमुपबन्धः नामकरणः। अध्वरमधीयते यः सोऽध्वर्युः"[9]।

सर्वनाम – सर्वेषां यन्नाम तत्तु सर्वनाम। संज्ञावाचकपदस्थाने प्रयोगार्हमिदं पदमिति सामान्यार्थः। सर्वनाम वै प्राचीनपारिभाषिकपदम्। *आपस्तम्बधर्मसूत्रे* अस्यादिमः प्रयोगः परिलक्ष्यते[10]। यास्कविरचिते *निरुक्ते*ऽपि शब्दमिमं संकीर्तितमस्ति[11]। *अथर्ववेदप्रातिशाख्ये* सुखनामशब्देन सह सर्वनामिति शब्दप्रयोगः सुष्ठूपलभ्यते[12]।

---

[1] ऋक्प्रातिशाख्यम्, ४.८४।

[2] निरुक्तम्, १.३।

[3] महाभाष्यम्, ६.१.२ तद्यथा द्वयोरासीनयोस्तृतीय उपजायते, न द्वितीयो द्वितीयो भवति। कस्तर्हि? तृतीयः।

[4] निरुक्तम्, २.२।

[5] तैत्तिरीयप्रातिशाख्यम्, १.५९।

[6] निरुक्तम्, १.८।

[7] अष्टाध्यायी, ४.२.५९।

[8] निरुक्तम्, १.८, स्कन्दस्वामीभाष्यम्।

[9] तदेव, १.८।

[10] आपस्तम्बधर्मसूत्रम्, i.४.२०।

[11] निरुक्तम्, १.३।

[12] अथर्ववेदप्रातिशाख्यम्, ९.४३।

'ऋचां त्वः पोषमास्ते...विमिमीत उ त्वः'[1] अस्मिन् *ऋग्वेदीय*मन्त्रे त्व इति शब्दस्य सर्वानामत्वं यास्केन स्पष्टीकृतम्। 'त्व इति विनिग्रहार्थीयं सर्व्वनामनुदात्वम्।' वस्तुतः त्व इति निपातत्वेनौतदपि विद्यमानसंशय-समाधानाय भगवता यास्केन इदं लिखितम् इत्यनुमीयते। त्व इति विनिग्रहार्थीयम् एकशब्दपर्य्यायं सर्व्वनाम। *अष्टाध्यायी*ति व्याकरणेऽपि त्व इति सर्वादिगणे पठितः अस्ति। उपरिनिर्दिष्टे *ऋग्वेदीय*मन्त्रे त्व इत्यनेन ऋत्विक् (होता) स्पष्टीक्रियते।

व्याकरणे किञ्चिद् भिन्नार्थे सर्वनामशब्दः प्रयुज्यते। मूलतः सर्वादिगणे विद्यमानां सर्व-विश्व-उभ-उभयादि शब्दानां सामान्येन सर्वनामिति संज्ञा भवतीति न्यायम्। 'सर्वादीनि सर्वनामानि'[2] सर्वादीनि सर्वनामानीति सूत्राद् 'अन्तरं बहिर्योगोपसंव्यानयोः'[3] सूत्रपर्यन्तं प्रायः चतुर्विंशतिः शब्दाः, दौ प्रत्ययौ, तथा च त्रीणि गणसूत्राणि सर्वनामसंज्ञकानि भवन्ति।

निवृत्तिस्थानम् – स्थानशब्दसहयोगेन पारिभाषिकशब्दप्रयोगाः संस्कृतवाङ्मये प्राचीनकालादेव प्रयुज्यन्ते। विविधाः शास्त्रियप्रयोगार्हविषयाः संक्षेपावबोधनार्थं इयं रीतिः विविधैः शास्त्रकारैः आश्रियन्ते नास्ति संशयः। एतेषु स्थानशब्दसहयोगेषु शब्देषु निवृत्तिस्थानं यास्कीय*निरुक्ते* प्रयुक्तमस्ति। इह निवृत्तिः वै प्रतिषेधः। निवृत्तिस्थानं प्रतिषेधस्थानमिति। गुणवृद्धेः प्रतिषेधे अस्- धातोः आदिर्भागस्य लोपो भवतीति वचनावसरे भगवता यास्केन निवृत्तिस्थानमिति शब्दप्रयोगः कृतः। "अथाप्यस्तेनिवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीति"[4]।

*अष्टाध्यायी*ति व्याकरणे अयमेव किञ्चिद्भिन्नरूपेण ध्वनित: स्यात्। तत्र निवृत्तिस्थानं विहाय प्रतिषेधोऽर्थः लक्षितः। 'क्ङिति च' इति पाणिनीयसूत्रं व्याख्यानावसरे *महाभाष्य*कृता गुणवृद्धी निषेधे प्रतिषेधोऽर्थः स्वीकृतः"। क्ङिति च क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम्। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुस्ते न भवत इति वक्तव्यम्"[5]। एतदतिरीच्य स्थानसहयोगेन सर्वनामस्थानं शब्दस्यापि प्रयोगः *अष्टाध्याय्यां* दृश्यते। रीतिरियं *कातन्त्रा*दिषु व्याकरणेष्वप्यनुवर्तते। तत्र स्थानसहयोगेन गुणवृद्धिः (गुणवृद्धिस्थान) शब्दस्य प्रयोगो दृश्यते।

---

[1] ऋग्वेदः, १०.७१.११।

[2] *अष्टाध्यायी*, ११.२७।

[3] *तदेव*, १.१.३६।

[4] *निरुक्तम्*, २.१।

[5] *महाभाष्यम्*, १.१.५।

उपधा – उप-सममीपं, धेति स्थानम्। सामान्येन कस्यचिदपि पदस्य वर्णान्तात् पूर्ववर्ण उपधासंज्ञको भवति। *अष्टाध्यायी*ति व्याकरणे उपधाशब्दस्य अयमेवार्थो संकीर्तितः अस्ति[1]। उपधेति प्राचीनपारिभाषिकपदं, प्रातिशाख्यादिषु ग्रन्थेषु अस्य पारिभाषिकशब्दस्य प्राचीनप्रयोगः प्राप्यते। अत्र वक्तुमुचितं भवति यत्, प्रातिशाख्येषु केवलम् *ऋग्वेद-प्रातिशाख्ये* उपधाशब्दप्रयोगो नास्ति परन्तु अस्य निहितार्थमस्तीति (अन्त्यात्पूर्ववर्णः) ज्ञायते। RP stands alone among the *prātiśakhya*s …in not defining *Upadhā* and using word generally in the sense of a preceding letter or word[2]. *वाजसनेय-प्रातिशाख्ये, अथर्वप्रातिशाख्ये* उपधाशब्दस्य व्याकरणसम्मतप्रयोगः प्राप्यते। in VP and CA it has the same technical sense as in Pāṇini[3]. यास्कविरचिते *निरुक्ते*ऽपि अस्मिन्नेवार्थे उपधाशब्दः प्रयुज्यते। विशेषतः शब्दनिर्वचनोपदेशकाले *निरुक्त*कारेण वारद्वयं उपधेति शब्दव्यवहारः कृतः[4]।

उपसंहृतिः – अधुनातनकाले पारिभाषिकशब्दाणां व्याकरणाधीनत्वेऽपि प्राचीने शिक्षा-प्रातिशाख्य-*निरुक्ता*दिषु शास्त्रेषु अस्य प्रयोगः समुपवर्णितो वर्तते। वस्तुतः *अष्टाध्यायी*ति व्याकरणे, पारिभाषिकशब्दत्वेन येषां शब्दानां प्रयोगाः विहिताः, तेषामनेकेषां प्रयोगाः *निरुक्त*कारेणापि निगदिता:। कदाचिदित्येतेषां शब्दानामर्थसाधर्म्यं परिलक्षितं, कदाचिदर्थवैप्यरीत्यमपि लक्षितम्। एतेषां केचन पारिभाषिकशब्दाः एवं सन्ति येषां व्याकरणानुकूलमर्थाः *निरुक्त*कारेण आदौ एव परामृष्टा, अनन्तरं उत्तरवर्तिकाले अन्येषु व्याकरणादिषु शास्त्रेष्वपि इयं धारा निरवच्छिन्नेन प्रचलिता। *अष्टाध्यायी*ति व्याकरणे सन्धिविधायकं यत् सूत्रं परिलक्षितं ("परः सन्निकर्षः संहिता"।) निरुक्ते तल्लक्षणमेव उपवर्णितं वर्तते[5]। ईदृशाः बहवः दृष्टान्ताः *निरुक्ते* इतस्ततः परिलक्षिताः। यथा मया अस्मिन् प्रबन्धे विशदीकृतम्। *निरुक्त*-व्याकरणयोः प्रचलितमनयोः पारिभाषिकशब्दानां तुलनात्मकमध्ययनेन वयं ज्ञातुं समर्था यत्, पाणिनीयव्याकरणे ईदृशाः बहवः पारिभाषिकशब्दाः विद्यन्ते येषामनेकेषां प्रयोगाः पाणिनि-प्राचार्यैरपि कृताः। यन्निदर्शनं प्रातिशाख्य-*निरुक्ता*दिषु ग्रन्थेषु वयं द्रष्टुं शवक्ष्यामहे। यास्कः पाणिनिपूर्वाचार्य्यैति पण्डितानामनुमानं यदि इत्थं भवेत्तर्हि अन्येषु व्याकरणादिशास्त्रेष्वपि *निरुक्त*स्य महदवदानं

---

[1] *अष्टाध्यायी*, १.१.६५, अलोऽन्त्यात्पूर्व उपधा।

[2] K.C. Chaterjee, *Technical Terms and Technique of Sanskrit Grammar*, p. 137.

[3] *Ibid.*

[4] *निरुक्तम्*, १.२, अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति। अथाप्युपधाविकारो भति राजा दण्डीति। नि. 2.1।

[5] *निरुक्तम्*, 1.6. परः सन्निकर्षः संहिता, पदप्रकृतिः संहिता, पदप्रकृतीनि सर्व्वचरणानां पार्षदानि।

विद्यते नास्तीत्यत्र क्वापि विप्रतिपत्तिः। सत्यमुक्तं *निरुक्त*कारेण "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्"[1] इति शिवम्।

Bibliography

1. *अष्टाध्यायी* of पाणिनिः संपा. नरेशझाँ चौखम्बा सुरभारती प्रकाशन, २००८.
2. *पाणिनीयशिक्षा* संपा. मन्मोहनघोषः वा. के. पाबलिशार्स हाउस, १९९२.
3. *लघुशब्देन्दुशेखरः* of नागेशभट्टः *भावबोधिनी-बालवोधिनी* व्याख्यासहितः संपा. श्रीपादसत्यनारायणः मूर्तिः राष्ट्रीयसंस्कृत-विद्यापीठम् २००२.
4. *व्याकरणमहाभाष्यम्* of पतञ्जलिः संपा. गुरुप्रसाद-शास्त्री, संपा नन्दकिशोरशास्त्री प्रतिभाप्रकाशन, २००१.
5. *काशिका* (=*काशिकावृत्तिः*) of वामन-जयादित्यौ संपा. नारायणमिश्रः. रत्ना पाबलिकेशनस् १९८५.
6. *वाक्यपदीयम्* (ब्रह्मकाण्डम्) of भर्तृहरिः संपा. सत्यनारायणशास्त्री खण्डुडि कृष्णदास एकादेमी, १९८७.
7. *पौढमनोरमा* of भट्टोजिदीक्षितः संपा. जयशंकरलालत्रिपाठी कृष्णदास एकादेमी, १९९२.
8. *वैयाकरणसिद्धान्तकौममुदी वालमनोरमा-तत्त्वबोधिनी* सहिता भागः१-४, संपा. गिरिधरशर्मा मोतिलाल वनारसिदास, २०१४.
9. *निरुक्तभाष्यटीका* by माहेश्वरः, संपा. लक्ष्मणस्वरूपः पञ्चनदी विश्वविद्यालयः, १९२३.
10. *निरुक्तम्* of यास्कः दुर्गाचार्यकृतः, ऋज्वार्थाख्यसहितः संपा. मुकुन्दः झा शर्मा, चौखम्बा संस्कृतप्रतिष्ठानम्, २०१६.
11. शास्त्री, रूपकिशोरः, *वैदिकवाङ्मये निर्वचनकोशः* प्रतिभा-प्रकाशनम्, २००२.
12. *ऋग्वेदप्रातिशाख्यम्* by शौनकः संपा. वीरेन्द्रकुमारवर्मा *उवटभाष्य*सहितः चौखम्बा-संस्कृतप्रतिष्ठानम्, १९९८. *ऋग्वेदभाष्यभूमिका* by सायणः संपा. वीरेन्द्रकूमारवर्मा चौखम्बा पाबलिशार्स, २००४.
13. *व्याकरणशास्त्रेतिहासः* by त्रिपाठी, ब्रह्मानन्दः, चौखम्बा सुरभारती प्रकाशन, १९२०.
14. Chaterjee, Kshitish Chandra. (1964). *Technical Terms and Technique of Sanskrit Grammar*. Calcutta University Press.
15. Yāska. (2002). *Nirukta*. Ed. Lakshmansarup. *The Nighantu and the Nirukta*. Motilal Banarsidas Publishers Pvt. Ltd.

Author's Detail

Name : Subir Dolui
Designation : Research Scholar (Ph. D.)
Address : Department of Sanskrit,
Cooch Behar Panchanannbarma University
Cooch behar, 736101
E-mail : subirdolui436@gmil.com

****

[1] *निरुक्तम्*, १.४.

पिङ्गलीयच्छन्दःसूत्रे पाणिनिप्रभावः

Sayanti Gorai

शोधसारः

यो ह वा अविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स स्थाणुं वर्च्छति गर्तं वा पद्यते प्रमीयते वा पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति[1] इति श्रुतिवचनाज्ज्ञायते यत् षड्वेदाङ्गभूतच्छन्दसो वैदिकवाङ्मये कियत्तात्पर्यं विद्यते। तत्र छन्दोवाङ्मये पिङ्गलाचार्यकृतं छन्दःसूत्रं श्रेष्ठस्थानं विधत्ते। वैदिकलौकिकच्छन्दसां सूत्रं ग्रथितं तेनाचार्येण। अत्र ग्रन्थे पदे पद एव पाणिनीयाष्टाध्याय्याः प्रभावः दृग्गोचरीभूयते। कथंकारोऽयं प्रभावः तदेवालोच्यविषयोऽस्य शोधपत्रस्य।

कूञ्जीशब्दाः - वेदः, पिङ्गलीयच्छन्दःसूत्रम्, अष्टाध्यायी, छन्दः।

****

"वेदोऽखिलधर्ममूलम्"[2] इति अखिलधर्ममूलत्वात् वेदाध्ययनेन धर्म उत्पद्यते। धर्मेणैव चरमपुरुषार्थस्य मोक्षस्य प्राप्तिर्जायते। तस्माद् वेदपाठस्य रीतिरवश्यमेवानुसरणीयैव। केवलं वेदमन्त्राणाम् अर्थज्ञानमन्तरेण नाध्यात्मिकोन्नतिः। अतः षाङ्गं वेदमध्येयम् इत्यस्ति रीतिः। वस्तुतः परा चैवापरा चेति द्वे विद्ये एव वेदितव्या, परा तु ब्रह्मविद्या अपरा च वेदादिशास्त्रज्ञानम्। अपराविद्यायाः मूलविषयः धर्मः, तदर्थं वेदानुसारेण कर्मकाण्डस्य सम्पादनमत्यावश्यकमेव। तत्र च शिक्षादिवेदाङ्गषड्कं विना वेदार्थस्य ज्ञानं न जायते। अज्ञात्वा वेदमन्त्रस्य प्रयोगे तु प्रयोगकर्तुर्हानिरेव जायते। उक्तञ्च पाणिनीयशिक्षायां -

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्[3]॥ इति।

वेदाङ्गपुरुषस्य पादतुल्यं हि छन्दः। पाणिनीयशिक्षायामुच्यते –

---

[1] कात्यायनस्य सर्वानुक्रमणी - १-१।

[2] मनुसंहिता - २-६।

[3] पाणिनीयशिक्षा - ५२।

"छन्दः पादौ तु वेदस्य..."[1] इति।

पद्भ्यां विना यथा मानवाः गन्तुं न शक्नुवन्ति, न वा कार्याय प्रसरन्ति तथैव स्थावरत्वमेति वेदः छन्दसं विना। किञ्च, "छन्दो वै वेदस्य मुखम्" इति श्रुतिवचनात् छन्दसः प्राधान्यं ख्यापितमेव। वस्तुतः विधिच्छन्दोनिबद्धपद्यकदम्बकेन अलंकृतेयं वेदराशिः। छन्दसा वेदपाठेन पुरुषस्य पापं भवति दूरीभूतम्। आम्नातञ्च वेदाचार्येन सायनेन ऋग्वेदस्य प्रथममन्त्रभाष्ये – "पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वात् छन्द इत्युच्यते" इति। तत्र छन्दोवाङ्मये सम्प्राप्तेषु ग्रन्थेषु पिङ्गलाचार्यरचितं छन्दःसूत्रं सर्वातिशायि एव। ग्रन्थोऽयं सूत्रात्मकः।

शाब्दिकनिकाये आचार्यपाणिनेः अमरकृतिः अष्टाध्यायी। सूत्रात्मकेऽस्मिन् ग्रन्थे सूत्ररचनायां तदीयाशैली तथा सूत्रकौशलं नाविदितमेव कस्यचित्। पाणिनेरष्टाध्यायी तथा पिङ्गलाचार्यस्य छन्दःसूत्रम् चेति ग्रन्थद्वयस्य सूक्ष्मातिसूक्ष्मतया पर्यालोचनेन ज्ञायते यत् उभययोर्मध्ये बहुत्रैव साम्यं विद्यते। कालिकानुधावनेन तथा छन्दःसूत्रे पाणिनीयसूत्रस्य व्यवहारात् वक्तुं शक्यते यत् पाणिनिपरवर्तिनिकालरचिते पिङ्गलीयच्छन्दःसूत्रे पाणिनेः प्रभावोऽस्त्येव।

<u>ग्रन्थगतसाम्यम्</u> –

पाणिनीयव्याकरणं सूत्रात्मकम्, अष्टानाम् अध्यायानां समाहारत्वात् अष्टाध्यायी। पिङ्गलाचार्यस्य छन्दःसूत्रम् इति ग्रन्थः सूत्रात्मकः। अत्रापि अष्टौ अध्यायाः राजन्ते। अस्यापि अपरं नाम अष्टाध्यायी। पाणिनिना यथा केवलं पदसाधुत्वनिदर्शनाय सूत्राणि रचितानि तथैवात्र छन्दःसूत्रेऽपि आचार्यपिङ्गेन सूत्राणि रचितानि, उदाहरणानि तु वृत्तिकारेण हलायुधेन प्रदत्तानि। पिङ्गलाचार्यस्य पूर्वे किं छन्दोविषयको ग्रन्थो नासीत्? आसीदेव, ऋक्प्रातिशाख्ये तु ग्रन्थकारेण सूत्रेण सहोदाहरणान्यपि प्रदत्तानि। न हि पूर्वत्वादपि पिङ्गलाचार्येण सा रीतिर्न स्वीकृता। तेन पाणिनेः रीतिरेव स्वीकृता।

<u>सूत्रगतसाम्यम्</u> –

न हि शास्त्रविषये या कापि रचना सूत्रत्वेन समादृता भवति। शास्त्रे सूत्रस्य लक्षणमपि सम्यक्तया निर्दिष्टम्। विष्णुधर्मोत्तरपुराणे सूत्रलक्षणं लक्षयति -

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।

---

[1] पाणिनीयशिक्षा - ४१।

अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥ इति॥"

इदं षड्वैशिष्ट्योपेतवाक्यमेव सूत्रपदविमधिरोहति। पाणिनीयाष्टाध्याय्यां सूत्रेषु एतानि वैशिष्ट्यानि विद्यते एव विषयेऽस्मिन् नास्ति कोऽपि सन्देहावकाशः। पिङ्गलीयच्छन्दःसूत्रे कथंकारं तत्साम्यं तदेव दृश्यते –

- अल्पाक्षरम् – अक्षराणाम् अल्पत्वं सूत्रस्य प्रथमं वैशिष्ट्यम्। अल्पाक्षरेणैव भावार्थं द्योतनीयम्। यथोदाहरणम् – "हे (१-१२)", "ग्लौ (१-१४)", "तोटकं सः (६-३७)" चेत्यादीनि सूत्राणि। सूत्राणाम् अल्पाक्षरत्वादपि अर्थविज्ञाने न कुत्रापि वाधा अस्ति।
- असन्दग्धम् - सूत्रेषु सन्देहजनकाः शब्दाः न तिष्ठेयुः। सूत्रपाठे ज्ञाने वा सन्देहे सति पदसाधुत्वनिष्पत्तौ वाधा स्यात्, तत्रापि सन्देहावकाशः स्यादेव। अतः सूत्रं सदैव असन्दिग्धं स्यात्। यथा छन्दःसूत्रे – "जगती षड्भिः(३-४९)", "इन्द्रवज्रा तौ ज्गौ ग् (६-२१)" चेत्यादिषु सूत्रेषु लक्ष्यघटकपदस्यार्थज्ञाने नास्ति सन्देहलेशः।
- सारवत् - सूत्रेषु अवश्यमेव गतार्थः स्वकीयवक्तव्यं च स्यात्, तत्तु साररूपेण यथा सूत्रशरीरस्य बृद्धिरपि न जायते तदपि स्मर्तव्यम्। यथा पाणिनीयतन्त्रे सर्वेषु एव सूत्रेषु अल्पाक्षरत्वेऽपि सारांशः विद्यते तथैव पिङ्गलीयच्छन्दःसूत्रे सारांशः सर्वत्रैव दृग्गोचरीभूयते।
- विश्वतोमुखम् - सूत्रस्य मुखं सर्वदिशि भवेत्। प्रयोजने सति सूत्रम् अन्यत्रापि कार्यं साधयति। पाणिनीयतन्त्रे पिङ्गलीयतन्त्रे च सूत्रेषु इदं वैशिष्यं दृश्यते एव।
- अस्तोभम् – सूत्रं स्यात् निरर्थकपदरहितम्। किञ्च, वैयाकरणाः लाघवप्रियाः तेषां मते - "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यते वैयाकरणाः" इति। पाणिनीयसूत्रवत् पिङ्गलीयसूत्रे निरर्थकपदाभावः अवलोक्यते।
- अनवद्यम् – सूत्रं स्यात् सर्वप्रकारदोषशून्यम्, तथा च मनोहारि सूत्रं स्यात्। उभययोः सूत्रे दोषशून्यत्वं तथा मनोहरत्वं नितरामेव दृश्यते।

<u>**अनुवृत्तिगतसाम्यम्**</u> –

अनुवृत्तिर्हि पाणिनीयव्याकरणस्यान्यतमा सूत्रशैली। स्वदेशलक्ष्यसंस्कारपूर्वकमन्यदेशार्थबोधकत्वम् अनुवृत्तित्वम् इति अनुवृत्तेः सामान्यलक्षणम्। अन्यसूत्रात् पदानां सम्पूर्णसूत्रशरीरस्य अनुवृत्तिद्वारा एव सूत्रशरीरं भवति अल्पाक्षरविशिष्टम्। अधिकारार्थे एवानुवृत्तिः प्रयुज्यते। त्रिविधोऽधिकारः –

"सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च।
गङ्गास्त्रोत इति ख्यातश्चाधिकारास्त्रयो मतः॥" इति।

1. **सिंहावलोकिताधिकारः** – यथा सिंहः अरण्यभ्रमणकाले स्वखाद्यान्वेषणाय अग्रे गत्वापि पश्यति पश्चाते वारं वारं तथैव परवर्तिसूत्रात् पूर्वसूत्रे पदस्य पदानां वा अनुवृत्तिः जायते। इयं रीतिः तु पाणिनीयतन्त्रस्य अन्यतमप्रधानभूता। तथैव पिङ्गलीयसूत्रेऽपि दृश्यते – "द्वावप्याल्पशः (३-४५)" इति सूत्रात् "अक्षरपङ्क्तिः पञ्चकाश्चत्वारः (३-४४)" इति सूत्रे "अल्प" इति पदस्यानुवृत्तिरभवत्। हलायुधवृत्तौ उच्यते – "द्वावप्यल्पशः इत्यस्मात् सिंहावलोकितन्यायेनाल्पग्रहणमनुवर्तते, तेन पङ्क्तेरल्पत्वं विशेषात् प्रतिपादितं भवति"। इति॥ किञ्च, "पादस्यानुष्टुब्वक्तव्यम् (५-१०)" इति सूत्रात् "ग्लिति समानी(५-७)" इति सूत्रे सिंहावलोकन्यायेन "अनुष्टुप्" इति पदस्यानुवृत्तिर्जायते। उक्तं च हलायुधेन तदीये वृत्तौ – "पादस्यानुष्टुब्वक्तव्यम् इत्यतः सूत्रात् सिंहावलोकितन्यायेनानुष्टुब्ग्रहणमनुवर्तते" इति।

2. **मण्डूकप्लुतिः** – यथा भेकस्य लम्फनं कियद्दूरे एव भवति तथैव मध्यवर्तिनं सूत्रं परित्यज्य मण्डूकप्लुतिन्यायेनानुवृत्तिः जायते। वासुदेवदीक्षितेन बालमनोरमायामस्य स्वरूपं प्रोक्तं – "मण्डूका यथा मध्ये पदानि सन्ततमप्रक्षिपन्त एव उत्प्लुत्य गच्छन्ति तद्वदनुवृत्तिः"[1]। एवमेव दृश्यते पिङ्गलीयच्छन्दःसूत्रग्रन्थे। तत्र "शालिनी म्तौ ग् समुद्र-ऋषयः (६-२५)" इति सूत्रात् "वृन्ता नौ स्गौ ग् (५-३०)" इत्यस्मिन् सूत्रे मण्डूकप्लुतिन्यायेन समुद्रपदस्य तथा ऋषिपदस्य चानुवृत्तिरभवत्। उक्तं चात्र वृत्तौ हलायुधेन – "अत्र मण्डूकप्लुतिन्यायेन समुद्र-ऋषयः इत्यनुवर्तते। तेन चतुर्भिः सप्तभिश्च यतिः"[2] इति।

3. **गङ्गास्रोताधिकारः** - यथा गङ्गास्रोतं निरवच्छिन्नधारया बहुदूरपर्यन्तं विस्तृतं भवति तथैव एकस्य सूत्रस्य तत्परवर्तिनः नैकेषु सूत्रेषु अनुवृत्तिः जायते। "तृतीयं द्विपाज्जगतगायत्र्याभ्याम् (३-१६)" इत्यस्मात् सूत्रात् तृतीयम् इति पदं परवर्तिषु "त्रिपात्त्रैष्टुभैः (३-१७)" इति सूत्रे अनुवृत्तम्। एवम्प्रकारेण उभययोः ग्रन्थयोः पर्यालोचनेन ज्ञायते यत् सूत्रात्मकग्रन्थत्वात् बहुसाम्यं विद्यते तथा च पाणिनेः पूर्ववर्तित्वात् पिङ्गलीयच्छन्दःसूत्रे पाणिनेः प्रभावः अस्ति इत्यनुमातं शक्यते, एवमपि वक्तुं शक्यते यत् पिङ्गलाचार्यः पाणिनिमुनेः सूत्ररचनाकौशलं गृहीतवान्।

---

[1] सिद्धान्तकौमुदीस्थस्य ५४३ तमसूत्रक्रमस्य "अभिनिविशश्च" (१-४-४७) इति पाणिनीयसूत्रस्य वासुदेवप्रणीतबालमनोरमाटीका।

[2] पिङ्गलच्छन्दःसूत्रम् ६-३०, हलायुधवृत्तिः।

Bibliography

1. दीक्षित, भट्टोजी. (२००२). *वैयाकरणसिद्धान्तकौमुदी*. बालमनोरमातत्त्वबोधिनीटीकोपेता. सम्पा. गिरिधरशर्मा. मतिलालवनारसीदास.

2. पतञ्जलिः. (१४१७ बङ्गाब्दे).महाभाष्यम्. सम्पा. ब्रह्मचारी मेधाचैतन्यः. दण्डिस्वामी- दामोदर-आश्रम.

3. पाणिनिः. (२००६). पाणिनीयशिक्षा. सम्पा. अशोककुमारवन्द्योपाध्यायः. संस्कृतवुक्-डिपो.

4. पिङ्गलाचार्यः. (१९२८ खीष्टाब्दे). पिङ्गलछन्दःसूत्रम् हलायुधवृत्तिसहितम्. सम्पा. जीवानन्द-विद्यासागरः.

5. भर्तृहरिः. (२००६). वाक्यपदीयम् (हरिवृषभकृतया स्वोपज्ञवृत्त्या, पद्मश्रीपण्डितरघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया च सहितम्). प्रकाशकः डः हरिश्चन्द्रमणित्रिपाठी. सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः. (चतुर्थसंस्करणम्).

6. वसु, योगिराजः. (२००५). वेदेर परिचय *(वङ्गभाषायाम्)*. संस्कृतपुस्तकभाण्डारः.

7. हालदारः, गुरुपदः. (२००६). व्याकरणदर्शनेर इतिहास *(वङ्गभाषायाम्)*. संस्कृतवुक्-डिपो.

8. Chatterjee, Asoke. (1987). *Pingalacchandahsutra A Study.* University of Calcutta.

Author's Detail

Name : Sayanti Gorai
Designation : Assistant Professor
Address : SACT, Department of Sanskrit
Jogamaya Devi College
Kolkata.
Email : sayantigorai101@gmail.com

****

रसवादाः - रसस्वरूपनिरूपणम्

Dr. V. Suryaprabha

शोधसारः

रससम्प्रदायस्य प्रप्रथमप्रवर्तकः भरतः इति सर्वेषामालङ्कारिकाणामभिप्रायः। भरतस्य "नाट्यशास्त्रम्" इति ग्रन्थः सुप्रसिद्धः, सर्वेषामालङ्कारिकाणाम् अलङ्कारशास्त्रविषये आधारभूतः ग्रन्थः इति च सर्वेषां विदुषाम् अभिप्रायः। रसस्वरूपनिरूपणविषये भरतमुनिः येषां सिद्धान्तानां प्रतिपापादनं कृतवान्, प्रायशः तेषामेव सिद्धान्तानां प्रतिपादनं एवं व्याख्यानञ्च तदितरैः आचार्यैः कृतम्। भरतमुनिना प्रतिपादितं यत् –

"न हि रसादृते कश्चिदर्थः प्रवर्तते"[1]। इति।

एवं भरतः नाट्यशास्त्रे रससूत्रमेवं प्रस्तुतवान् –

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"[2] इति।

वस्तुतः भरतकृतनाट्यशास्त्रस्य रससूत्रमतिसरलं सुस्पष्टञ्च वर्तते। परन्तु इदं रससूत्रं व्याख्याकाराणां अनेकव्याख्यभिः अतिक्लिष्टं सञ्जातम्। रससूत्रस्य विभावानुभावव्यभिचारिपदानां व्याख्याने न काऽपि विमतिः। परं संयोगनिष्पत्तिपदयोः व्याख्याने एव विद्वद्भिः मतान्तराणि प्रस्थापितानि। तानि मतानि काव्यप्रकाशगतरसस्वरूपनिरूपणमिति मम पत्रे प्रस्तोतुमिच्छामि।

कूञ्जीशब्दाः - रसः, विभावः, अनुभावः, व्यभिचारिभावः, संयोगः, निष्पत्तिः।

****

मम्मटाचार्यः काव्यप्रकाशे चतुर्थोल्लासे रसस्वरूपं निरूपितवान्। यथा -

कारणान्यथ कार्याणि सहकारीणि यानि च[3]।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैः विभावाद्यैः स्थायी भावो रसः स्मृतः॥ इति।

विभावानुभावव्यभिचारिभावैः अभिव्यक्तः स्थायीभावः एव रसः। स्थायीभावो नाम कश्चित् समयं यावत् अविच्छिन्नरूपेण विद्यमानः भावः। इतरे च भावाः मध्ये मध्ये जायमानाः लीयमानाश्च भवन्ति। परं स्थायीभावः अनुस्यूततया आप्रबन्धं स्थिरो भवति। तत्र मम्मटस्य वाक्यानां मूलं भरतस्य सूत्रम्। तद्यथा -

---

[1] नाट्यशास्त्रम् – भरतः – ६/२८८

[2] नाट्यशास्त्रम् – भरतः – ६/३२/२८१

[3] काव्यप्रकाशः - मम्मटः ४ उल्लासः – २७, २८ कारिके, पृ.सं - ३४

"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः"[1] इति।

अस्य अयमर्थः। विभावानुभावव्यभिचारिणां संयोगात् रसस्य निष्पत्तिः इति। अत्र संयोगशब्दः निष्पत्तिशब्दश्च व्याख्यानांशौ। अतः तत्तद्दार्शनिकाः तत्तद्दर्शनानुसारेण व्याख्यानं कृतवन्तः। तेषु पूर्वमीमांसा-मतानुयायी भट्टलोल्लटः। सः स्वस्य मतमेवमुपस्थापितवान्।

१. **<u>भट्टलोल्लटमतानुसारेण रसस्वरूपनिरूपणम्</u>** -

विभावैः ललनोद्यानादिभिः आलम्बन-उद्दीपनकारणैः रत्यादिकः भावः जनितः। अनुभावैः कटाक्ष-भुजाक्षेपप्रभृतिभिः प्रतीतियोग्यः कृतः। व्यभिचारादिभिः निर्वेदादिभिः सहकारिभिः उपचितः मुख्यया वृत्त्या रामादौ तद्रूपानुसन्धानात् नर्तकेऽपि प्रतीयमानः रसः।

एवं भट्टलोल्लटादीनां मतानुसारेण रसः प्रधानतया रामादावेव भवति। नाट्ये अर्थात् रूपकेषु नटः रामादिवेषभूषादीन् दृष्ट्वा तद्वद्भाषमाणः रामादीन् अनुकरोति। तेन नटेऽपि रसः अस्तीव भाति।

रत्यादीनां विभावादिभिः सम्बन्धादेव रसत्वं भवति। श्रृङ्गाररसचर्चायाम् आलम्बनोद्दीपनाभ्यां विविधभावाभ्यां रतिः उत्पद्यते। वस्तुतः रतिः आलम्बनविभावेनैव जायते। जातायाः रतेः पुष्टिं कुर्वन्तीति उद्दीपनविभावाः अपि रतेः कारणानि इति कथ्यन्ते। क्वचिदालम्बनविभावेऽपि सुन्दरपरिसराणां विविक्तस्थानस्य च अभावे रतिः न उत्पद्यते।

एवं च विभावानां रतेश्च मध्ये सम्बन्धः जन्यजनकभावः। रतिः जन्या, विभावाश्च जनकाः। कटाक्षवीक्षणादयः अनुभावाः जातायाः रतेः कार्याणि। तैः रतिः अस्तीति ज्ञायते। एवम् अनुभावानां रतेश्च मध्ये सम्बन्धः गम्यगमकभावः। गम्या रतिः गमकाश्च अनुभावाः। लज्जादयः व्यभिचारिभावाः जातायाः रतेः परिपोषणं कृत्वा सर्वत्र व्यापयन्ति। अतः रतेः व्यभिचारिणां च मध्ये सम्बन्धः पोष्यपोषकभावः। रतिः पोष्या, व्यभिचारिणः पोषकाः। एवं विभावानुभावव्यभिचारिसंयोगात् रामादिषु अनुकार्येषु श्रृङ्गाररसः उत्पद्यते। तस्य श्रृङ्गाररसस्य अभिनयादिना नटेऽपि प्रतीतिर्भवति।

तथा च भट्टलोल्लटादीनां मतमनुसृत्य सूत्रस्य व्याख्यानम् एवं भवति। अत्र स्थायिनाम् इति पदम् अध्याहार्यम्। स्थायिनां विभावानुभावव्यभिचारिभिः अर्थात् विभावैः आलम्बनोद्दीपनैः उत्पाद्योत्पादकभाव-सम्बन्धात्, अनुभावैः गम्यगमकभावरूपसम्बन्धात्, व्यभिचारिभिः निर्वेदादिभिः पोष्यपोषकभावसम्बन्धात् रसनिष्पत्तिः रसस्य उत्पत्तिः अभिव्यक्तिः पुष्टिश्च जायते इति रससूत्रस्य अर्थः।

---

[1] नाट्यशास्त्रम् – भरतः – ६/३२/२८१

१. एतन्मतानुसारम् अनुकार्येषु रामादिष्वेव यदि रसः निष्पद्यते तर्हि रसनिष्पत्तिरहितानां सामाजिकानाम् आनन्दः कथं जायते, इति एका आपत्तिः।

२. यदि नाट्यरसेष्वेव चर्चा क्रियते काव्यरसविषये का गतिः इति द्वितीया आपत्तिः। अतःएतदापत्तिद्वयस्य सत्वात् अस्मिन् वादे स्वारस्यं न दृश्यते। अयं वादः उत्पत्तिवादनाम्ना प्रसिद्धः।

२. **<u>श्रीशङ्कुकमतानुसारेण रसस्वरूपनिरूपणम्</u>** -

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः इति भरतस्य सूत्रम्। तस्मिन् सूत्रे संयोगशब्दः निष्पत्ति-शब्दश्च व्याख्येयौ। भट्टलोल्लटः संयोगशब्दम् उत्पाद्योत्पादकभावपरतया निष्पत्तिशब्दम् उत्पत्तिपरतया च व्याख्यातवान्। तत्र अनुकार्ये विद्यमाना रतिःसामाजिकरसास्वादस्य उत्पत्तिं कथं करोतीति आशङ्क्य श्रीशङ्कुकः भरतस्य सूत्रं व्याख्याति। नटनिष्ठरामादिविषयकज्ञानं कीदृशं भवतीति कथयन् श्रीशङ्कुकः प्रमाणस्वरूपं निरूपयति। लोके प्रमाणजन्यं ज्ञानं चतुर्धा भिन्नं भवति। सम्यङ्मिथ्यासंशयसादृश्यज्ञानमिति। तत्र अनुकार्यं दृष्ट्वा अयमेव रामः, राम एव अयम् इति ज्ञानं सम्यगिति वक्तुं न शक्यते। यतो हि -

न रामोऽयम् इति उत्तरकालिकबाधात्। एवं रामोऽयमिति रामः स्याद्वा न वा अयमिति संशयज्ञानमपि न भवति। एवं रामसदृशः अयमिति सादृश्यज्ञानमपि न भवति। एवं नटे रामविषयकं ज्ञानम् एतद्ज्ञानविलक्षणं भवति। एवं च रामः इति ज्ञानेन ग्राह्ये नटे स्वीकृत्य काव्यानुसन्धानबलात् शिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कार्यकारणसहकारिभिः कृत्रिमैरपि विभावादिशब्दव्यपदेश्यैः संयोगात् गम्यगमकभाव-रूपात् अनुमीयमानः रत्यादिभावः सामाजिकानां वासनया चर्व्यमाणः रसः भवतीति श्रीशङ्कुकस्य मतम्। एतन्मतानुसारेण सूत्रे संयोगशब्दस्य गम्यगमकभावः इति, निष्पत्तिशब्दस्य अनुमितिः इत्यर्थः।

इयम् अनुमितिः अनुमानप्रमाणेन जायते। अनुमानं च पक्षं साध्यं च वहति। एकस्य वस्तुनः दर्शनसम-नन्तरं तत् प्रत्यक्षज्ञानेन अन्यस्य वस्तुनः ऊहः एव अनुमानं भवति। "यत्र यत्र धूमः तत्र तत्र वह्निः" इति व्याप्तिज्ञानेन पर्वतसमीपे धूमं दृष्टवतः "पर्वतो वह्निमानयं धूमात्" इति ज्ञानं प्राप्नोति। अत्र पर्वतः पक्षः, धूमः हेतुः, वह्निः साध्यः भवति। एवं च प्रस्तुते नटरूपः रामादिः पक्षः, सीताविषयकरतिः साध्यम्, सीताविषयकरति-चेष्टाः हेतुः भवति। एवं च अयं पुरोदृश्यमानः रामः सीताविषयकरतिमान् सीताविषयकरतिचेष्टावत्वात् इति अनुमानस्य स्वरूपम्। तेन अनुमानेन जायमाना रामादिनिष्ठसीतादिविषयकरतिः सामाजिकेन अनुमीयते। एवम् अनुमीयमानः रत्यादिभावः एव वासनया चर्व्यमाणः रसः भवतीति श्रीशङ्कुकस्य मतम्।

अस्य स्थायीभावस्य नटप्रदर्शितविभावादीनां च मध्ये सम्बन्धः भवति गम्यगमकभावः। स्थायिभावः गम्यः, विभावादयः गमकाः। स्थायिभावे सहजतया काचन रमणीयता भवति। अतः अस्मिन् लोके अनुमीयमानानाम् इतरवस्तूनाम् अपेक्षया काव्यनाट्ययोः अनुमीयमानः रत्यादिभावः विलक्षणो भवति। अत एव अयं भावः आस्वादयोग्यो भवति।

अत्र गम्यगमकभावः नाम अनुमाप्य-अनुमापकभावः। श्रीशङ्ुकमते दोषद्वयमस्ति। प्रथमः दोषः भवति - अनुमीयमानं ज्ञानं चमत्कारं न जनयति इति, द्वितीयः दोषः भवति- नाटकविषये एव लक्षणसमन्वयः कृतः श्रव्यकाव्यविषये लक्षणं न समन्वितम्- इति।

३. **<u>भट्टनायकमतानुसारेण रसस्वरूपस्य निरूपणम्</u>** -

भट्टलोल्लटश्रीशङ्ुकमतयोः अनुसारेण नाटके एव रसानुभूतिः जायते इति अवगतम्। श्रव्यकाव्यविषये उभावपि नैव किमपि उक्तवन्तौ। रसम् अतिप्रधानतया श्रव्यकाव्येषु सर्वप्रथमं भट्टनायकः एव चर्चितवान्। अत एव आनन्दवर्धनः अपि श्रव्यकाव्यविषये रसं बहुधा निरूपितवान्।

अपि च उत्पत्तिवादे अनुमितिवादे वा चमत्कारः कथं जायते इति सम्यक् न उपपादितम्। लोके चमत्कारः प्रत्यक्षादेव जायते। अनुमित्यादिना जायमानं ज्ञानं नैव चमत्कारं जनयति। अतः रसानुमितिवादः नैव युक्तः इति उपपादयन् भट्टनायकः रससूत्रम् एवं व्याख्यातवान्। न ताटस्थ्येन नात्मगतत्वेन रसः न प्रतीयते, नोत्पद्यते, नाभिव्यज्यते। अपि तु काव्ये नाट्ये च अभिधातः द्वितीयेन व्यापारेण विभावादिसाधारणीकरणात्मना भावकत्वनाम्ना भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमय-संविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते। स्थायिनः रत्यादेः विभावानुभावव्यभिचारिभिः संयोगात् भोज्यभोजकभावात् रसस्य सत्त्वोद्रेकप्रकाशा-नन्दमयसंविद्विश्रान्तिसत्वस्य रत्यादेः निष्पत्तिः भुक्तिः इति सूत्रार्थः व्याख्यातः भट्टनायकेन। अयं च भुक्तिवादः इति कथ्यते।

भट्टनायकस्य अभिप्रायः एवं भवति। काव्यनाटकेषु प्रयुक्तानां शब्दानां न केवलं अभिधाव्यापारः अपि च भावकत्वव्यापारः, भोजकत्वव्यापारः इति द्वौ व्यापारौ भवतः। रसानुभूतिविषये भावकत्वभोजकत्वव्यापारयोः अतीव प्राधान्यं भवति। नाटक- सन्दर्भे नटः, रामादिनायकाः, सामाजिकाः इति त्रयः उपस्थिताः भवन्ति। तेषु नटः नायकश्च तटस्थौ भवतः। रसानुभूतिः अनयोः नैव भवति। रसानुभूतिविषये एतौ द्वावपि उदासीनौ। अतः रसः नटस्थरामाद्योः कदापि न प्रतीयते। एवं सामाजिकनिष्ठोऽपि नैव भवति। एवं सति शब्दे विद्यमानः द्वितीयः व्यापारः भावकत्वनामकः सामाजिकम् अभिधया ज्ञायमानम् अर्थं पुनः पुनः भावयितुं प्रेरयति। अस्मिन् भावना समये सामाजिकः विभावादीन् तत्तद्व्यक्तिविशेषान्, तत्तद्देशसम्बन्धविशिष्टान् नैव पश्यति। साधारणतया

पश्यति। अर्थात् रत्यादीन् सीतारामादिसम्बद्धानिव न पश्यति। सीतादींश्च कान्तारूपेणैव पश्यति। तथा च केवलरत्यादिरूपः सामाजिकेन दृश्यते। एवं साधारणीकरणे जाते शब्दे विद्यमानः तृतीयः व्यापारः भोजकत्वनामकः सामाजिकं रत्याद्यास्वादयोग्यं करोति। अयं रत्याद्यास्वाद एव रसनिष्पत्तिः इति।

अस्मिन् मते शब्दे त्रयः व्यापाराः अङ्गीकृताः। "अभिधा भावना चैव तद्भोगीकृतिरेव च" इति। परं शब्दे भावना भोगीकृतिव्यापारयोः स्वीकारे प्रमाणं किमपि न उपलभ्यते इति दोषः विमर्शकैः उद्भावितः।

४. **अभिनवगुप्तमतानुसारेण रससवरूपनिरूपणम्** -

भट्टनायकस्य मते अङ्गीकृतयोः भावकत्वभोजकत्वव्यापारयोः प्रसङ्गं विना अभिनवगुप्तः रससूत्रं व्याख्यातवान्। इदं व्याख्यानम् अभिव्यक्तिवादनाम्ना प्रसिद्धम्। भट्टनायकमते भावकत्वव्यापारः नायकादीन् साधारणी करोति। अभिनवगुप्तपादमते सहृदयधर्मः भावना साधारणी करोति। भावना भट्टनायकमते पदव्यापारः। अभिनवगुप्तपादमते सहृदयधर्मः। तथा च अभिव्यक्तिवादम् उपपादयन् मम्मटः एवं लिखति "लोके प्रमदादिभिः स्थाय्यनुमाने अभ्यासपाटववतां काव्ये नाट्य च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापार-वत्वात् अलौकिकविभावादिशब्दव्यवहार्यैः ममैवैते, शत्रोरेवेति, तटस्थस्यै वेते न ममैवेते, न शत्रोरेवेते, न तटस्थस्यै वेते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैः अभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिकः नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्या अपरिमितभावेन प्रमात्रा सकलसहृदय-संवादभाजा साधारण्येन स्वाकार इव अभिन्नोऽपि गोचरीकृतः चळमाणतैकप्राणः विभावादिजीवितावधिः ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी श्रृङ्गारादिको रसः"।

एतन्मतानुसारं विभावानुभावव्यभिचारिसंयोगात् स्थायिभावानां विभावानुभावव्यभिचारिभिः संयोगात् व्यङ्ग्यव्यञ्जकभावसम्बन्धात् रसनिष्पत्तिः। रसस्य अभिव्यक्तिः इत्यर्थः। अथवा विभावानुभावव्यभिचारिणां परस्परमेलनात् रसनिष्पत्तिः इति वा अर्थः। एवं च भरतमुनेः सूत्रे व्याख्यानयोग्ययोः पदयोः संयोगनिष्पत्ति-शब्दयोः क्रमेण व्यङ्ग्यव्यञ्जकभावः, अभिव्यक्तिः इत्यर्थः लभ्यते।

लोके दैनन्दिनजीवने ललनोद्यानादीनि रत्यादेः कारणानि कटाक्षनिक्षेपादीनिकार्याणि, निर्वेदादीनि सहकारीणि सम्यक् परिशील्य तद्विवेचनेन रत्यादिभावानाम् ऊहायोग्ये सामाजिकहृदये रत्यादिस्थायिभावाः संस्काररूपेण वासनारूपेण वा बीजरूपाः स्थिताः भवन्ति। तादृशः एव सहृदयः सामाजिकः, तस्यैव रसास्वादयोग्यता भवति। तादृशाः एव सामाजिकाः चतुर्विधैः अभिनयैः विभावादीन् व्यभिचारिणः गृह्णन्ति। सामाजिकेषु विद्यमान विभावनादि व्यापारैः अतिसूक्ष्मतया विद्यमानाः रत्यादयः आस्वादयोग्याः क्रियन्ते।

अनुभावनेन ते स्थायिनः अनुभवयोग्याः क्रियन्ते। यद्यपि एते विभावादयः क्वचित् कदाचित् सम्भाविता भवन्ति। परं सामाजिकः सहृदयः भवतीति भावनाबलेन व्यक्तिविशेषदेशकालादीन् विस्मृत्य केवल नायिका नायकरूपेणैव विभावादीन् पश्यति। न तु शकुन्तला दुष्यन्तादिरूपेण। तेन सहृदयः सङ्कुचितव्यक्तित्वं विस्मरति। एते च विभावादयः मदीयाः शत्रोः उदासीनस्य वा, न मदीयाः न शत्रोः न उदासीनस्य इत्यादि विस्मरति। एवं च विभावादीन् साधारणरूपेणैव पश्यति। इदमेव साधारणीकरणम्। रत्यादीनपि साधारणरूपेणैव पश्यति। एते च रत्यादयः विभावादिना व्यक्ताः भवन्ति।

साधारणीकरणेन रत्यादिदर्शनसमये विभावादिज्ञानं विना न किमपि भासते सहृदयस्य हृदये। तेन तस्य हृदये वासनारूपेण स्थिताः रत्यादयः उद्बुद्धाः भवन्ति। तानेव रत्यादीन् सामाजिकः आस्वादयति। एवं "रत्याद्यास्वादनमेव रसः", आस्वाद्यमानः रत्यादिः वा रसः इति अभिनवगुप्तस्य सिद्धान्तः।

Bibliography

१. रविशङ्कर नागरः, सम्पादकः, २००९, नाट्यशास्त्रम्,परिमला पब्लिकेषन्स, दिल्ली।

२. श्री हरिशङ्कर शर्मा, सम्पादकः,२०१६, काव्यप्रकाशः, चौखम्भा प्रकाशन, वाराणसी।

Author's Detail

Name : Dr. V. Suryaprabha
Designation : Guest faculty
Address : Dept of Sahitya,
National Sanskrit University,
Tirupati – 517 507.
Email ID : vissavajjulasuryaprabha@gmail.com

****

“वाणी भूषण” ग्रंथ के आधार पर संस्कृत छन्दों का पाश्चात्त्य छंदश्शास्त्र पर प्रभाव


Gadhavi Anand Maheshbhai

शोधसार:

8. शर्मा, देवीदत्त.(1990). भाषिकी और संस्कृत भाषा. चण्डीगढ़: हरियाणा साहित्य अकादमी.
9. शर्मा, रामशरण.(1999).भारत में आर्यों का आगमन. दिल्ली:हिन्दी माध्यम कार्यान्वय कार्यालय, दिल्ली विश्वविद्यालय.
10. पाण्ड्या, हरिशंकर.(2006).पाणिनीयं व्याकरणम्.दिल्ली:शिवालिक प्रकाशन.
11. शर्मा, डी० डी०.(2010).संस्कृत भाषा की संरचना.वाराणसी:चौखम्भा विद्याभवन.
12. व्यास, भोलाशंकर. (2013).संस्कृतका भाषाशास्त्रीय अध्ययन.वाराणसी:विश्वविद्यालय प्रकाशन.
13. शुक्ल, बलराम. (2018). निःशब्द नूपुर (रूमी की १०० ग़ज़लें). दिल्ली: राजकमल प्रकाशन.
14. Ghosh, Batakrishna. (1937).Linguistic Introduction to Sanskrit.Calcutta:The Indian Research Institute.
15. Barrow, T. (1965). The Sanskrit Language. Varanasi: Chaukhambha Vidyabhawan.
16. Mo'in, Dr. Mohammad. (1978). A Persian Dictionary. Tehran:Amir Kabir publishing corporation.
17. Misra, S. S. (1979). The Avestan (A Historical Comparative Grammar). Varanasi: Chaukhambha Orientaliya.
18. Dixit, Pushpa. (2004).Aṣṭādhyāyī Sahajabodha (vol.4).Chattisagarh:Pāṇinīya śodha Sansthān, Bilaspur.
19. Jackson, A.V. Williams, Ed. by Hassan Rezai Baghbidi.(2004). An Avesta Grammar In Comparison with Sanskrit.Tehran: Asatir.
20. Steingass, F.(2008). A Comprehenshive Persian-English Dictionary.Delhi:Manohar Publication.
21. Windfuhr, Gernot. (2009). The Iranian Languages. London: Routledge UK.
22. Kumar, Dr. Rajender. (2013).Elementary Persian Grammar. Delhi: Great book contractor.Third edition.
23. Whitney, W. (2013).Language and the Study of Language.Cambridge: Cambridge University Press.
24. Baghbidi, Hassan Rezai.(2017).Middle Persian Historical Phonology.Osaka: Osaka University, Graduate School of Language and Culture.

Author's Detail

Name : Mohit Kumar Mishra
Designaion : Ph. D. Scholar
Address : Dept. of Sanskrit, Delhi University
2945/ 73, बी – ब्लाक, संतनगर, बुराड़ी, दिल्ली – 110084
Email : mmmishra1457@gmail.com

****

संस्कृतरूपकेषु प्रतिफलिता राजनीतेः अवधारणा

Vaskar Chatterjee

शोधसारः

कस्यचित् राष्ट्रस्य सामग्रिकस्थितिम् अधिगन्तुम् आदौ तस्य राजनैतिकं वातावरणम् अन्वेषणीयं भवति। यत्र प्रशासकः दुर्बलः, राष्ट्रनीतिश्च दुर्बला तत्र न कथञ्चिदपि उन्नतिः भवेत्। इयञ्च नीतिः प्राचीनकालादेव युगोपयोगिपरिवर्तनद्वारेण आधुनिककाले समायाति। पुरातनेभ्यः एव शिक्षां स्वीकुर्वन्ति नवीनाः। अतः अद्यतनीयराष्ट्रनीतेः समुन्नयनाय प्रयोजनं भवति प्राचीनायाः राष्ट्रनीतेः तद्देशीयनृपादीनाञ्च चरितानुशीलनम्। कथं तत् ज्ञातुं प्रभवामः इति चेत् प्राचीनकाले विरचिताः ग्रन्थाः एव तत्र सहायकाः भवन्ति। वेदादारभ्य आधुनिकसाहित्यं यावत् सर्वत्रैव वर्णितमस्ति नृपाणां चारित्रिकं वैशिष्ट्यं, राज्यपरिचालनपद्धतिः, तस्याः साफल्यं वैफल्यादिकञ्च। अत्र प्रबन्धेऽस्मिन् मया केवलं रूपकेषु आलोचिता राष्ट्रनीतिः वर्णिता अस्ति। महाकवयः स्वस्वकाव्येषु सुनिपुनतया एतत् सर्वम् आलोचितवन्तः।

कुञ्चीशब्दाः – राष्ट्रम्, राजनीतिः, वेदे राजनीतिः, रूपकेषु राजनीतिः, अद्यत्वे प्रभावः।

****

संस्कृतसाहित्ये राजनीतेः आलोचनायाः कश्चन सुप्राचीनः इतिहासः वर्तते। भारतीयसंस्कृतेः धारकं खलु वेदशास्त्रम्। अतः वेदे सर्वविधविषयस्य किञ्चित् किञ्चित् वर्णनं समुपलभ्यते एव। तस्यैव सुविस्तृतं पर्यालोचनं शास्त्रान्तरेष्वपि दृश्यते। राष्ट्रनीतेः या व्यवस्था प्रचलिता आसीत् देशे तस्यापि आकरः ग्रन्थः वेदः एव। किं तावत् राष्ट्रम्, कथं राज्यपरिचालनं कुर्यात्, नृपादिनां कीदृशी योग्यता अपेक्षिता अस्ति इत्यादि विषये तत्र स्पष्टतया उल्लेखो वर्तते। राष्ट्रशब्दस्य साक्षात् प्रयोगोऽपि दृश्यते ऋग्वेदे यथा – “राष्ट्रं क्षत्रियस्य” (४.४२.१), “राजा राष्ट्राणाम्” (७.३४.११), “राष्ट्रं गुपितं जत्रियस्य” (ऋग्- १०.१०९.३) इत्यादयः। यजुर्वेदे एकत्र तु राष्ट्रशब्दः बहुवचनेऽपि प्रयुक्तः अस्ति, यस्मात् तदा वहूनां राष्ट्राणामस्तित्वविषये जल्पन्ति विद्वांसः। तय्यथा, त्वं राष्ट्राणि रक्षसि - इति (अथर्ववेदः- १९.३०.३)। एवं यत्र राष्ट्रमस्ति तत्र तन्नियामकी राष्ट्रनीतिरपि नूनं स्यात्। वेदवर्णिता इयमेव राजनीतिः परवर्तिभिः शासकैः सादरेण गृह्यते स्म। किञ्च पुराणेषु वर्णिताः नृपाः क्षिप्त-विक्षिप्त-सगर-ययाति-भगीरथ-कृष्णप्रमुखाः वेदेभ्यः एव राजनीतेः शिक्षां गृहीतवन्तः इति तत्र तत्र शास्त्रेषु वर्णितो अस्ति। अतः निश्चयमेव वेदेषु राष्ट्रनीतिविषये प्रमुखाः चर्चाः विहिताः वर्तन्त इति वक्तुमलम्। एवं क्रमशः वेदादारभ्यः स्मृतिपुराणादिक्रमेण काव्यादिष्वपि राजनीतेः प्रतिफलनं समधिगम्यते सुतराम्।

मनुसंहिता, अर्थशास्त्रम्, याज्ञवल्क्यसंहिता अन्यानि च स्मृतिशास्त्राणि राष्ट्रनीतेः चरमम् औत्कर्षं प्रतिपादयन्ति।

दृश्यकाव्येषु सर्वोत्कृष्टं खलु रूपकम्। रूपकरचनायाः यः खलु इतिहासः समुपलब्धः तत्र भासकालिदासप्रभृतिक्रमेण भवभूतिपर्यन्तं ये प्राचीनाः दृश्यकाव्यप्रणेतारः आसन् तेषां सर्वेषामेव रूपकेषु तत्कालीनसमाजस्य यथायथं स्वरूपमेकं समधिगम्यते। नृपाधीने राष्ट्रे कथं समाजव्यवस्था आसीत्, कथं नृपाः राज्यं अशासुः, प्राजानां दशा कीदृशी आसीत् इत्यादिविषयाणां सम्यक् पर्यालोचनायां तदानीन्तनराष्ट्रनीतेः एकं स्वच्छं स्वरूपं सम्प्राप्यते।

नाट्यकारेषु भासः खलु सर्वप्राचीनत्वेन परिगण्यते। तद्विरचितेषु रूपकेषु प्रमुखं भजते रामायणाश्रितं प्रतिमानाटकम्। तत्र परमधार्मिकः प्रजापरायणः राष्ट्रनेता रामचन्द्रः खलु नायकः। प्रतिमानाटके एकत्र रामः कथयति –

राजा किलास्मि भुवि सत्कृतभारवहो।
धर्मेण लोकपरिरक्षणमभ्युपेतम्॥

अनेन वस्तुतः राज्ञः प्रजापालनरूपं यत् प्रधानं कर्तव्यं तत्र रामचन्द्रस्य स्वाभाविकी प्रवृत्तिः समुद्घोषिता। ननु प्रजापालनात् परं नास्ति अन्यः कश्चन महान् धर्मः नृपस्य। रामचन्द्रः वंशानुक्रमेण अस्मिन् विषये अभिज्ञः सञ्जातः। रघुवंशस्य सर्वेषामेव नृपानाम् अयमेव धर्मः अस्ति। तथाहि सिंहासनं सम्प्राप्यैव राजधर्मरक्षणे तस्य औत्सुक्यं दृश्यते।

तस्यैव महावीरचरिताख्यनाटके रामचन्द्रस्य चरितकथनावसरे जनकेन यदुक्तं तत्तु निखिलनृपजातिनां चारित्रिकवैशिष्टस्य एकः मानदण्डः भवितुमर्हति –

अपाकृतानि च गुणैश्च निरन्तराणि
लोकोत्तराणि च फलैश्च महोदयानि।
वीरस्य यस्य महतश्चरिताद्भुतानि
नास्माकमेव जगतामपि मङ्गलानि[1]॥ इति।

कालिदासविरचिते अभिज्ञानशाकुन्तलेऽपि राज्ञः दुष्यन्तस्य आश्रमस्थान् तपस्विजनान् निर्विघ्नेन यागादिकार्ये प्रवर्तयितुं सर्वदा प्रयत्नः दृश्यते। वन्यपशुभ्यः तान् रक्षयितुं वारं वारं तीरनिक्षेपात् तस्य हस्ते क्षतचिह्नः सञ्जातः। एवं सुनिपुनतया तेन राजधर्मः परिपालितः। उक्तञ्च तथाहि –

[1] महावीरचरितम् – ४.१२

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रिया समवलोक्य।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क[1]॥ इति॥

मनुनाऽपि उक्तं खलु - क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्। वस्तुतः विपदि प्रजानां रक्षनार्थमेव जगदीश्वरः राजानमसृजत्। अतः नृपाणाम् अवश्यमिदं कर्तव्यं भवति। उक्तं खलु –

अराजके हि लोकेऽस्मिन् सर्वतः विद्रुते भयात्।
रक्षार्थम् अस्य सर्वस्य राजानमसृजत् प्रभुः[2]॥

राजकार्ये नियुक्तानां जनानां मनागपि अवकाशो नास्ति। सर्वदा ते व्यपृताः सन्ति स्वधर्मपरिपालने। तथाह्युक्तं काञ्चुकिना अभिज्ञानशकुन्तले – 'अथवाऽविश्रामोऽयं लोकतंत्राधिकारः'। कथमिति चेत् तेनैव व्याख्यातम् – यथा सूर्यः स्वरथे सकृद् अश्वयोजनं कृत्वा अनन्तकालं प्रचलति, गन्धवहः रात्रिन्दिवं प्रयाति, शेषः सदैव भूमिभारं सहते, तथैव राज्ञः अपि सर्वदाप्रजापालनमेव धर्मः। नास्ति ततः कापि विरतिः।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः[3]॥ इति।

दुष्यन्तस्य चरित्रालोचनेन सम्यगेवावलोक्यते यत् सः तु स्वयमेव धर्मस्वरूपः एव आसीत्। तथाहि यदा तेन मुनयः पृष्टाः – 'अपि निर्विघ्नतपसो मुनयः'। तदा ते समस्वरेणैव उक्तवन्तः –

'कुतः धर्मक्रियाविघ्नाः सतां रक्षितरि त्वयि
तमस्तपति घर्मांशौ कथमाविर्भविष्यति'[4]॥ इति।

स्पष्टमत्र प्रतीयते यत् सज्जनानां रक्षकत्वेन दुष्यन्तस्य अवस्थानकाले न कथञ्चिदपि तेषां कापि समस्या भवति स्म। एवं सम्पूर्णेऽस्मिन् रूपके दुष्यन्तस्य परमक्षत्रियधर्मस्य यथायथं परिपालनं समुपवर्णितं दृश्यते। तथाहि द्वितीयाङ्के राजमातुः आदेशपालनादपि राक्षसेभ्यः तपोवनरक्षणम् अधीकं गुरुत्वपूर्णमिति विचारयता तेन स्वराज्यं न प्रत्यावृतम्। स्वप्रियया सह मधुरालापनकालेऽपि हस्तीप्रवेशात् आश्रमस्य शान्तिविघ्नो भवेदिति

---

[1] अभिज्ञानशकुन्तलम्- १.१३

[2] मनुसंहिता – ७.३

[3] अभिज्ञानशकुन्तलम् – ५.४

[4] अभिज्ञानशकुन्तलम् – ५.१४

मनीषया द्रुतं सः हस्तीविताडनार्थं गतवान्। एवं बहुत्र रूपके उदाहरणद्वारेण सर्वशास्त्रोक्तस्य प्रकृष्टकर्मणः राजधर्मस्यैव परिपालनं समवलोक्यते।

अनुपस्थिते राजनि राज्यस्य भारवहनं नितरां क्लेशाय भवति मन्त्रिणां कृते। राज्यपालनस्य एतादृशी क्षमता नृपेषु एव केवलं प्रदत्ता भगवता। अतः तेषाम् असामर्थ्ये अन्ये न शक्नुवन्ति तादृशं कार्यनिर्वहणम्। भासस्य स्वप्नवासवदत्तमे एतादृशी काचित् स्थितिः आगता। यत्र दृश्यते यत् वासवदत्तायाः अग्निदाहे मृत्यौ उदयनस्य महान् शोकः सञ्जातः। अतः तस्य रक्षणस्य भारः रुमन्वानस्य उपरि न्यस्तः अस्ति। एकतः तु नृपस्य रक्षणम् अन्यत्र तस्य कर्मणः अपि परिपालनम् इति उभयमेवासीत् रुमन्वानस्य हस्तोपरि न्यस्तम्। तर्हि तस्योपरि अयं भारः कियान् क्लेशकरः इति निगदता यौगन्धरायणेन उक्तम् -

सविश्रामो ह्ययं भारः प्रसक्तस्य तु श्रमः
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः[1]॥ इति।

अविमारके अप्युक्तं – 'अहो महद्भारो राज्यं नाम'। भवभूतिप्रणीते उत्तररामचरिते अपि मर्यदापुरुषोत्तमरामचन्द्रस्य चरित्रावलोकनेन सम्यगेव प्रतीयते यत् प्रजापालनात्परं अन्यत्किमपि प्रकृष्टं भवितुं नार्हति इति तु साक्षादेव प्रतीयते। अन्यान्यपि स्मृतिशास्त्रप्रतिपादितानि राज्ञः चारित्रिकवैशिष्ट्यानि रामचन्द्रे सम्यगेव युज्यन्ते। तथाहि प्रजानुरञ्जनाय स्नेहं दयां सौख्यं तथा स्वपत्नीं जानकीमपि परित्यक्तुं तस्य व्यथा भवति। उच्यते च –

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा'[2]॥

अत्रैव विधृतमस्ति महत् यशः। मुनिना अष्टावक्रेणापि तदेव उपदिष्टं दृश्यते –

युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत् परमं धनं वः[3]॥ इति।

नृपाणां चरित्रं साधारणैः न अनुधावनयोग्यमिति प्रतिपादयन्त्या वासन्त्या प्रोक्तं तथाहि -

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति[4]॥ इति।

[1] स्वप्नवासवदत्तम् – १.१५

[2] उत्तररामचरितम् – १.१२

[3] उत्तररामचरितम् – १.११

[4] उत्तररामचरितम् - २.७

राजधर्मपालने सततः तत्परनृपसविधे राज्यं वस्तुतः एव क्लेशाय इति कथयता विशाखदत्तः कथयति मुद्राराक्षसे –

'परार्थानुष्ठाने हरयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः।
परार्थश्चेत् स्वार्थादभिमततरो हन्त परवान्
परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः'[1]॥

अर्थात् प्रजानां हितसाधयितुं प्रवृत्तः नृपः सदैव स्वकीयं हितं विसर्जयति, किञ्च यः खलु इदं कर्तुं नार्हति सः नृपः एव भवितुं न योग्यः। एवं हि सदैव परहितचिन्तने प्रवृत्तस्य स्वतन्त्रता कुत्रास्ति, पराधीनस्य कुत्र वा सुखम्। एवं रीत्या अत्र राज्ञः कर्तव्यपरायणताविषये साधु कथितम्।

ये खलु नृपाः न्यायमार्गावलम्बिनः पशुपक्षिणः अपि तेषां सहायभूताः भवन्ति, अन्येषां अन्यायाचरणकारिणां तु सहदराः अपि विमुञ्चन्ति। उक्तञ्च अनर्घराघवे –

'यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपिसहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति'[2]॥ इति।

अन्यायकारिणः नृपस्य नलस्य कीदृशी अवस्था जाता तस्य वर्णनं तु अस्माभिः अवलोकितमेव नैषधचरिते। यत्र नलद्वारा हंसस्य ग्रहणेन सर्वे पक्षिणः मिलित्वा मर्यदालङ्घनकारिणः नृपस्य राज्यं वसवासयोग्यमेव न भवतीति उद्घोषितवन्तः –

'न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः।
इति प्रहाय क्षितिमाश्रिता नभः खगस्तमाचुक्रुशुरारवैः खलु'[3]॥ इति।

राजकार्यपरिचालने यद्यपि मन्त्रिणामपि योगदानं भृशमपेक्षितं भवति, यतो हि राजा एकाकी बृहतः कस्यचित् राज्यस्य सर्वविधक्षेत्रम् अवेक्षितुं नार्हति। परं कथञ्चिदपि सः सर्वथा कर्मरोहितः सन् पूर्णतया मन्त्रिषु निर्भरशीलो न भवेत्। द्वयोरेव समयोग्यतायां भवति राज्यस्य समुन्नतिः। अर्थात् राजलक्ष्मी राजशक्ति-मन्त्रिशक्त्योः समरूपेण निर्भरशीला। एकस्यां दुर्बलायां सत्यां तां परित्यजति लक्ष्मी, यद्धि राष्ट्रस्य विनाशं निश्चयति। तथाहि राक्षसः निगदति मुद्राराक्षसे –

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः।

---

[1] मुद्राराक्षसम् – ३.४

[2] अनर्घराघवम् – १.४

[3] नैषधचरितम् – १.१२८

सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति[1]॥ इति।

मन्त्रिजनेषु नृपाणां प्राधान्यं प्रतिपादयता राक्षसेन यदुक्तं तदपि नूनं महत्वपूर्णं भजते। कदाचित् मन्त्रिणां विचक्षणता राज्ञः अपि अधीकं दृश्यते, ते यदि सुयोग्यराज्ञा सह तिष्ठन्ति स्वविचारान् अनायासेनैव प्रकटयितुं प्रभवन्ति तर्हि उभययोरेव उन्नतिः भवति। किं बहुना सुपात्रस्य पुरुषार्थिनः राज्ञः सविधे यदि मुर्खः अपि मन्त्रिः कश्चित् तिष्ठति सोऽपि कीर्तिमर्जयति, परं नीतिशास्त्रविशारदः अपि अयोग्ये नृपाश्रये नदीतीरस्थवृक्षवत् निपतति ध्रुवम्। तथा हि –

‘द्रव्यं जिगीषुमधिगम्य जडात्मनोऽपि
नेतुर्यशस्विनि पदे नियता प्रतिष्ठा।
अद्रव्यमेत्य तु विशुद्धनयोऽपि मन्त्री
शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या’[2]॥

कीदृशी योग्यता भृत्येषु अवश्यं स्यादिति वर्णयता कथयति चानक्यः मुद्राराक्षसे –

‘अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनां फलम्।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भुतये
ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च’[3]॥

अर्थात् राज्ये अप्राज्ञस्य कातरस्य अथ च भक्तियुक्तस्य भृत्यस्य कापि अपेक्षा नास्ति। एवं भक्तिहीनस्य प्रज्ञाविक्रमशालिनः अपि तथैव स्थितिः। परं ये खलु प्रज्ञावन्तः, विक्रमशालिनः अपि च भक्तिमन्तः ते एव राजभृत्यभवनाय सुयोग्याः।

स्वप्नवासवदत्ते यौगन्धरायनस्य गुणविषये राज्ञा उदयनेन यदुक्तं तेन मन्त्रिणां योग्यता, नृपस्योपरि तेषां दायबद्धता च स्पष्टं प्रतीयते –

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः[4]॥

---

[1] मुद्राराक्षसम् – ४.१३

[2] मुद्राराक्षसम् – ७.१४

[3] मुद्राराक्षसम्- १.१५

[4] स्वप्नवासवदत्तम् – ६.१८

राज्ञः वचनस्य मनागपि अवमाननं प्रजाः न प्रभवन्ति स्म कर्तुम्। एतादृशः श्रद्धावन्तः भवन्ति स्म जनाः। तथाहि कञ्चुकिना उक्तम् –

'शान्तं पापं, शान्तं पापं। पृथिव्यामस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति'।

एवं प्रायशः सर्वेषु एव रूपकेषु तदानीन्तनराष्ट्रव्यवस्थायाः किञ्चित् सुस्पष्टं चित्रं वर्णितं दृष्यते। कुत्रचित् मुनयः गुरवः नृपं योग्यतादिविषये उपदेशमयच्छन्, कुत्रचित् तु वंशपरम्परायां सर्वे एव नृपाः सुयोग्याः एव अवर्तन्त। राजकार्ये नियुक्ताः सर्वेऽपि परम्परामनुसृत्य धर्मशास्त्रञ्चाधिगम्य अथवा ज्येष्ठानां चरितं परीलक्ष्य तदनुसारं स्वजीवनं राज्यञ्च परिचालयन्ति स्म। तथाहि कार्यनिपुनाः पुण्यश्लोकाः राष्टस्य गौरवशालिनः राजानः अत्र आविर्बभूवुः।

क्रमशः नृपाधीनराष्ट्रव्यवस्था अवलुप्ता जाता। तत्परिवर्तं गणतान्त्रिकव्यवस्था समायाता। अत्र जनानां निर्वाचनद्वारेणैव मन्त्रिणां नियोगो भवन्ति। नात्र वंशानुक्रमः अनुसृयते। देशस्य जनगणस्यैव प्राधान्यं वर्तते महत्। ते यथा नियोजयन्ति तथैव अर्हाः भवन्ति अपसारयितुम्। इदानीम् एवमेव व्यवस्था आविश्वं व्यापृता राजते। अतः अधुनातने समये विरचितेषु रूपकेषु कथं राज्यशासनं कर्तव्यमित्यादि उपदेशदानादिव्यवस्था अपि नास्ति। नात्र केनचित् उपदेशवचनं समादृयते। समाजः सर्वथा परिवर्तितः। विद्धस्तः मानविकमूल्यबोधः। एवम्विधस्य अवक्षयस्य साक्षिणः सर्वे एव वयम्। कदाचित् अवश्यं सुयोग्यस्य प्रशासकस्य आगमनेन पुनरपि राष्ट्रं कलुषमुक्तं भवेदिति आशासे।

Bibliography

1. वन्दोपाध्यायः, ड. उदयचन्द्र & वन्दोपाध्यायः, ड.अनीता (२०१८), मुद्राराक्षसम्, कोलकाता, संस्कृत-बुक-डिपो।

2. चक्रोवर्ती, श्रीसत्यनारायण (१९९८), अभिज्ञानशकुन्तलम्, कोलकाता, संस्कृत-पुस्तक-भाण्डारम्।

3. वन्दोपाध्यायः, शान्ति (१४११ वङ्गाब्दः), स्वप्नवासवदत्तम्, कोलकाता, संस्कृतपुस्तकभाण्डारम्।

4. वन्दोपाध्यायः, ड. उदयचन्द्र & वन्दोपाध्यायः, ड. अनीता (२०१९), मृच्छकटिकम्, कोलकाता, संस्कृत-बुक-डिपो।

5. वन्दोपाध्यायः,अशोककुमार (२०१४), रत्नावली, कोलकाता, सदेशः।

Author's Detail

Name : Vaskar Chatterjee
Designation : Research Scholar
Address : Central Sanskrit University, Bhopal campus
Village, Post – Ichapur, Dist- Paschim Bardhaman, PIN- 713363
Email : vaskarchatterjee007@gmail.com

****

सवर्णव्यवस्थायां ज्ञापकानामावश्यकता

Pallabi Malik

शोधसारः

वर्णेषु परस्परभिन्नत्वेऽपि पाणिनीयव्याकरणे लाघवार्थं तेषां परस्परं सवर्णसंज्ञा विधीयते। तुल्यास्यप्रयत्नं सवर्णम् (अष्टाध्यायी, अ. १/१/९) इति सूत्रे "तुल ऊन्माने" इत्यतः तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् (अ. २/३/७२) इत्यत्र "तुला" इति निर्देशाद् षिद्भिदादिभ्योऽङ् (अ. ३/३/१०४) इत्यनेन भिदादिकल्पनात् निपातनाद्वाङि गुणाभावाद्वा तुलेति। तुलाशब्दात् तुलया सम्मितम् इत्यर्थे नौवयोधर्मविषमूलमूलसीता-तुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु (अ. ४/४/९१) इत्यनेन यत्प्रत्यये तुल्यशब्दः सदृशे रूढः। तस्माद् प्रवीणः कुशलः प्रतिलोमः अनुलोम इत्यादिवत् तुल्यशब्देऽपि अवयवार्थाभावः। तेन तुल्यशब्दः रूढ्यर्थे सदृशपर्यायः, न तु तुलया सम्मितार्थः। तुलया द्रव्यान्तरं परिच्छिन्नवत् तुल्येनापि सादृश्येन परिच्छिन्नत्वात् उभययोः सादृश्यमस्ति। तथापि प्रयत्नस्य तुलया सम्मितत्वमसम्भावात् लौकिकार्थः न गृह्यते। "तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्"[1]- इत्यनेन चन्द्रवन्मुखम् इत्यादौ चन्द्रगतधर्माणां मुखे वृत्तित्वासम्भवात् चन्द्रमुखौ परस्परौ भिन्नौ। परन्तु तयोः आह्लादजनकत्वधर्मवत्त्वात् अर्थतः सादृश्यः प्रतीयते। एवम् अकारादिनां वास्तविकमभेदेऽपि उच्चारणकालादि भेदः अस्ति। परन्तु सवर्णसंज्ञायां वर्णानां कस्मिन्धर्मे सादृश्यमावश्यकम् कस्मिन्नगणनीयम्, सर्वत्रैव तादृशमेव गणनीयं न वा, कैः वर्णाः गृहीताः इत्यस्मिन् विषये पाणिनीयव्याकरणे किमपि पृथग्विधिर्नास्ति। परन्तु सूत्रे व्यवहारेण ज्ञापकेन वा तल्लभ्यते। वर्णानां परस्परं सवर्णनिर्धारणे ज्ञापकाः आवश्यकाः।

कुञ्चीशब्दाः - सवर्णम्, आस्यम्, तपरकरणम्, ज्ञापकम्, तुल्यः, उच्चारणस्थानम्, प्रयत्नः।

****

"असु क्षेपणे" इत्यतः अस्यन्ति क्षिप्यन्ति अनेन वर्णान् इति व्युत्पत्या **कृत्यल्युटो बहुलम्** (अ. ३/३/११३) इत्यनेन करणे ण्यति आस्यशब्दः निष्पन्नः। अत्र आस्यशब्देन लोकप्रसिद्धं ओष्ठात्प्रभृति प्राक्काकलकं पर्यन्तं बोध्यम्। ग्रीवायामुन्नतप्रदेशस्य नाम काकलकम्। आस्यशब्देन लौकिकमुखार्थग्रहणे कचटतपानामपि सवर्णसंज्ञा स्यात् तुल्यस्थानप्रयत्नत्वात्। सर्वेषामेव मुखादुच्चारितत्वात् आस्यग्रहणमनर्थकं स्यात्। तेन "आस्ये भवम्" इत्यर्थे तद्धितान्तो आस्यशब्दं ग्रहणीयम्। **शरीरावयवाद्यत्** (अ. ५/१/६) इति यति कृते आस्य यत् इत्यत्र **यस्येति च** (अ. ६/४/१४८) इत्यनेन अकारलोपे आस् य् य इति स्थिते **हलो यमां यमि लोपो** (अ. ८/४/६४) इत्यनेन यलोपे आस्यमिति उपपन्नम्। तेन मुखान्तर्वर्तिनां ताल्वादीनां बोधकम्[2]।

---

[1] तुल्यास्यप्रयत्नं सवर्णम् (अ. १/१/९) सूत्रस्य लक्ष्मीटीका।

[2] "आस्यं मुखम्, तत्साम्यस्य सर्ववर्णेष्वविशिष्टत्वादव्यावर्तकत्वादास्यशब्दोऽत्र न मुखमात्रपरः, किन्तु आस्ये मुखे भवमास्यं ताल्वादिस्थानम्" - तुल्यास्यप्रयत्नं सवर्णम् (अ. १/१/९) सूत्रस्य बालमनोरमा।

न तु आस्यभवत्वात् निष्ठीवनादेः ग्रहणम् वर्णोच्चारणोपयोगित्वाभावात्। क-च-ट-तपानाम् स्पृष्टप्रयत्नसाम्येऽपि भिन्नस्थानानां सवर्णसंज्ञा वारणार्थमत्र आस्यग्रहणम्। अन्यथा तर्प्ता इत्यत्र **झरो झरि सवर्णे** (अ॰ ८/२/२६) इत्यनेन लोपापत्तिः स्यात्।

आस्यञ्च प्रयत्नश्च आस्यप्रयत्नौ, तौ तुल्यौ यस्य तत् तुल्याल्यप्रयत्नम् इत्यनेन द्वन्द्वगर्भो बहुव्रीहिः अस्ति। अत्र ताल्वादिना स्थानेन प्रयत्नो विशेषिताभावात् ककारङकारयोः मिथः सवर्णसंज्ञा न स्यात्। तयोः वाह्यप्रयत्नस्यासाम्यत्वात्। यदि अत्र बाह्यस्य भेदेऽपि स्पृष्टताख्यः आभ्यन्तरप्रयत्नस्तुल्यत्वात् सवर्णसंज्ञा भवति, तथा शकारचकारयोरपि आभ्यन्तरप्रयत्नभेदेऽपि विवारादिबाह्यप्रयत्नस्तुल्यस्त्वात् सवर्णसंज्ञा प्रसज्येत। ततश्च अरुशच्योततीति वक्ष्यमाणं प्रत्युदाहरणं नोपपद्यते। तेन त्रिपदवहुव्रीहिरेव करणीयमिति काशिकाकारमतम्[1]। तुल्य आस्ये प्रयत्नो यस्य तुल्यास्यप्रयत्नम् इति त्रिपदबहुव्रीहौ ताल्वादिस्थानेन प्रयत्नो विशेषितत्वात् बाह्यं प्रयत्नमुत्सृज्याभ्यन्तर एव स्पृष्टतादिगृह्यते। तेन वाह्यप्रयत्नभेदेऽपि आभ्यन्तरप्रयत्नस्य ग्रहणात् ककारङकारयोः सवर्णसंज्ञा सिद्ध्यति। चकारशकारयोरपि सवर्णसंज्ञा न प्रसज्यते, बाह्यप्रयत्नस्यात्राग्रहणात्। तस्मात् त्रिपद एव बहुव्रीहिराश्रयितुं युक्तम्, न तु द्वन्द्वगर्भ इति न्यासकारमतम्। **तुल्यास्यप्रयत्नं सवर्णम्** (अ॰ १/१/९) इति सूत्रेण वर्णयोः ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च तुल्ये तौ परस्परौ सवर्णसंज्ञौ स्तः। अत्र ताल्वादि इत्यनेन तालुन आदिः कण्ठः एव ताल्वादिः, ताल्वादि यस्येति बहुव्रीहिणा मूर्द्धादिसंग्रहः। यथा ककारखकारयोः कण्ठस्थानसाम्यात् स्पृष्टप्रयत्नसाम्याच्च तयोः सवर्णसंज्ञा सिध्यति। सावर्ण्येन यथा दीर्घादिकार्यं सिद्धं तथैव एकेन वर्णोच्चारणेन तेषां भेदानामपि बोधे सर्वत्र लाघवेन इष्टसिद्धिर्जाता। परन्तु सवर्णसंज्ञायां यावत्स्थानप्रयत्नौ किञ्चित्स्थानप्रयत्नौ वा साम्यं ग्रहणीयमित्यस्मिन्विषये किमपि सूत्रं नास्ति। तेन इकारेकारयोः विवृतप्रयत्नसाम्येऽपि एकारस्य कण्ठस्थानाधिक्यात् परस्परं सवर्णं भवति न वा। तथा सवर्णसंज्ञायां वर्णजालस्य यत्किञ्चित्स्थानसाम्यम् उत यावत्स्थानसाम्यं गणनीयम् इति शङ्का जाता। यत्किञ्चित्स्थानसाम्यमीप्सितं चेत् भवत्येवेत्यत्र इकारादेकारे **अकः सवर्णे दीर्घः** (अ॰ ६/१/१०१) इत्यनेन सवर्णदीर्घापत्तिः। यतः इकारेकारयोः विवृतत्वात् तालुस्थानकत्वाच्च साम्यमस्ति। न च वर्णसमाम्नाये एकारस्य पृथक् पाठसामर्थ्यात् न सावर्ण्यमिति वाच्यम्। यतः अगादिप्रत्याहारे एकारस्याग्रहणार्थं तस्य पाठमावश्यकम्। तेन करोत्येवम् इत्यादावनिष्टनिवारणार्थं यत्किञ्चित्स्थानसाम्यं न ग्रहणीयम्। सवर्णसंज्ञायां यावत्स्थानसाम्ये गृहीते अत्र इकारस्य कण्ठस्थानाभावात् तयोः सवर्णसंज्ञा न प्रसज्यते। परन्तु यावत्स्थानसाम्यस्वीकारेऽपि ङकारस्य नासिकास्थानाधिक्यात् ककारङकारयोः सवर्णसंज्ञा-भावः। यतः वर्गानां पञ्चमवर्णाः

---

[1] "तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य काशिका।

स्वस्ववर्गीयताल्वादिस्थानसमुच्चायकाः। तेन ङकारः कण्ठनासिकोभय-स्थानजः। तेन "युजिर् योगे" इति धातोः **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च** (अ॰ ३/२/५९) इति किनि **कृत्तद्धितसमासाश्च** (अ॰ १/२/४६) इति प्रातिपदिकसंज्ञायां युज्शब्दः। सुविभक्तौ युज्स् इत्यस्य **युजेरसमासे** (अ॰७/१/७१) इत्यनेन नुमागमे **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (अ॰६/१/६८) इत्यनेन सलोपे **संयोगान्तस्य लोपः** (अ॰८/२/२३) इत्यनेन जलोपे युन् इति निष्पन्नः। **क्विन्प्रत्ययस्य कुः** (अ॰८/२/६२) इत्यनेन नकारस्यान्तरतम्यात् ङकारे सति युङ् इति सिद्धम्। ककारस्य नासिकास्थानाभावात् ककारङकारयोः कण्ठस्थानसाम्येऽपि सवर्णसंज्ञा न सम्भवति। तेन कु इति शब्देन ङकारस्य न ग्रहणम्। अतः यावदास्यभवतुल्यग्रहणे युङ्, प्राङ् इत्यादौ नुमो नकारस्य ङकारानापत्तिः स्यात्। अतः उभयत्रैव दोषः प्रसज्यते। अत्र समाधानार्थं पाणिनेः व्यवहारमेव प्रमाणम्। शङ्कायां **यजुष्येकेषाम्** (अ॰८/३/१०४), **तद्वानासाम्** (अ॰४/४/१२५) इत्यादौ प्रयोगमेव अस्मिन्विषये ज्ञापकम्[1]। अत्र किञ्चित्स्थानसाम्ये गृहीते इकारएकारयोः तालुस्थानसाम्यात् सवर्णदीर्घापत्तिः, अपि च वकारलकारयोः दन्तस्थानसाम्येन सावर्ण्ये **तोर्लि** (अ॰८/४/६०) इत्यनेन लकारेण वकारस्यापि ग्रहणात् तद्वानित्यत्र दकारस्य परसवर्णप्रसङ्गः[2]। तेन **यजुष्येकेषाम्** (अ॰८/३/१०४), **तद्वानासाम्** (अ॰४/४/१२५) इत्यादि प्रयोगाः अनुपपन्नाः। यावत्स्थानसाम्ये गृहीते एकारस्य कण्ठस्थानाधिक्यात् इकारेण सह सवर्णसंज्ञा न सिध्यति। वकारस्यापि ओष्ठस्थानाधिक्यात् वलयोश्च न सावर्ण्यम्। इकारादीनामेकारादिना सह सावर्ण्यवारणाय यावत्स्थानतुल्यत्वम् आवश्यकम्। अतः पाणिनिना निर्देशेनात्र ज्ञायते सवर्णसंज्ञायां यावत्स्थानसाम्यमेव गृहीतम्, न तु किञ्चित्स्थानसाम्यम्[3]। तस्मात् सूत्रे सवर्णदीर्घादेः प्रसङ्गः नास्ति। यावत्स्थानसाम्यपक्षे नासिकास्थानाधिक्येऽपि ककारस्य ङकारेण सह सवर्णमस्ति। यतः आस्यं प्रयत्नश्च साम्ये सवर्णसंज्ञा प्रयुज्यते। लौकिके ओष्ठात् प्राक्काकलकादास्यम्[4], तर्हि नासिका आस्यवहिर्भुतत्वात् तन्न सवर्णसंज्ञायां प्रयोजकम्। यद्यपि नासिका न वाह्यमिति न्यासकारादीनां मतम्[5]। मुखनासिका इति सूत्रभाष्य-

---

[1] "तद्वानासाम्''यजुष्येकेषाम्' इत्यादिनिर्देशा उपपन्नाः।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य बालमनोरमा।

[2] "तोर्लिति परसवर्णरहिततद्वानासामितिनिर्देशात् यावत्स्थानसाम्यमत्र विवक्षितमिति भावः" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य उद्योतः।

[3] "यजुष्येकेषाम्' (पा॰ सू. ८/३/१०४) इति निर्देशात् यावदास्यभवतुल्यत्वं ग्राह्यम्" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य लघुशब्देन्दुशेखरः।

[4] "काकलको नाम चुबुकस्याधस्ताद् ग्रीवायामुन्नतप्रदेशः" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य प्रदीपः।

[5] "आदिशब्देन नासिकादीनां ग्रहणम्। नासिकापि न बाह्या वर्णोत्पत्तिनिमित्तम्, किं तर्हि ? अन्तरास्ये चर्मविततमस्ति, पणवचर्मवत्, तत्संबद्धा रेखा नासिका, तस्यां वायुनाऽभिहतायां वर्णोत्पत्तिः" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य पदमञ्जरी।

प्रमाणात् तुल्यास्यसूत्रस्थास्यपदेन नासिकास्थानस्य न ग्रहणमिति ध्वनितम्। यतः भाष्ये अनुनासिकसंज्ञा-विधायकसूत्रे ङादीनां कियतो भागस्य कण्ठादिस्थानं कियतो भागस्य नासिकास्थानमिति स्वीकृतम्[1]। अपि च मुखनासिकयोर्मध्यगतं यत्स्थानं तदेव स्थानम् अनुनासिकम् इत्यपरः पक्षः[2]। पञ्चमवर्णाः मुखेन सह नासिकया उच्चार्यन्ते इति तृतीयपक्षः[3]। अत्र पक्षत्रयेऽपि नासिकाया मुखात् पृथगुपादानेन नासिकास्थानं आस्यभवस्थान-रूपेण न गृह्यते। अपि च "मुखवचनोऽनुनासिकः" इतीयत्युच्यमाने क-च-ट-त-पानामेव प्रसज्येत"[4] इति भाष्यवचनेन नासिका न आस्यभवस्थानानां गृह्यते इति स्पष्टमेव, अन्यथा नासिकास्थानानां यमानुस्वाराणामपि नासिकाया मुखग्रहणेन ग्रहणे सूत्रे नासिकाग्रहणं व्यर्थं स्यात्। तेन पञ्चमानां स्वस्ववर्ग्येण नासिकेतरयावदास्य भवतुल्यत्वात् सवर्णसंज्ञायां बाधकाभावः। ककारङकारयोः कण्ठस्थानसाम्यात् सावर्ण्यम्[5]। "प्रयत्नविशेषण-मास्योपादानम्" इत्यनेन आस्यभवप्रयत्नस्य आभ्यन्तरस्यैव ग्रहणं न वाह्यप्रयत्नस्य। ङादिपञ्चानां आनुनासिक-मिति अधिकगुणस्वीकारे[6] नासिकाया आस्यभवाग्रहणेन नासिकाभवप्रयत्नस्यापि च सूत्रस्थप्रयत्नग्रहणेनाग्रहणं सूचितम्। अतः आस्यभवशब्देन पाणिनिशिक्षोक्तस्थानानामेव ग्रहणम्, तत्र ङादिपञ्चानां नासिकास्थानं अनुक्तत्वात् नासिकास्थानसत्त्वेऽपि सवर्णसंज्ञायां न बाधकम्। परन्तु नासिकाया आस्यभवग्रहणेनाग्रहणे नासिकास्थानमात्रजन्येन[7] अनुस्वारेण सह अनुस्वारस्य यमेन सह यमस्य न सावर्णसंज्ञायां वाधा अस्ति[1]।

"न हि मुखाद् बहिर्वर्त्तिनी नासिकेयं विवक्षिता, तस्यां वर्णानामनिष्पत्तेः। का तर्हि? अन्तरास्ये चर्म विततमस्ति पणवचर्मवत्, तत्सम्बद्धा रेखा, यस्यां वायुनाभिहन्यमानायां वर्णा निष्पद्यन्ते सेह नासिका विवक्षिता।"- तुल्यास्यप्रयत्नं सवर्णम् (अ० १/१/९) सूत्रस्य न्यासः।

"नासिकाऽपि न बाह्या वर्णोत्पत्तिनिमित्तम्" - तुल्यास्यप्रयत्नं सवर्णम् (अ० १/१/९) सूत्रस्य प्रदीपः।

[1] "मुखनासिकं-आवचनमस्य सोऽयं मुखनासिकावचनः ॥ अथ किमिदं 'आवचनं' इति ? ईषद्वचनं-आवचनम्। किंचिन्मुखवचनं, किंचिन्नासिकावचनम्।" - मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य महाभाष्यम्।

"भागस्य मुखेनोच्चारणात् भागस्य नासिकया" - मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य प्रदीपः।

[2] "मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः॥" - मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य महाभाष्यम्।

"मुखस्य च नासिकायाश्चान्तरालं स्थानान्तरमेवानुनासिकस्य दर्शयति। तत्र सामीप्यान्मुखं च तन्नासिका चेत्युभाभ्यामन्तरालं व्यपदिश्यते।" - मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य प्रदीपः।

[3] "मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः ॥" - मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य महाभाष्यम्।

"तत्र नासिका मुखसाहचर्यान्मुखशब्देनोच्यते।"- मुखनासिकावचनोऽनुनासिकः (अ०१/१/८) सूत्रस्य प्रदीपः।

[4] मुखनासिकावचनोऽनुनासिकः (अ० १/१/८) सूत्रस्य महाभाष्यम्।

[5] "एवं च यावत्स्थानसाम्ये सवर्णसंज्ञा इति सिद्धान्ते नासिकारूपदेशभेदात्कङादीनामप्राप्तसावर्ण्यसिद्धये आस्येन देशविशेषणमावश्यकम्। नासिकाया आस्यान्तर्गतत्वेऽपि मुखनासिकेतिसूत्रे नासिकातिरिक्तावयवकमुखस्यैव ग्रहणेन तत्साहचर्यादत्राप्यास्यपदेन तादृशस्यैव ग्रहणं बोध्यम्। अन्यथाऽत्र स्थाने एतत्कथनवैयर्थ्यापत्तिः।" तुल्यास्यप्रयत्नं सवर्णम् (अ० १/१/९) उद्योतः।

[6] "यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यवर्ज्यम्। आनुनासिक्यमेषामधिको गुणः॥" तुल्यास्यप्रयत्नं सवर्णम् (अ० १/१/९) महाभाष्यम्।

[7] "अनुस्वारयमानाञ्च नासिकास्थानमिष्यते" – पाणिनीय शिक्षा, २२ श्लोकः।

प्रयत्नविशेषणास्य ग्रहणेन अनुनासिकयकारादीनां ञादिभिः सावर्ण्यं न भवति[2]। यद्यपि सर्ववर्णोच्चारणे कण्ठ-व्यापारोऽस्ति तथापि चकाराद्युच्चारणे तेन सह ताल्वादिव्यापारः आवश्यकः। तेन यावत्स्थानाभावात् ककारचकारयोः न सावर्ण्यम्, अन्यथा वर्णानां भिन्नं भिन्नमुच्चारणस्थानकथनं व्यर्थम् एव।

सूत्रे प्रयत्नग्रहणेन[3] यत्किञ्चित्प्रयत्नसाम्यम् उत यावत्यत्नसाम्यमभिप्रेतम् इत्यस्मिन्विषऽपि सन्देहा आगता। नागेशमते प्रयत्नशब्देन आभ्यन्तरप्रयत्नः विवक्षितः न बाह्यप्रयत्नः, अन्यथा यावदास्यभवत्वात् प्रयत्नस्यापि ग्रहणे पुनः प्रयत्नग्रहणं व्यर्थं स्यादिति[4]। आभ्यन्तरप्रयत्नं बोधनार्थमत्र प्रयत्नग्रहणं कृतम्। प्रकृष्टो यत्नः प्रारम्भो यत्नस्य वा प्रयत्नशब्देन बोध्यते। तेन प्रयत्न इत्यर्थेन वर्णोत्पत्त्यनन्तरभाविबाह्यप्रयत्ने तदभावात् वर्णाभिव्यक्त्यव्यवहितप्राक्कालभवरूपप्रकर्षस्य आभ्यन्तरे एव सत्त्वात्तस्यैव ग्रहणं बोध्यम्। तस्याग्रहणे वाक्श्चोतति इत्यत्रापि शकारचकारयोः तालुस्थानसाम्ये सवर्णसंज्ञा भवति। प्र इत्यनेन विवारश्वासाघोषाख्य-वाह्यप्रयत्न साम्येऽपि शकारस्य विवृतत्वात् चकारस्य स्पृष्टत्वाच्च आभ्यन्तरप्रयत्नभेदात् न परस्परं सावर्णम्। तस्मात् **झरो झरि सवर्णे** (अ॰ ८/२/३९) इत्येनेन न शकारस्य लोपः प्राप्तः। वर्ग्याणां स्पृष्टत्वादिप्रयत्नं समानं चेत् विवारादिवाह्यप्रयत्नभेदेऽपि सवर्णसंज्ञा भविष्यतीति **झरो झरि सवर्णे** (अ॰ ८/२/३९) इत्यत्र सवर्णग्रहणेन ज्ञापितम्। यथासंख्यनिरासार्थं हि तत्र सवर्णग्रहणं कृतम्। यदि च सर्वे समाने सति सवर्णसंज्ञा स्यात्तर्हि डकारढकारयोः यावत्प्रयत्नतौल्याभावाद् ढकारे परे डकारस्य सवर्णसंज्ञाभावे लोपाभावे च शिण्ढि इति रूपं न सिध्यति। तेन सूत्रे सवर्णग्रहणमनर्थकं स्यादिति भाष्यकारमतम्[5]। भेदे सति किंचित्समानेन यदि सवर्णसंज्ञा भविष्यति तर्हि शकारछकारयोः षकारठकारयोः सकारथकारयोः च सवर्णसंज्ञा प्राप्नोति। अत्र ताल्वादिस्थानसाम्ये विवारश्वासाघोषाख्यवाह्यप्रयत्नसाम्ये च सवर्णत्वे सति निश्शछद्म निष्ठुरं निस्स्थानं मधुलिड्वानमित्यत्र **झरो झरि सवर्णे** (अ॰ ८/२/३९) इत्येनेन लोपः प्राप्नोति। तस्मात् प्रयत्नशब्देन प्रारम्भो यत्नम् आवश्यकमिति भावः। यत्नानां मध्ये वर्णोत्पत्तेः पूर्वं यो व्यापारः तत् प्रारम्भो यत्नः एव आभ्यन्तरयत्नः[6]।

---

[1] "यमानुस्वाराणामपि प्राप्नोति ॥ नैव दोषो न प्रयोजनम् ॥" - मुखनासिकावचनोऽनुनासिकः (अ॰ १/१/८) सूत्रस्य महाभाष्यम्।

[2] "तत्फलं च तङ्कुङ्वे तन्नमतीत्यादौ अनुस्वारस्य ययीत्यनेन यकारलकारयोरनुनासिकयोरभाव इति वाच्यम्।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) उद्योतः।

[3] "यत्नो द्विधा। आभ्यन्तरो वाह्यश्च।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य सिद्धान्तकौमुदी।

[4] "अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादायसवर्णसञ्ज्ञेत्यर्थो झरो झरि सवर्णे (पा॰सू॰ ८/२/३९) इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य लघुशब्देन्दुशेखरः।

[5] "यदि हि यत्र सर्वं समानं तत्र स्यात्, सवर्णसंज्ञावचनमनर्थकं स्यात्" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य महाभाष्यम्।

[6] "शब्दप्रयोगेच्छयोत्पन्नयत्नान्नाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्धपर्यन्तं गत्वा ततः प्रतिनिवृत्तो यत्नविशेषसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषसहायेन परावृत्तिसमये गलविवरादीनां विकासादीन्करोति। तत्र ये

गलविवरविकासादिकार्यम् आस्यवहिर्भूतभागे कृतत्वाद्वाह्या[1]। आन्तरतमपरीक्षां विहाय सवर्णसंज्ञायां सर्वदा तेषामुपयोगः अनावश्यकः। यद्यपि सवर्णसंज्ञायां तुल्यमभिप्सितम् तथापि ज्ञापकेन उदात्तादियत्किञ्चित्प्रयत्न-भेदेऽपि यत्किञ्चित्प्रयत्नसाम्ये सवर्णसंज्ञा भवति। परन्तु यत्किञ्चित्स्थानैक्यादेकारौकारयोः सावर्णापत्तिः न स्यादिति फलितार्थः[2]। तेन आस्यभवमित्यनेन कण्ठादियावदुच्चारणस्थानसाम्यं प्रयत्नग्रहणेन यत्किञ्चिदाभ्यन्तर-यत्नं च येषां एतौ तुल्यौ ते परस्परं सवर्णसंज्ञं स्यात्।

न च उदात्तानुदात्तयोरूर्द्धभागाधोभागरूपभिन्नस्थानजन्यत्वेन अकारादिनां न सावर्णमिति वाच्यम्। ते वर्णानां गुणस्वरूपा[3]। शिक्षावचनमनुसारेण स्थानविभाजककण्ठत्वादिधर्माणामेव आस्यभवग्रहणेन ग्रहणात् उदात्तादिधर्माः सवर्णसंज्ञायामप्रयोजकाः। एवम् ह्रस्वदीर्घजनकयोरास्यभववायुसंयोगस्तुल्यत्वाभावेनापि सवर्णसंज्ञा प्रसज्यते। यतः ह्रस्वदीर्घादि सकलप्रयत्नतः साम्यता अत्र न विवक्षिता। स्थानप्रयत्नसाम्याभावात् रेफस्य शषसहानाञ्च न परस्परं सावर्ण्यम्[4]। तेन रेफस्य रेफ एव सवर्णः, शस्य श एव, एवमन्यत्रापि। नान्य एतेषां सवर्णः।

अतः स्थानकृतं प्रयत्नकृतं वैकं तुल्यत्वमादाय न सवर्णसंज्ञा, तथा सति **अकः सवर्णे दीर्घः** (अ॰ ६/१/१०१), **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** (अ॰ ६/१/१२७) इत्यादिषु सवर्णग्रहणवैयर्थ्यापत्तेः। यतः विवृतप्रयत्नसाम्यमादाय सर्वैस्वरैः समं सावर्ण्यादव्यावर्तकत्वात्। व्यर्थं कृत्वा ज्ञापयति सवर्णसंज्ञायामुभययोः आवश्यकतास्ति।

इदानीं प्रश्नम् उत्थाप्यते यत् सवर्णसंज्ञायाः प्रयोजनं किम्? अत्र उच्यते यत् एकेन वर्णोच्चारणेन अन्येषां ग्रहणेन लाघवेन कार्यसिद्धर्थमेव। परन्तु अत्रापि सन्देहा जाता यत् **अणुदित्सवर्णस्य चाप्रत्ययः** (अ॰ १/१/६९) इति ग्रहणकसूत्रे अण् इति पूर्वेण णकारेणायं प्रत्याहार उत परेणेति। यतः माहेश्वरसूत्रे

तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वात् 'आस्ये प्रयत्नाः' इत्युच्यन्ते, 'आभ्यन्तराः' इति 'प्रारम्भः' इति, च।"- तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य उद्योतः।

[1] "वाह्यप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य सिद्धान्तकौमुदी।

[2] "ज्ञापकात्प्रयत्नांशे यावत्प्रयत्नसमानत्वत्यागेऽपि स्थानांशे तत्त्यागे मानाभाव इत्याशयात्, यजुष्येकेषामित्यादिनिर्देशैः स्थानांशे यावत्स्थानतुल्यत्वविवक्षणाच्च ॥...तेन सावर्ण्यनियामकप्रयत्नयोः स्थानयोश्च परस्परभेदलाभेऽपि वर्णानां यत्किञ्चित्प्रयत्नभेदस्य ततोऽलाभात् स्थानानामन्ततस्तत्तत्कालरूपोपाधिभेदेन भेदो बोध्य।" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य उद्योतः।

[3] "अभेदका उदात्तादयः ॥"- तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) सूत्रस्य महाभाष्यम्।

"एवं चात्र प्रयत्नशब्देनोदात्तादीनां न ग्रहणमिति भावः" - तुल्यास्यप्रयत्नं सवर्णम् (अ॰ १/१/९) उद्योतः।

[4] "रेफोष्मणां सवर्णा न सन्ति ॥" - हयवरट् सूत्रस्य महाभाष्यम्।

णकारानुबन्धस्य पाठद्वयं दृश्यते अइउण् इत्यत्र लण् इत्यत्र च। तेन अण् इण् प्रत्याहारेषु सन्देहो भवति पूर्वेण णकारेण स्युः परेण वेति। शङ्कानिरसनार्थं वैयाकरणाः सूत्रेषु लिङ्गं ज्ञापकं वा आश्रितम्। **उपसर्गादृति धातौ** (अ॰ ६/१/८८) सूत्रे ऋतीति तपरकरणं ज्ञापकम्। दीर्घॠकारादेः धातोरभावात् सूत्रेऽस्मिन् ऋति पदस्य प्रयोजनं नास्ति। **वा सुप्यापिशले** (अ॰ ६/१/९२) इति उत्तरसूत्रे अनुवृत्त्यर्थम् उक्तम्[1]। तेन अवर्णान्तादुपसर्गाद् केवलं ह्रस्वऋकारादौ सुब्धातौ परे वृद्धिरेकादेशो वा स्यात्। प्र ऋषभीयति इत्यत्र विकल्पे वृद्धौ रपरत्वे प्रार्षभीयति प्रर्षभीयतीति रूपद्वयं सिद्धम्। परन्तु ऋतीति तपरकरणेन दीर्घॠकारादौ सुब्धातौ विकल्पो वृद्धिरादेशो न भवति[2]। तेन उप ॠकारीयति इत्यत्र वृद्ध्यभावात् गुणादेशे उपर्कारीयतीति रूपं भवति। ऋति इत्यत्र **तपरस्तत्कालस्य** (अ॰ १/१/६९) सूत्रेण तपरकरणात् तत्कालस्यैव ग्रहणम्, न तु भिन्नकालस्य। दीर्घॠकारादेः विकल्पं वृद्धिकार्यं बाधनार्थमत्र तपरकरणम्। यदि अण् पूर्वेण णकारेण गृह्यन्ते तर्हि प्रत्याहारे ऋकारस्याभावात् तेन न सवर्णानां ग्रहणम्। सवर्णस्य ग्रहणाभावे ऋकारस्य तपरकरणं व्यर्थम्[3]। व्यर्थं सद् ज्ञापयति अत्राण् परेण णकारेण बोद्धव्यम् ।

अपि च **ऋत उत्** (अ॰ ६/१/१११) इति सूत्रे तपरकरणमत्र ज्ञापकम्[4]। **ऋत उत्** (अ॰ ६/१/१११) सूत्रेण ह्रस्वऋकारस्य ङसिङसोः अकारस्य च स्थाने उकार एकादेशः स्यात्। तेन पितृ ङस् इत्यस्य अनुबन्धलोपे पितृ अस् इत्यत्र ऋकारअकारयोः उकारादेशे **उरण्-रपरः** (अ॰ १/१/५०) इत्यनेन रपरत्वे पितुर् स् इति जाते **रात्सस्य** (अ॰ ८/२/२४) इत्यनेन सकारस्य लोपे **खरवसानयोर्विसर्जनीयः** (अ॰ ८/३/१५) इत्यनेन रेफस्य विसर्गे पितुः इति रूपं सिद्धम्। परन्तु सूत्रे तपरकरणेन दीर्घॠकारस्य उकारादेशो निवृत्तः। तेन कॄ ङस् इत्यस्य अनुबन्धलोपे कॄ अस् इत्यत्र ॠकारस्य उकारादेशाभावे यणादेशे क्रस् इत्येवं भवति। अनन्तरं सकारस्य विसर्गादेशे क्रः इति रूपं सिद्धम्। अन्यथा दीर्घस्यापि उकारादेशे कुः इति अनिष्टं प्राप्तम्। अत्र यदि अण् पूर्वेण णकारेण गृह्यते तर्हि अण्प्रत्याहारे ऋकारस्याभावात् तेन सवर्णानां ग्रहणमसम्भवम्। तेनात्र तपरकरणं व्यर्थम्। तथापि तपरकरणेन ज्ञायते अण् इत्यत्र परेण णकारेण ग्रहणीयम्।

परन्तु उक्तसूत्रेषु तपरकरणं न ज्ञापकम् इति नागेशमतम्। ऋकारेण ऌकारग्रहणार्थमत्र तपरकरणम्। तेन गमऌ धातौ ङस् विभक्तौ अनुबन्धलोपे गमऌ-अस् इति जाते **ऋत उत्** (अ॰ ६/१/१११) इत्यनेन

---

[1] तपरकरणमुत्तरार्थम्। इह दीर्घर्कारादेर्धातोरसंभवेन व्यावर्त्यालाभात् – उपसर्गादृति धातौ (अ॰६/१/९१) इति सूत्रस्य तत्त्वबोधिनी।

[2] ऋतीति तपरकरणेन तत्कालस्यैव ग्रहणाद् दीर्घॠकारे परे वृद्धिविकल्पोऽयं न भवति – वा सुप्यापिशलेः (अ॰६/१/९२) सूत्रस्य बालमनोरमा।

[3] "यदि पूर्वेण स्यात्तर्हि तपरत्वमिहानर्थकं स्यात्, ऋकारस्यानणत्वेन सवर्णाग्राहकत्वात्" – अणुदित्सवर्णस्य चाप्रत्ययः (अ॰१/१/६९) इति सूत्रस्य तत्त्वबोधिनीटीका।

[4] "उपसर्गादृति' 'ऋत उत्' इत्यादौ तपरकरणाल्लिङ्गाच्च।"- अणुदित्सवर्णस्य चाप्रत्ययः (अ॰१/१/६९) सूत्रस्य तत्त्वबोधिनी।

ऌकारअकारयोः उकारादेशे लपरत्वे गमुल् इति सिद्धम्। एवं **वा सुप्यापिशलेः** (अ॰ ६/१/९२) इत्यनेन अदन्तादुपसर्गाद् ऌकारादौ सुब्धातौ परे विकल्पे वृद्धिरादेशे उपालकारीयति, उपलकारीयतीति रूपद्वयं सिध्यति। तपरकरणस्य प्रयोजनत्वात् तत् परणकारस्य ज्ञापकं न। मतमेतत् न सङ्गतम्। ॠऌवर्णयोः सावर्ण्यत्वात् सूत्रे ॠकारस्य तपराभावेऽपि गमुऌ, उपाल्कारीयतीति प्रयोगं सिध्यति। अतः दीर्घादेः व्यावृत्त्यर्थमेव तपरकरणस्य फलम्। अणुदित्सूत्रे यदि पूर्वेण णकारेण अण्प्रत्याहारो गृहीतः तत्र ॠकारस्याभावात् सवर्णग्रहणमसम्भवम्। अतः तपरकरणमवश्यं परणकारस्य ज्ञापकम्।

भाष्यकारेणात्र **उर्ॠत्** (अ॰ ७/४/७) सूत्रस्य तपरकरणम् उद्धृतम्। अचीकृतत् इत्यत्र कृधातोः ॠकारस्य **ॠत इद्धातोः** (अ॰ ७/१/१००) इत्यनेन प्राप्यमानम् इरादेशं बाधित्वा **उर्ॠत्** (अ॰ ७/४/७) इत्यनेन दीर्घॠकारस्य ह्रस्वो विधीयते। अत्रापि सूत्रे ॠकारस्य दीर्घादिसवर्णानां वारणार्थं तपरकरणम्। ॠकारस्य तपरकरणं अण्प्रत्याहारस्य परणकारत्वं ज्ञापितम्[1]। अत्र सूत्रे पूर्वेण णकारेण यदि अण्प्रत्याहारो गृह्यते तर्हि तत्र ॠकारस्याभावात् **उर्ॠत्** इति सूत्रे सवर्णग्राहकसूत्रस्याप्रवृत्त्या उद्देश्ये विधेये च उभयत्रैव सवर्णानां न ग्रहणम्। तेन ह्रस्वॠकारस्यान्तरतम्यात् ह्रस्वस्यैवादेशे दीर्घादीनां व्यावृत्त्यर्थं तपरकरणं व्यर्थं स्यात्। परेण णकारेण अण्प्रत्याहारग्रहणे ॠकारस्याण्त्वात् स्थान्यादेशयोः सवर्णानां बोधे आन्तरतम्यात् ह्रस्वस्य ह्रस्वो दीर्घस्य च दीर्घादेशः प्रसक्तौ दीर्घादेशव्यावृत्त्यर्थमत्र तपरकरणं सार्थकमिति शब्दरत्नकारमतम्[2]। ॠकारस्य भाव्यमानत्वेन सवर्णग्रहणाप्रसक्तत्वात् तपरकरणं व्यर्थमिति मतं न सङ्गतम्। यतः तपराभावे अचीकृतत् इत्यत्र कृत्धातौ ॠकारस्यान्तरतम्यात् ॠकारादेशे अपूर्वबोध्याभावेन भाव्यमानत्वमसम्भवम्। अतः स्वरूपाभ्यनुज्ञानार्थत्वेना-पूर्वबोधनार्थम् आदेशान्तरनिवृत्त्यर्थं च तपरकरणमावश्यकमिति नागेशाभिमतम्[3]। तपरकरणेन ज्ञायते सवर्णेऽण् परणकारेण गृहीतः[4]। सर्वत्र अण् परणकारेण न गृह्यते ज्ञापकेन तत्रापि शङ्का दुरीकरणीया। यथा **ढ्रलोपे पूर्वस्य दीर्घोऽणः** (अ॰ ६/३/१११) अत्र अण् पुर्वणकारेण उत परणकारेण निर्मितेति सन्देहे समाधानार्थं ज्ञापकाश्रयणमुचितम्। परेण लण्सूत्रेण णकारेण अण्प्रत्याहारो ग्रहणे सूत्रे तस्योच्चारणं व्यर्थम्। यतः परेण णकारेण अण्ग्रहणे अज्भिः व्यञ्जनानां निवेशेऽपि दीर्घाभावात् तेषां कार्यं न दृश्यते। अचामेव दीर्घादिसम्भवात् अच् इत्येव ब्रूयात् अथवा तदपि निस्प्रयोजनम्। सूत्रे अज्ग्रहणं यदि अभीष्टं स्यात्तर्हि **अचश्च** (अ॰ १/२/२८)

---

[1] "यदि च पूर्वेण णकारेणाण्ग्रहणं स्यात् ॠकारोऽनण्त्वाद्भिन्नकालस्य ग्राहक एव न भवतीति ॠकारो नैव स्थानी, नाप्यादेशः प्रसजतीति किं तपरत्वेन ? कृतं च तज्ज्ञापकं परेणाण्ग्रहणस्य ॥" - लण् सूत्रस्य प्रदीपटीका, महाभाष्यम्

[2] "अत्र च "उर्ॠत्"(पा॰ सू॰ ७/४/७) इति सूत्रे तपरत्वं मानम्। तद्धि चुरादिण्यन्तात्कृतधातोर्लुङ्यचीकृतदित्यत्र दीर्घर्कारस्य स्थाने ह्रस्व एव यथा स्यादित्यर्थम्।" - नाऽज्झलौ (अ॰१/१/१०) सूत्रस्य शब्दरत्न।

[3] लण् सूत्रस्य उद्योतटीका, महाभाष्यम्।

[4] "अणुदिदित्यत्र परेण 'उॠत्' इति तपरकरणात् ज्ञापकात्।" – ज्ञापकसंग्रहः।

इति परिभाषया दीर्घशब्दोच्चारितेन चरितार्थम्। तेन सूत्रे पुनरण्ग्रहणं व्यर्थम्। व्यर्थः सन् ज्ञापयति अत्र अण् पुर्वेण णकारेण गृहीतः। तथा सति अइउ इत्येतेषां त्रयाणामेव दीर्घोऽभिप्रेतः। ऋकारादीनां दीर्घनिवृत्त्यर्थमत्र पूर्वेण अण्ग्रहणं बोद्धव्यम्[1]। तेन आतृढम्, आवृढम् इत्यत्र ढ्रलोपस्य निमित्ते ढकारे ऋकारस्य दीर्घो न स्यात्। एवं **केऽणः** (अ॰ ७/४/१३) इति सूत्रेण कप्रत्यये अणो ह्रस्वो विधीयते। परेण णकारेण अण्ग्रहणापेक्षा अचामेव ह्रस्वादिभेदात् तदेव गृह्येत्। सूत्रे ह्रस्वोच्चारितेन अचः इति षष्ठ्यन्तं पदं स्वयमुपतिष्ठन्ति। अतः सर्वेषामचां ह्रस्वकार्यं सिद्धेऽपि परणकारेण अण्ग्रहणमनर्थकम्। अतः पूर्वेण णकारेण अण् इति ज्ञापितम्। तेन गोका नौका इत्यत्र कप्रत्यये सति ओकारौकारयोः ह्रस्वादेशो न स्यात्। एवम् **अणोऽप्रगृह्यस्यानुनासिकः** (अ॰ ८/४/५७) इत्यनेनावसाने अप्रगृह्यस्याणोऽनुनासिको विधीयते। अत्र यदि परेण णकारेण अण्प्रत्याहारो अभीष्टः तदा अच् इत्येव ब्रूयात्। यतः हयवरलानामननुनासिकत्वात् परणकारेणाण्ग्रहणं निष्प्रयोजनम्। अचामेव प्रगृह्यसंज्ञायाम् अण्ग्रहणसामर्थ्यात् पूर्वेण बोध्यम्, न परेण। अत्र अणि ॠकारस्याभावात् कर्तॄ हर्तॄ इत्यादौ ॠकारो नानुनासिकः। **उरण् रपरः** (अ॰ १/१/५१) इत्यनेन ऋस्थाने अण् रपरः स्यात्। अत्र ऋस्थाने हयवरलानामसम्भवात् परणकारेण अण्ग्रहणं न कृत्वा अच् इत्येवोक्तम्। ततः उरज् इति वक्तव्ये उरण् इत्युक्तिः पूर्वेण णकारेण अण्प्रत्याहारं ज्ञापयति। अतः अण्ग्रहणसामर्थ्यात् पूर्वेण, न परेण[2]। यदि परेण स्याद् तर्हि रेफस्य अण्त्वात् कर्तर्थम्, हर्तर्थम् इत्यादौ ऋस्थानिकस्य रेफस्यापि रपरत्वे द्वयो रेफयोः श्रवणं प्रसज्येत। मातॄणाम्, पितॄणाम् इत्यादौ ॠकारस्थानिकस्य ॠकारस्य रपरत्वं स्यात्। अतः **अणुदित्सवर्णस्य चाप्रत्ययः** (अ॰ १/१/६९) इति सूत्रं विहाय सर्वत्रैव पूर्वणकारेण अण्प्रत्याहारो ग्रहणीयरिति भाष्यकारस्याशयः[3]। परन्तु इण्प्रत्याहारो परेण णकारेण निर्मितः, न पूर्वेण। यथा **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (अ॰ ६/४/७७) इति सूत्रे य्वोः इति परणकारस्य ज्ञापकम्। पूर्वेण णकारेण इण्ग्रहणे इकारोकारयोरेव ग्रहणम्। तेन अत्रापि इउवर्णयोरभीष्टत्वात् 'य्वोः' इत्यस्य स्थाने लाघवात् इण् इत्येव कुर्यात्। यतः 'य्वोः' इत्यत्र सार्धतिस्रो मात्रा 'इणः' इत्यत्र तिस्रो मात्रात्मकत्वात् अर्धमात्रा लाघवो भविष्यति। पुर्वणकारेण इण् इत्युच्चारणेन लाघवेन कार्यसिद्धेऽपि 'य्वोः' इति गुरुनिर्देशाद् इण् इति परणकारेण ज्ञापितम्[4]। तस्माद् इण् प्रत्याहारे ऋकारादीनामपि

---

[1] "ऋकारश्चात्र अण्ग्रहणेन न गृह्यते। पूर्वेणैव णकारेण प्रत्याहाराश्रयणात्। अन्यथा दीर्घश्रुत्या अच इत्युपस्थितौ किमण्ग्रहणेनेति भावः" – ढ्रलोपे पूर्वस्य दीर्घोऽणः (अ॰६/३/१११) सूत्रस्य बालमनोरमा।

[2] "पूर्वेणैव णकारेण ह्यत्राण गृह्यते, प्रशास्तृणामित्यादिनिर्देशादित्यलम्" - उरण् रपरः (अ॰१/१/५१) सूत्रस्य बालमनोरमा।

[3] असंदिग्धं पराभावात्सवर्णेण्तपरं ह्युर्हृत्। य्वोरन्यत्र परेणेण् स्याद्व्याख्यानाच्च द्विरुक्तितः॥" लण् सूत्रस्य श्लोकवार्तिकम्।

[4] "इण् इति वक्तव्ये य्वोरिति गुरुनिर्देश इण्प्रत्याहारः परेणैव णकारेण गृह्यत इति ज्ञापनार्थः" – अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (अ॰ ६/४/७७) इति सूत्रस्य तत्त्वबोधिनी।

"सोयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः – परेण, न पूर्वेणेति।।" - लण् सूत्रस्य महाभाष्यम्।

ग्रहणे सूत्रेऽस्मिन् तेषां वारणार्थं 'य्वोः' इति उच्चारणं कृतम्[1]। अन्यत्र औकारादीनां ग्रहणार्थं **इणः षः** (अ॰ ८/३/३९) इत्यादौ परणकारेण प्रत्याहारस्य ग्रहणे गोषुक्तमित्यादौ षत्वसिद्धिः भवति। अतोक्तम् –

परेनैवेण्ग्रहाः सर्वे पूर्वेनैवेण्ग्रहा मताः।
ऋतेऽणुदित् सवर्णस्येत्येतदेकं परेण तु[2]॥

अतः माहेश्वरसूत्रे णकारद्वयेऽपि पुर्ववर्तीणामाचार्याणां व्यवहारेण तज्ज्ञाप्यते। परन्तु अत्र प्रत्येकं सूत्रे ज्ञापकेन समाधानापेक्षा पुर्ववर्तीणामाचार्याणां व्याख्यानेनैव णकारनिर्णयमुचितमिति भाष्यकारस्यान्तिमं सिद्धान्तम्[3]। तेन "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्" इति परिभाषा ज्ञापिता। बालमनोरमाकारेनापि परिभाषया समाधानं कृतम्[4]।

अतः पाणिनिना सर्वत्रैव सूत्रविधानं कृतेऽपि सूत्रार्थः परिस्फुटनार्थं ज्ञापकानां ज्ञानमपरिहार्यम्। ज्ञापकं विना सूत्रस्याभिप्सितार्थः न बोधितः। सूत्रव्यवहारं दृष्ट्वा सूत्रकारस्य प्रकृताभिप्रायं प्रकाशयितुं वैयाकरणानां विविधः प्रयासः उपलक्ष्यते। वैयाकरणाः प्रयोगानामुपलक्ष्य सिद्धान्ताः निर्णिताः।

<u>सन्दर्भग्रन्थसूची:</u>

१. कौण्डिन्न्यायन, प्रमोदवर्धन, सम्पादकः (२००७)। *पाणिनीयशिक्षा* (प्रथमसंस्करणम्)। चौखम्बा विद्याभवन।

२. जोशी, भार्गव शास्त्री भिकाजी, सम्पादकः (प्रथमभागः २०१४)/ *व्याकरणमहाभाष्यम्,* भाष्यप्रदीपोद्योतसमुल्लसितम् (पुनर्मुद्रितसंस्करणम्)। चौखम्बा संस्कृत प्रतिष्ठान।

४. तिवारी, हरिनारायण, सम्पादकः (नवाह्निकातिरिक्त प्रथमोऽध्यायः २०१४)। *व्याकरणमहाभाष्यम्,* ज्योत्स्नासमुद्भासितम् (पुनर्मुद्रितसंस्करणम्)। चौखम्बा संस्कृत प्रतिष्ठान।

५. त्रिपाठी, जयशङ्करलाल, सम्पादकः (प्रथमभागः २०१७)। *व्याकरणमहाभाष्यम्,* प्रदीपोद्यत-भावबोधिनी-हिन्दीव्याख्योपेतम् (तृतीयसंस्करणम्)। चौखम्बा कृष्णदास अकादमी।

६. त्रिपाठी, जयशङ्करलाल, सुधाकरमालवीय च सम्पादकौ (प्रथमभागः २०१६)। *काशिका,* न्यास-पदमञ्जरी-भावबोधिनी सहिता (पुनर्मुद्रितसंस्करणम्)। तारा वुक एजेन्सी।

---

[1] "अचि श्नुधातु' (सू ६/४/७७) इति सूत्रे इण् इत्येव सिद्धे य्वोरित्युक्तेर्ज्ञापकात्।" – ज्ञापकसंग्रहः।

[2] अणुदित्सवर्णस्य चाप्रत्ययः (अ॰ १/१/६९) इति सूत्रस्य छायाटीका, महाभाष्यम्।

[3] "आगमः उपदेशपरम्परा, तत्सिद्ध एवायमर्थो णकारानुबन्धनरूपस्वव्यवहारेण बोध्यत इत्यर्थः। एवञ्च व्याख्यानेनैव – पूर्वणकारेण केचित्, केचित्परणकारेण – इति निर्णये ज्ञापकानुसरणक्लेशो वृथेति सूचितम् ॥" - लण् सूत्रस्य उद्योतटीका, महाभाष्यम्।

"न्यायादागमाद्वा शब्दशक्तिरनुसरणीयेत्यर्थः" - लण् सूत्रस्य प्रदीपटीका, महाभाष्यम्।

[4] "अस्मिन्नेव सूत्रे अण् परेण णकारेण। इतरत्र तु 'अणोऽप्रगृह्यस्य' इत्यादौ पूर्वेणैवेत्यर्थः। अत्र च आचार्यपारंपर्योपदेशरूपं व्याख्यानमेव शरणम्" - अणुदित्सवर्णस्य चाप्रत्ययः (अ॰ १/१/६९) इति सूत्रस्य बालमनोरमा।

७. पञ्चोली, बालकृष्ण, सम्पादकः (प्रथमभागः १९६६)। *वैयाकरणसिद्धान्तकौमुदी,* लक्ष्मीव्याख्या सहिता (प्रथमसंस्करणम्)। मोतिलाल बनारसी दास।

८. पाण्डेय, रमाकान्त, सम्पादकः (२०१४)। *प्रौढमनोरमा,* सशब्दरत्न-अनन्या हिन्दीव्याख्योपेता, कारकादव्ययीभावान्तो भागः (प्रथमसंस्करणम्)। चौखम्बा विद्याभवन।

९. मिश्र, नारायण, सम्पादकः (प्रथमभागः १९८५) । *काशिकावृत्तिः,* न्यास-पदमञ्जरी-सहिता(प्रथमसंस्करणम्)। रत्ना पब्लिकेशन।

१०. मिश्र, मधुसुदन प्रसाद, सम्पादकः (२०१६)। *व्याकरणमहाभाष्यम्,* प्रदीपटीका सहिता (प्रथमसंस्करणम्)। चौखम्बा विद्याभवन।

११. मिश्र, विश्वनाथ, सम्पादकः (२०१६)। *परिभाषेन्दुशेखरः,* सुबोधिनी हिन्दीव्याख्योपेतः (प्रथमसंस्करणम्)। चौखम्वा सुरभारती प्रकाशन।

१२. शर्मा, लक्ष्मी, सम्पादिका (प्रथमभागः २०१७)। *वैयाकरणसिद्धान्तकौमुदी,* श्रीधरमुखल्लासिनी हिन्दीव्याख्या सहिता (प्रथमसंस्करणम्)। चौखम्बा सुरभारती प्रकाशन।

१३. शर्मा, गिरिधर, परमेश्वरानन्द च सम्पादकौ (प्रथमभागः २०१४)। *वैयाकरणसिद्धान्तकौमुदी,* बालमनोरमा-तत्त्वबोधिनी-सहिता (द्वादशपुनर्मुद्रणम्)। मोतिलाल बनाररसीदास।

१५. शर्मा, शिवप्रसाद, श्रीनिवीसशर्मा च सम्पादकौ (२०१६)। *लघुशब्देन्दुशेखरः,* अजन्तपुँल्लिङ्गादारभ्याव्ययीभावान्तो भागः (प्रथमसंस्करणम्)। चौखम्बा सुरभारती प्रकाशन।

१६. शास्त्री, भीमसेन, सम्पादकः (प्रथमभागः २०१९)। *लघुसिद्धान्तकौमुदी,* भैमिव्याख्या सहिता (दशमसंस्करणम्)। भैमी प्रकाशन।

Author's Detail

Name : Pallabi Malik
Designation : Ph. D. Scholar, Department of Sanskrit, Sidho-Kanho-Birsha University
Address : Village – Paysa, Po. – Dhaniakhali
Dist – Hooghly, West Bengal - 712302
Email : pallabimalik36@gmail.com

****